****
*
* MUKTABODHA INDOLOGICAL RESEARCH INSTITUTE
*
*
* ©2011 Muktabodha Indological Research Institute All Rights Reserved.
*
* E-texts may be viewed only online or downloaded for private study.
* E-texts may not, under any circumstances, be copied, republished,
* reproduced, distributed or sold, either in original or altered form, without
* the express permission of Muktabodha Indological Research Institute in writing.
****

****
*
* kriyaakramadyotikaa by aghora"sivaacaarya
*
* copied from (incomplete) devanaagarii transcript of 1920s edition in Grantha
* characters published in South India. Transcript kindly supplied by richard
* davis.
*
*
* data-entered by the staff of muktabodha under the supervision of mark s. g. dyczkowski
*
* revision 0: Sept. 23, 2008
*
*
*
*
****

ॐ तत्सत् ॥

शिवमस्तु ॥

श्रीशिवकामसुन्दरीसमेतश्रीचित्सभेशाय मङ्गलम्

श्रीज्ञानसम्बन्धपरमाचार्यपरब्रह्मणे नमः ॥

श्रीमदघोरशिवाचार्यविरचिता

क्रियाक्रमद्योतिका व्याख्या पद्धतिः ॥

मङ्गलम् ॥

टेक्स्त्-वन्दे निःश्वाधिकं शान्तमनादिनिधने शिवम् ।

निष्कलं निष्कलङ्कन्तु शक्तिं ज्ञानक्रियात्मिकाम् ॥ २ ॥

(१)

व्याख्या- श्रीमन्निर्मलमणिगुरुविरचिता

प्रभाख्या क्रियाक्रमद्योतिका व्याख्या ॥

शिवं शक्तिं गणाधीशं गुहं वागीश्वरीं क्रमात् ।

कुर्वाससमृषिं वन्दे पैङ्गलाद्यांश्च देशिकान् ॥ (२) ॥

चन्द्रार्द्धचूडशिखरिप्रभवस्तनोति

गौरीस्तनोदितपयोजलधिं निपीय ।

यो विघ्नपादपमहाननभङ्गलीलां

तं मत्तवारणमहं शरणं प्रपद्ये ॥ (२)

p. 2)

चिद्व्यक्तिः क्रियते मलावृतिमतां येनाऽत्मनामन्वहं
स्रष्टा पालयिता समस्तजगतां हर्ता च यो राजते ।
यस्यासीन्महिमा महानविषयो वाक्केतसोस्सर्वदा
तं वन्दे शिवमम्बिकासहचरं स्वाभीष्टसंसिद्धये ॥ (३)

२ ।यदीयमुद्राभिनयेन योगिनो
यदीयमौनेन च मुक्तसंशयाः ।
स्मिताभिरामाननमिन्दुशेखरं
भजेऽविशन्तं वटमूलवासिनम् ॥ ४

या पक्वनीहार बलं विभिद्य
परं नृणां व्यञ्जयते शिवत्वम् ।
ज्ञानक्रियारूपवती शिवस्य
शक्तिः पुरस्तादियमानिरस्तु ॥ ५

श्रीशैवागमविष्टपे परशिवाद्यर्थस्वरूपक्रमं
योऽविद्यातिमिरं व्यपोह्य निखिलं विद्योतयत्यादरात् ।
स्वव्याख्यानमहामयुखनिवहैर्दीछाविशिष्टात्मनां
वन्देऽघोरशिवाख्यदेशिकरविं बोधाय तं सर्वदा ॥ ६

यस्यालोको दुरितनिकरं दुस्तरं संविभिद्य

p. 3)

श्रेयरसद्यो वितरति परं भक्तिभाजां प्रजानाम्।
श्रीमत्पद्मालयपुरपतिं मद्गुरुं तं दयालुं
वन्दे शैवागमजलनिधिं वामदेवाभिधानम्॥ (७)

कामिकादिशिवज्ञानं मृगेन्द्रादिमसंहिताः।
श्रीरौरवमतङ्गादि संहितावृत्तिसंहतीः॥ (८)

श्रीसोमशंभुपूर्वाणामाचार्याणाञ्च पद्धतीः।
संविचार्य यथाबोधं सदाचार्यापदेशतः॥ (९)

क्रियते बालबोधार्थमस्फुटार्थप्रकाशिका।
क्रियाक्रमद्योतिकाया व्याख्या लघ्वी प्रभाभिधा॥ (१०)

परेषां ये दोषान् वरतरगुणान् संविदधते
दुरुक्तं क्षन्तुं ते मम यदिकमर्हन्ति गुणिनः।
दूतो ये सासूयाः कुटिलमतयो नूतनतया
खला एते हेयाः पुनरपि गुणिभ्योऽञ्जलिरयम्॥ (११)

तत्र तावदत्र भगवानाचार्यः प्रारिप्सि तस्य प्रवन्धस्य
निष्प्रत्यूहपरिपूरणाय शिष्टाचारानुविधानाय च
वक्ष्यमाणकर्मकलापोदय-

p. 4)

मूलभूतं सर्वार्थशकलकर्तृत्वलक्षणशिवत्वो पेतं
विघ्नविनाशहेतुमशिवापहं शिवप्रदञ्चाणुभ्यशिवं
निष्कलं तदविनाभूतां शक्तिञ्चाद्येन पद्येन प्रणमति (वन्दे)
इत्यादिना। अत्र शिवं वन्दे इति क्रियाकारकयोजना। (शिवम्)
सर्वशत्वसर्वकर्तृत्वात्मना अनादिसिद्धेन शिव श्रीकस्योदं
पुरपतिमनघं इति कोशेषु दृश्यते। त्यागराजाभिधानम्॥ इति
पाठान्तरम्॥ ३

त्वेन योगात् शिवः तम्। तदुक्तं शान्तत्वात् सर्वकर्तृत्वभावात्
परमकारणात्।शिव उक्तो महातन्त्रे तन्त्रविद्भिस्सदाशिवः इति। यदा
शिवः शुद्धः। तथा श्रीमन्मतङ्गे शिवत्वमिति शुद्धं स्यात् इति।
अथवा शिवं कल्याणं तद्योगात् शिवः। मत्वर्थीयोऽच। एवं
श्रीमद्वन्द्यघटीयेन कृतम्। लक्ष्यपदमेतत्। किं
लक्षणमित्याकाङ्क्षायामाह (अनादिनिधनम्) इति।

p. 5)

आदिश्च उत्पत्तिः निधनञ्च नाशः आदि निधने ते न विद्येते यस्य स
तथोक्तः तं आद्यन्तरहितमित्यर्थः। एवमुक्ते
वद्धात्मस्वतिव्याप्तिः तेषामप्याद्यन्तशून्यत्वात्। तथा

श्रीमत्सर्वज्ञानोत्तरे अनादिनिधनाः पाशा जीवोऽनाद्यस्तु कीर्तितः
इति । तदर्थमभिधत्ते (निष्कलङ्कम्) इति । निष्क्रान्तः कलङ्कात् मलात्
निष्कलङ्कः निरादयः क्रान्ताद्यर्थे पञ्चम्या इत्यत्र
पञ्चमीसमासः । तेषां पुनरनादिमलसंबन्धित्वेन
तथालासिद्धेर्भवति तद्व्युदासः । तथा श्रीमत्किरणे
अनादिमलसंबन्धात् किञ्चिज्ञोऽसौ मयोदितः । अनादिमलमुक्तत्वात्
सर्वज्ञस्तेन सः शिवः इति । तावत्युक्ते अनन्तादावतिव्याप्तिः तेषां
शिवानुगृहीतत्वेन निष्कलङ्कत्वायोगात् । तथा श्रीमत्तत्वप्रकाशे
आद्याननुगृह्य शिवो विद्येशत्वे नियोजयत्यष्टौ इति । तन्निरासायाह

p. 6)

(निष्कलम्) इति । निर्गता कला लक्षणया कलादिपिण्डसंबन्धः
यस्मात् स तथोक्तः कलादिकार्यकरणवर्जित इत्यर्थः तम् । तथा
श्रीमन्मोक्षकारिकायां न कलादिकलापिण्डसंबन्धोऽसौ यथा
पशुः । कदाचिदपि देवेशस्तस्माद्गीतस्तु निष्कलः इति । तेषां
बैन्दवकलादियोगित्वात् वद्धया?वृतिस्स्यात् । तथा श्रीमत्पराख्ये
शुद्धयोनिमयं तस्य वपुरुक्तमकर्मजम् इति ।
शतमप्यधिकारावस्थास्थशिवे भोगावस्थास्थशिवे वा अतिव्याप्तिः
तयोर्मार्गीयबैन्दवकलादिसंसर्गरहितत्वात् । तदर्थमाह
(शान्तम्) इति । अत्र निवृत्ताशेषशक्तिको लयानस्थशिवश्शान्त
इत्युच्यते । लयस्यैव शान्तपदत्वात्यत्वात् न ह्यभिहितकोषावकाशः ।

तथा श्रीमत्किरणे ईशस्सदाशिवश्शान्त इति वामना स्थितस्त्विह इति।
अधिकारावस्थस्तु प्रवृत्त क्रियाशक्तिकः।

p. 7)

भोगावस्थ उद्युक्तक्रियाशक्तिकः। यदाहुः शक्तीद्युक्तः
प्रवृत्तश्च कर्ता विविध इष्यते इति। ये तावत्युक्ते
मुक्तात्मस्वतिव्याप्तिः तेषामप्यधिकारभोगलयत्वयोगात्। तथा
श्रीमाच्चिन्त्यविश्वे सकले निष्कले चैव सर्वत्रैव समानना।
सायुज्यमिति तत् प्रोक्तम्। इति तथा चोक्तं आचार्यैः
श्रीमत्परमोक्षनिरासकारिकावृत्तौ एवञ्च सिद्धस्य
प्रोक्तलयाद्यवस्थानभ्युपगमे कर्तृत्वावृष्टेः
प्रत्युतेश्वरान्न्यूनलं स्यात् इति। तन्निमित्तमाह (विश्वाधिकम्) इति।
विश्वेषां चिदचिद्रूपाणां जगतां अधिकः ईश्वरः तम्। तस्यैव
विश्वाधिकत्वमुपपद्यते। मुक्तात्मनां तु तत्प्रसादत एव स्वरूप
लाभात् भवति तन्निवृत्तिः। इत्येवं विधं शिवं (वन्दे)
कायनाङ्मतोभिरभिवादये (शक्तिञ्च) वन्दे इति
समुत्क्षयेनान्वयः। सा किंलक्षणेति

p. 8)

विंशासायामाह (ज्ञानक्रियात्मिकाम्) इति ज्ञानञ्च दृक् क्रिया च
व्यापारः ते आत्मा स्वरूपं यस्याः सा तथोक्ता ताम्॥

(क्रि) (२)

गुरून् परापरान्नत्वा? गुरुवंशक्रमागतान् ।

क्रियाक्रमद्योतिकेयन्नित्यदिः क्रियते स्फुटम् ॥ (२)

(प्र) अथ स्वाभीष्टदेवताभिवादनं विधाय द्वितीयपद्येन

परापरपरापरगुरुप्रणामपुरस्सरं चिकीर्षितं प्रतिज्ञानीते

(गुरून्) इत्यादिना । (गुरुवंशक्रमागतान्) गुरवः परशिवादयः

तेषां वंशः सन्तानः वंशोऽन्ननायस्सन्तानः इत्यमरः ।

तस्य क्रमः परशिवात् सदाशिवः तस्मादनन्त

इत्याद्यविच्छिन्नपरिपाटिः परिपाटिरनुक्रमः इत्यमरः । तेन

आगताः समायाताः तान् । तत्वा श्रीमज्ज्ञानरत्नावल्यां अग्राही

किल ईश्वरः परशिवस्तस्मात् सदेशस्स्वयं

p. 9)

नादात्मा सकलाकलः प्रभुरतोऽनन्तेशभट्टारकः ।

तस्मादण्डजविष्णुनासव

विधिश्रीकण्ठरुद्रास्ततस्तन्त्राणामनतारको मुनिवरो

दुर्वासनामा गुरुः इति । (परापरान्) अत्र परे च अपरे च परापरे इति च

न्यस्तसमस्त क्रमेण पदनिभागः । तत्र परे ईशादयः अपरे

देवमुनिप्रभृतयः परापरे अनन्तादयः । तथा समाख्यातं

श्रीमत्पराख्यवृत्तौ गुरवो बहवस्तत्र परापरविभेदतः।

चोदकादि विभेदेन तथा गुर्वादिभेदतः। ईशस्सदाशिवश्शान्तो

गुरवः परमा मताः। एकमेव परं तत्त्वं स्वेच्छया तु त्रिधा

स्थितम्। अनन्तश्श्रीगलश्चोमास्कन्दो विष्णुर्विधिस्तु षट्।

परापरेऽपरे देवा मुनयोष्ट?गुरुत्तमाः॥ इति। विशेष्यं निर्दिशति

(गुरुन्) इति। गृणन्त्युपदिशन्तीति गुरवः तान्। (नत्वा)

भक्तिश्रद्धातिशयपूर्वकं कायवाङ्मनोभिः प्रह्वीभूय।

p. 10)

ततः किमित्याह (नित्यादिः) इति। नित्यादिक्रियाया इत्यर्थः। आदिशब्देन

नैमित्तिककांययोः प्रकाशः क्रियते। अत्र नित्यं स्नानादि।

नैमित्तिकं दीक्षाप्रतिष्ठे। काम्यं

पुत्राद्यभीष्टसिद्धिपदमस्त्राभिषेकाख्यं कर्म। तथा

समीरितं श्रीमज्ज्ञानरत्नावल्यां स्नानं पूजाजपोध्यानं

होमश्चैव तु पञ्चमः। इति नित्यं सदा कुर्यात् इति। तथा दीक्षा

चैव प्रतिष्ठा च ज्ञेयं नैमित्तिकं द्विधा। काम्यं

तद्द्विधंविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा॥ नित्यं

नैमित्तिकं काम्यमाचार्यस्योदितन्त्रयम्। नित्यं काम्यं

साधकस्य स्वशास्त्रोक्तविधानतः॥ समयिपुत्रकाणान्तु नित्यमेव

प्रकीर्तितम्। इति। (इयम्) एषा (क्रियाक्रमद्योतिका) क्रिया करणं

अनुष्ठानमिति यावत्। क्रिया तु चेष्टाकरणसंप्रधारणकर्मसु इति

नानार्थरत्नमाला । तस्याः क्रमः परिपाटिः तस्य

p. 11)

द्योतिका प्रकाशिका । नित्यादिकर्मानुष्ठानक्रमप्रकाशकेति यावत् ।
अनवा क्रियाक्रमद्योतिकेतिपदस्य । अस्याः क्रियाया अनन्तर इयं क्रिया
स्त्येवं नित्यादि क्रियायाः
कर्मक्रमप्रकाशिकेत्येनमत्यौंऽनुसन्धेयः । अत एव हि
शिवशास्त्रेषु सत्स्वप्यस्यो?पयोगः । नित्यादिरिति पाठे
क्रियाक्रमद्योतिकापदस्य विशेषणं कृत्वा नित्या नित्य क्रिया
आदिर्यस्यास्सा तथोक्ते व्यर्थः । (स्फुटम्) इत्यनेन पद्धत्यन्तरेषु
विद्यमानेष्वपि अस्य प्रबन्धस्योपयोगस्सूचितः । तानिह्यस्फुटं
कृत्वा नित्यादीनामुद्योतकानि अतस्तैरगदितार्थप्रकाशक इत्यर्थः ।
(क्रियते) विरच्यते । मया इति शिवः । पद्धतित्वं
चास्यानुष्ठानमार्गत्वादिति ज्ञेयम् ॥

शिवध्यानविधिः ॥

(क्रि) (३)

पातस्समयात् पूर्वं पञ्चनाडिकावच्छेदे?

p. 12)

समुत्थाय, शुचिर्वाप्यशुचिर्वा यथासंभवशौचयुक्तो हृत्पद्मे
द्वादशान्ते वा गुरुपदिष्टप्रकारेण शिवं ध्यात्वा, यथाशक्ति
जपं कृत्वा, समाधि
सामर्थ्यरहितस्सदाशिवादियथारुचितविग्रहं ध्यात्वा,

(प्र) अथ चिकिर्षितं प्रतिज्ञाय पुनरभिधास्यमानेषु
नित्यादिकर्मसु नैमित्तिकादिकर्मविधिर्नित्यकर्मपूर्वकत्वात्
नित्यकर्म प्रथममभिधातुं प्रवृत्तः तत्र तावत् प्रातः काले
समुत्थाय शिवं सन्चिन्तयेत् सुधीः। अवश्यकरणञ्चैव
शौचभावमनन्ततः। इति श्रीमदशुमद्वचनेन पूर्वं
शिवध्यानविधिमाचष्टे (प्रातः) इत्यादिना (ध्यात्वा) इत्यन्तेन।
शिवध्यानस्य कालं कथयति (प्रातः) इति। (प्रातस्स्मयात्)
निशापश्चिमभागकालात्। (पञ्चनाडिकालच्छेदे) पञ्चनाडिकाः
पञ्चघटिकाः। * * * * * * * *? णाः। तथा श्रीमत्कामिके

p. 13)

षष्टयुच्छवासा भवेत् प्राणष्षट् प्राणा घटिका भवेत् इति।
तासामवच्छेदे अवधौ ब्राह्ममुहूर्ते इति यावत्। तथा
श्रीमत्सूक्ष्मे रात्रेरन्तमिति प्रोक्तं यावदाभूतनाडिकाः।
प्रातः कालमिति प्रोक्त ज्ञात्वा कर्म समारभेत्। ब्राह्मां
तत्कालनामं हि। इति। विमले ब्राह्मे मुहूर्ते उत्थानं

ध्यानाव?श्यकशौचकम्। दन्तशुद्ध्याप्लवौ सान्द्र्यं
मायकी? जप एव च॥ एतानीनोदयात् पूर्वं कर्पुरस्यैकर्णिका?
जनाः। उदिते तु दिवानाथे * *?दादिस्तथाचरेत् इति।
ध्यानाधिकारिलक्षणमाह (शुचिर्वा) इति। शुचिर्वा शुद्धो वा
सुप्ति?समये अस्पृश्यस्पृष्टिविरहितः? पुमानिति यावत्।
शुचिश्शुद्धेऽनुपहते शृङ्गाराषादयोस्तथा? इति विश्वः।
(अशुचिर्वा) तदानीमस्पृश्यस्पर्शनाद्य?शुद्धियुक्त इत्यर्थः।
(यथा संभवश्यौ? युक्तः) इत्येतद्विशेषणं शुचेरशुचेश्च।

p. 14)

तत्राद्यस्य विदादोषनिवारणाय
द्वितीयस्यास्पृश्यस्पर्शनाद्यशुद्धिव्यपोहनाय
निदादोषपरिहरणाय च। वारुणस्नानविरहेऽपि तत्कालानुगुणं
यथासंभव शौचविधेस्तुल्यत्वात्। अत्र यथाशक्तिशौचसंपन्नः
शिवं ध्यायेदिति तात्पर्यम्। यत् श्रूयते शुचिनां कर्म कर्तव्यम्
इति। यदा शुचिर्वा अशुचिर्वा यथासंभवशौचसंपन्नः? युक्तो
वा इति पृथक् पृथक् योजनीयम्। तस्य पुनराधारमाह (हृत्पद्मे) इति।
एतत्स्वरूपमग्रे दर्शयिष्यामः। कथं ध्यायेदित्याह
(गुरुपदिष्टप्रकारेण) इति। ध्येयमाह (शिवम्) इति। व्याख्यातमेतत्।
(यथाशक्ति) यथाविभवम्। (जपम्) मूलमन्त्रजपम्। तथा
श्रीमच्चिन्त्यविश्वसादाख्ये मूलमन्त्रमनुस्मृत्य जिह्वाग्रे तु

प्रसन्नधीः। स्थित्वा यावदुषः पूर्वं स्तुत्वा स्तोत्रैः प्रणम्य च

। इति। जपस्तावत् ध्येयसंमुखीकरणाय

p. 15)

तदाचकमन्त्रभाषणम्। तथा श्रीमन्मृगेन्द्रे जपस्तद्भाषणं

ध्येयसंमुखीकरणं मतम् इति। अनेन

ध्यानसामर्थ्यरहितानां तद्वचक्रचिन्तनादिनापि तत्फलसिद्धिरिति

सूच्यते। अत्र परशिवस्य ध्यानं तदाराधनोपायभूतस्य

तद्वचक्रमन्त्रस्य जपञ्चोपदेशतोऽनुसन्दध्यात्। अधिकारिभेदेन

ध्यानभेदमभिधत्ते (समाधिसामर्थ्यरहितः) इति। समाधिस्तावत्

ध्यातृध्यानावभासविधुरं ध्येयैकविभासलक्षणं

चरमयोगाङ्गम्। तदुक्तं तदर्थमात्रनिर्भासं

स्वरूपशून्यमिव समाधिः इति। तत्र सामर्थ्यरहितः शक्तिहीनः

सामर्थ्यं योग्यताशक्तयोः इति नानार्थरत्नमाला।

सदाशिवादियथारुचितविग्रहम्) इत्यत्र सदाशिव शब्देन

सकलनिष्कलरूपो भोगावस्थास्थः शिवः प्रदर्श्यते। आदिशब्देन

अधिकारावस्थास्थः सकलरूपो महेशो गृह्यते।

p.16)

तथा श्रीमद्वातुलशुद्धाख्यायां शिवस्सदाशिवश्चैव महेशो

मूर्तयस्त्रिधा। शिवतत्वं महासेन निष्कलं चेति कीर्तितम्। सकलं

निष्कलं चैव सादाख्यमिति चोच्यते। महेशं सकलं विद्यात्
त्रिविधास्ते भवन्ति च॥ इति। एतदवस्थात्रयं
वक्ष्यमाणसन्ध्याध्यानवदधिकारिभेदेन
कर्तव्यत्वादुपपन्नमिति गुरवः इत्युक्तं
श्रीमत्सोमशंभुपद्धतिव्याख्याकारेण। तथा
श्रीमद्बालज्ञानरत्नावल्यां एवं त्र्यवस्थं विज्ञाय शिवं
सर्वाध्वगं परम्। यथाऽधिकारं शिवमपि ध्यायेत्
भोगापवर्गदम्। इति।

मलोत्सर्जनशौचादिविधिः॥

(क्रि) (४) दण्डादिसहायो गृहान्निस्सृत्य, यथोधितं देशं गत्वा
तस्मिन्नावश्यकं दिनासन्ध्ययोस्सौम्यास्यो निशि यम्यमुखो
दक्षिणकर्णोपवीती

(p.16)

महाभूतविकारं
वर्ज्यस्सूर्याद्यनभिमुखस्तृणातच्छन्नायां भूमौ मलं
विसृज्य, लोष्टादिना गुदं प्रमृज्य / वामपाणिना लिङ्गं
संगृह्य, अनेन यथोक्तां मृदं समादाय, जलान्तिकं गत्वा,
मृदंभोभिरेकप्रयोगेण साधनं पञ्चप्रयोगेण

गुदमन्तराऽन्तरा मृदैकैकया हस्तं संशोध्य वामकरे
दशधा मृदमुभयोश्च सप्तधा संयोज्य, पश्चात् स्फुक्शुद्धिं
विधायँभावशुद्ध्यभावे यावच्छौचं विदध्यात्।
पश्चादेकैकया मृदा पादौ पाणी च प्रक्षाल्य, अन्यस्मिन् देशे
द्विराचम्य (८)

(प्र) अथ शिवध्यानविधिं व्याहृत्य आदिभूतं सर्वक्रियाङ्गं
मलोत्सर्जनादिकं पश्चात् स्नानादिकं ततो मलोत्सर्जनादिकमेतादौ
वक्तव्यं तन्मूलत्वात् सर्वक्रियाप्रवृत्तेरिति कृत्वा प्रथमं
मलोत्सर्जनशौचादिविधिं वक्ति (दण्डादि) इत्यादिना (आचम्य)
इत्यन्तेन। (दण्डादिसहायः) दण्ड आदिर्यस्य

p. 18)

सः दण्डादिः सहायो यस्य स तथोक्तः। दण्डलक्षणं यथा
सुप्रभेदे विप्राणान्तु शिरोत्सेधं क्षत्रियाणां ललाटकम्।
वैश्यानां नासिकोत्सेधं शूद्रादीनां तु वर्जयेत्॥ तत्रापि
विशेषमाह। मूर्द्धान्तं देशिकस्योक्तं ललाटं साधकस्य तु।
भुवोऽन्तरं पुत्रकस्य नासान्तं समयिनां सदा॥ इति। तथा
नैष्ठिकानां गृहस्थानां हस्तव्यामेन कारयेत्। सर्वदा
धारणीयं स्याद्वैणवं दण्डमुत्तमम्॥ इति।
कमण्डलवादिरादिशब्दार्थः। तथा श्रीमदजिते उत्थाय च

बहिर्गत्वा दण्डपाणिः कमण्डलुम्। मृत्काष्ठगोमयं पुष्पं
तिलमागलकं शुभम्। कुशान् द्रव्यं गृहीत्वा तु नदीं गच्छेत्
समुद्रगाम्। इति। मलमुत्रविसर्जनयोग्यस्थलमाह (यथोक्षितम्) इति।
तद्देशः प्रदर्शितः श्रीमत्सहस्रे यथेष्टदेशं
संगम्यमैशान्यां दिशि वर्जयेत् इति। अनेन
अयो*देशगमनंनिषेधश्च सूच्यते।

p. 19)

तथा श्रीम * * * *? मिके। मार्गशष्यनदीगर्तजलगोमनभस्मसु?।
श्मशानासमकृष्टैकदुमशृङ्गाटकादिक?॥ आवश्यकं न
कर्तव्यम् इति। (तस्मिन्) मलादिविसर्जनार्हस्थले। (आवश्यकम्)
मलादिकम्। तथा श्रीमत्सर्वज्ञानोत्तरे निस्सृत्य
शयनस्थानादावश्यकरणं कुरु इत्येनमादिक *
ने?सर्वश्यकपदस्यैव मलवाचकत्वं सिद्धम्। तत् पुनस्तस्त्र
मलमिति पदं विचिन्त्यम्। यद्वा * * * ? नि चैव
कर्त्तव्यमावश्यकमिति कृत्वा मलपदस्य विशेषणतया गोपनीयम्।
कीदृग्भूतो मलं त्रिशूले?दित्याह (दिवासन्ध्ययोः) इति।
दिवाशब्देन सन्ध्याव्यतिरिक्ताहः कथ्यते। सम्यक्
ध्यानन्त्यस्यामिति सन्ध्या पादोन चतुर्नाडिकात्मकः कालः।
प्रहरार्द्धं तथा सन्ध्या इति क्षीरस्तरङ्गिण्यामुक्तत्वात्?। * * *
यामेति व्यपदेशाच्च।

p. 20)

(सौम्यास्यः) इत्यत्र सौम्यपदं सोमदेवताकोत्तरदिग्वाचकं सोमशब्दस्तु कुबेरचन्द्रमसोर्वाचकः। सौम्यः पुमान् वुधे विप्रे त्रिषु स्यात् सोमदैवते। सोमः कुबेरे कपूरे लताभेदे सुधाकरे इति नानार्थरत्नमाला। सोमो देवता अस्येति सौम्यः देवद्यञ्। अतः सौम्यास्य इति उत्तराभिमुख इत्यर्थः। (निशियाम्यमुखः) दक्षिणदिङ्मुखः। (महाभूतविकारवर्ज्यः) महाभूतानि पृथिव्यादिपञ्चभूतानि तेषां विकाराः परिणामाः तत्तद्भूतजनितदारुजादि पञ्चशब्दा इति यावत्। तथा श्रीमद्वातुले महाभूतविकारांशश्शब्दः पञ्चविधस्स्मृतः। दारुजं पृथिवीजातं शंखजञ्चाप्यमुच्यते॥

आग्नेयं लोहजनितं वायुजातं तु वंशजम्।
सोम?गगनजातं स्यात् तस्मात् भूतविकारकम्॥
* * * * * ? शाङ्खञ्च लौहं शुचुरमेव च।

p. 21)

मेयं सर्वसमायुक्तं शब्दः पञ्चविधस्स्मृतः॥
इति परिणामो विकासे द्वे इत्यमरः। तैर्वर्ज्यः रहितः मेदिन्यादिमहाभूतविकारदारुजादिशब्दाञ्चकश्रवणवर्जित इति

यावत्। (सूर्यास?नभिमुखः) सूर्यः आदिर्यस्य स तथोक्तः तस्य
अनभिमुखः असंमुखः। आदिग्रहणात् गोद्विधा? दीनामपि
अनभिमुख इत्युच्यते। तथा श्रीमद्ब्रह्मशंभुपद्धत्यां
गोविप्रलिङ्गिणां स्त्रीणां समुखं चन्द्रसूर्ययोः।
महाभूतविकाराणां शनैरेतोत्सृजेत्मलम्॥ इति।
(तृणावच्छन्नायाम्) क्षणैः अतच्छन्नायां तिरोहितायाम्।
तृणशब्देनात्र अयाशीयतृणाद्युपलक्ष्यते। तथा श्रीवासिष्टे
नवकुण्ठितशिरा भूमिमयाङ्गीयैस्तृणैरन्तरितां कृत्वा मुत्र
पुरीषे कुर्यात् इति। भूदेवता * * * निषेधार्थमेवमुक्तम्। तथा
देवता ऋषयस्सर्वे गत्वा नामास्तथैव च। उतिष्ठत सर्ववश्च

p. 22)

बहिर्भूमि करोम्यहम्॥ इति॥ (मलम्) पुरीषम्। मलोऽस्त्री
पापविद्दिकट्टानि? इत्यमरः। (विसृज्य) त्यक्त्वा। (लोष्टादिना) लोष्टं
मृत्खण्डः आदिर्यस्य तत् तथोक्तं तेन। तृणादिरादिशब्दार्थः।
तदुक्तं श्रीमत्सोमशंभुचरणैः
ततस्तृणैस्यङ्गाङ्गैर्मृज्याल्लोष्टेन वा गुदम्। न तु
गोमयपाषाणैर्दारुभिश्च कदाचन॥ इति। (गुदम्) वायुम्। गुदं
त्वपानं? वायुर्ना इत्यमरः। (प्रमृज्य) मार्जनं विधाय।
(लिङ्गम्) मेद्रम्। लिङ्गंस्यात् साध्यगमके शेफश्चिन्हेशमूर्तिषु
इति। नानार्थरत्नमाला। (अन्येन) दक्षिणकरेण। (यथोक्ताम्)

शिवागमविहिताम्। तल्लक्षणमभिहितं श्रीमत्कामिके
शुद्धामशर्करां मृद्विं मृदं शौचार्थमाहरेत् इति ॥

शौचविधिं निरुपयति (जलान्तिकम्) इति। (जलान्तिकम्) जलसमीपम्।
अन्तिके निकटेऽन्तिकम्

p. 23)

इति नानार्थरत्नमाला। (मृदंभोगिः) मृदश्च मृत्तिकाः
अंभांसि च जलानि मृदंगांसितैः। (एकप्रयोगेण) एकवारेण।
(साधनम्) लिङ्गम्। (पञ्चप्रयोगेण) पञ्चवारेण (अन्तराऽन्तरा)
मध्ये मध्ये। (एकैकया) एकाच एका च एकैका तया। (हस्तम्)
शौचक्रियाप्रवृतनामकरम्। (संशोध्य) सम्यक् प्रक्षाल्य। अत्र
पूर्वं दक्षिणकरेण मृत्तिकां तामहस्ते निक्षिप्य तेन
मृदंभोभिर्गुदं संशोध्य अनन्तरं वामहस्तं
मृदंभोभिरेकैकधा संप्रक्षाल्य एवमन्तराऽन्तरा
वामहस्तशोधनपुरस्सरं गुदं पञ्चधा
संशोधयेदित्यवधेयम्। तथा श्रीमत्कारणे तृणमूलादिकं
त्यक्त्वा जलेनार्द्रीकृतान्तु ताम्। आमलीफलमात्रेण सव्येनादाय
वामके ॥ निक्षिप्य वामहस्तेन घर्षयेत्तु पुनः पुनः इति। (दशधा)
दशप्रकारेण। (उभयोः) दक्षिणवामकरयोः।

p. 24)

(सप्तधा) सप्तवारेण । (सफिक्शुद्धिम्) स्फिचौ कटिप्रोथौ तयोः
शुद्धिः ताम् । स्त्रियां स्फिचौ कटिप्रोथौ इत्यमरः ।
(भावशुद्ध्यभावे) भावशुद्धिः मनश्शुद्धिः तस्याः अभावे
विरहे । तथा यावन्मात्रं मनश्शुद्धिस्तावदाशौच मिष्यते इति ।
भावशुद्धिश्च वीभत्सानिवृत्तिरेव । उक्तसंख्याया अधिककरण
एव तात्पर्यं न तु ह्रासे । तथा सति
संख्याविधानानर्थवयप्रसङ्गात् ॥ (यावच्छौचम्)
शुद्धिपर्यन्तम् । यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे
इत्यमरः । (विदध्यात्) कुर्यात् । ततः किमित्याह । (अन्यस्मिन्) इति ।
(अन्यस्मिन्) शौचस्थलाक्षितस्मिन्? । (द्विः) द्विवारम् । (आचम्य) इत्यत्र
पूर्व गण्डूषैरष्टभिर्वक्त्रं संशोध्य पश्चात् तुष्णी
समाचम्य तदनन्तरं मन्त्रैर्वक्ष्यमाणप्रकार व* *
मेदित्यवसेयम् । तथा मूत्रे पुरीषे भुक्तौ

p. 25)

च तथाऽभक्ष्यस्य भक्षणे । चतुरष्टद्विरष्टाष्टगण्डूषेण
विशुद्ध्येति ॥ इति । तथा श्रीमज्ज्ञानरत्नावल्यां एका लिङ्गे गुदे
पञ्च दश वामकरे मृदः । उभयोरसप्तसंख्याश्च पश्चात्
स्फिक्शुद्धिमाचरेत् । ततोऽन्यत्र समाचामेत् तूष्णी सव्योपवीतवान् ।
पुनर्मन्त्रैस्समाचम्य दन्तधावनमाचरेत् ॥ इति ॥

दन्तधावनविधिः ॥

(क्रि) (५) दन्तकाष्टमष्टाङ्गुलं
मुक्तिकामोऽव्योद्धृतदशाङ्गुलं चूतादिसंभवं
कनिष्ठाङ्गुलिपरिणाहमार्द्रं त्वगन्तितमपर्वकमृजुं सङ्गृह्य
दन्तशुद्धि विदध्यात् ॥

पिशाचधववानीर
निम्बैरण्डादिकाशकुशयाशीयवृक्षजमङ्गुल्यादिकं बिहाय,
अन्यत् परिमृङ्गीयात् ॥

प्रतिपत्पर्वषष्टीनवम्यमावास्यासु न दन्तान् धावयेत् । अपा
द्वादश गण्डुषैः शुद्धपत्रैर्वा विधाय ॥ ५

पा – पुनः ॥

p. 26)

(२२) (प्र) अथ मलोत्सर्जनादिविधिमभिधाय
दन्तधावनविधिमभिधत्ते (दन्तकाष्ठम्) इत्यादिना (विधाय)
इत्यन्तेन । अथेष्टसाधनं दीक्षा परमेशमुखोद्गता । निगद्यते

समासेन द्वित्वादर्थस्य सा द्विधा। भौतिकी नैष्ठिकी चैव इति
श्रीमन्मृगेन्द्रसुतेः नैष्ठिकदीक्षाया दीक्षितस्य एव*?काष्ठस्य
लक्षणमुपपादयति (अष्टाङ्गुलिम्) इति। अष्टौ अङ्गुल्यः
प्रमाणमस्येति अष्टाङ्गुलम्।
तत्पुरुषस्याङ्गुलेस्संख्यान्ययादेः इति समासान्तोऽन्।
(मुक्तिकामः) मुमुक्षुः। अयः पुनः दन्तकाष्ठं
खदिरादिसंभवं गृह्णीयात्। तथा समभिहितं
श्रीमत्सोमशंभुचरणैः चिरिबिल्वकरञ्जोत्थं शैरीषं
सादिरार्जुनम्। अष्टाङ्गुलं मुमुक्षूणाम् इति॥ भौतिकस्य
तल्लक्षणमाह (अन्यः) इति। अन्यः बुभुक्षुः। (द्वादशाङ्गुलम्)
द्वादश अङ्गुल्यः प्रमाणमस्येति

p. 27)

तथोक्तम्। (चूतादि संभवम्) चूतः आम्रः आदिः यस्य सः
चूतादिः तस्मात् संभवं समुत्पन्नम्। लक्षादिरादिशब्दार्थः।
तथा तैरेव समीरितं बुभुक्षूणामथोच्यते इत्युपक्रम्य
प्लक्षाम्रककुभाशोकजम्बूचंपकसंभवम्।
अपामार्गादिमुक्तोत्थं द्वादशाङ्गुलमायतम्॥ इति।
(कनिष्ठाङ्गुलिपरिणाहम्) कन्यसाङ्गुलिविशालकम्। परिणाहो
विशालता इत्यमरः। (आर्द्रम्) अशुष्कम्। (त्वगन्तितम्) त्वक् चर्म तया
अनितं युक्तम्। (अपर्वकम्) न विद्यते पर्वग्रन्थिः यस्य तत् तथोक्तम्।

ग्रन्थिर्ना पर्वपरुषी इत्यमरः। (ऋजुम्) अवक्रम्।

दन्तधावनानुचितवृक्षादिकं वक्ति (पिशाच) इति।

(पिशाचधवनानीरनिम्बैरण्डादि) पिशाचश्च वृक्षविशेषः।

धवश्च वृक्षभेदः पति शाखिनरा धवाः इत्यमरः। वानीरश्च

वञ्जुलः निम्बश्च प्रसिद्धः एरण्डश्च वातरिः पिशाचधवना

नीरनिम्बै

p. 28)

रण्डाः ते आदयः यस्य तत् तथोक्तम्। (काशकुशयाज्ञीयवृक्षजम्)

काशश्च बाणः कुशश्च दर्भः अथो काशमस्त्रियाम्। इक्षुगन्धा

पोटगलः अस्त्री कुशं कुतो दर्भः इति चामरः। याज्ञीयवृक्षः

यज्ञकर्मार्हतरुः काशकुशयाज्ञीयवृक्षाः तेभ्यो जायत इति

तथोक्तम्। तत् कर्मार्हन्तु याज्ञियम् इत्यमरः। यज्ञवृक्षाश्च

यथा

अश्वत्थोदुम्बरप्लक्षा आषाढी खदिरस्तथा।

न्यग्रोधश्च समीबिल्वचूतवैकङ्कतास्तथा॥

असनश्च शिरीषश्च यज्ञवृक्षाः प्रकीर्तिताः, इति। अत्र

प्लक्षखादिरचूतशिरीषाणां दन्तकाष्ठार्हतरुषु निर्देशात्

तदन्ययाज्ञीयवृक्षस्य निषेध इति तात्पर्यम्। (अङ्गुल्यादिकम्) इत्यत्र

इष्टानदिरादिशब्दार्थः? । तथा श्रीमज्ज्ञानरत्नावल्यां
कण्टकक्षीरवृक्षोत्थमिष्टकाङ्गारभस्मजम् । अङ्गुलिश्च न
शस्येत प्रमादाच्चेत् तपः क्षयः ॥ इति ।

(p.29)

(अन्यत्) पिशाचादेरितरत् । [परिगृह्णीयात्] परिग्रहं कुर्यात् ॥

ननु किं सर्वदा दन्तधावनं विहितमिति नेत्याह (प्रतिपत्) इति ।
(प्रतिपत्पर्वषष्ठीनवम्यमानास्यासु) प्रतिपच्च प्रथमा पर्व च
षष्ठी च नवमी च अमावास्या च तास्तथोक्ताः तासु । (न धावयेत्)
न शोधयेत् । तदा किं करणीयमित्याह (अपाम्) इति । (अपाम्) जलानाम् ।
(द्वादशगण्डूषैः) द्वादशमुखपूरणैः । गण्डूषो
मुखपूरणे इति हलायुधः । (शुद्धपत्रैः) पावनचूतादिवर्णैः
॥

वारुणस्नानविधिः ॥

(क्रि) (६) स्नायात् । तत्र नदीसङ्गमाद्यन्यतमं मला, आचम्य,
कृतसकलीकरणोऽस्त्रेण मृदमष्टाङ्गुलादधस्सङ्गृह्य, त्रिधा
विभज्य, एकया आनाभिपादान्तं प्रक्षालयेत् । अन्यया
सकृदस्त्राभिमन्त्रितया अशेषमङ्गमालिप्य, अनाभिजलं

p. 30)

प्रविश्य, पूर्वास्यषष्णमुख्या (-मुद्रा) वदनादिकं विधाय (पि-)
हृदये भास्वरमस्त्रं सञ्चिन्त्य, स्नायात्॥

ततो द्विजः प्रथमं ब्राह्मीं सन्ध्यामुपास्य,
पश्चादस्त्रंसन्ध्यामेवोपास्यात्। तत्सन्ध्यार्थमस्त्रेण शिरसि
जलबिन्दून् निक्षिप्य, अञ्जलित्रयमनेनैवार्घ्यं दत्वा यथाशक्ति
जपेत्। पुनः शेषमृद्भागमादाय, संहितयाऽभिमन्त्र्य,
नभिदघ्नजलं प्रविश्य, वामहस्ते त्रिधा विभज्य, अस्त्रेण पूर्वं
ब्रह्मभिर्दक्षिणं मूलेनोत्तरं सकृदभिमन्त्र्य, अस्त्रजप्तेन
दिग्बन्धनं कृत्वा, शिवजप्तेन मृद्भागेन
बाहुभ्रमणाञ्जलभवगाह्य, शिवतीर्थवद्विचिन्त्य, बलाजप्तेन
विग्रहं कुण्डयित्वा, शिवं ध्यात्वा, स्नायात्।

ततः सोमसूर्यौ शक्तिशिवौ च वामदक्षिणहस्तयोः
सञ्चिन्त्य, वौषडन्तसंहितयाऽभिमन्त्र्य आनाभिजले
कुम्भकमुद्रया शिरस्यभिषिञ्च्य, अस्त्रेण दिग्विदिक्षु जलं निक्षिप्य,
चक्रवर्त्युपचारेण

p.31)

सुगन्धामलकादिना स्नात्वा, जलादुत्तीर्य, द्वस्वप्रासादेन
तीर्थमुपसंहरेत्। ततोऽङ्गलग्नजलं
शुद्धेनानार्द्रवाससोन्मृज्य, शुद्धे वाससी परिधाय॥ (६)

(प्र) अथ दन्तधावनविधिमुदीर्य
अथार्चनादिसत्कर्मयोग्यताजनकं चितेः। स्नानं निगद्यते इति
श्रीमन्मृगेन्द्रश्रुतेः सकलपूजादिक्रिया स्नानमूला यतो
नास्नातस्य क्रिया विद्यते तस्मादादौ तदवाप्तिकरं
वारुणस्नानविधिं वक्ति (स्नायात्) इत्यादिना (परिधाय) इत्यन्तेन।
(स्नायात्) स्नानं कुर्यात्। तत् कथमित्याह (तत्र) इति। (तत्र)
स्नानकरणे। कुत्र स्नानमाचरेदित्याह (नदीसंङ्गमाद्यन्यतम्)
इति। नदीसङ्गमः सरिद्वयसम्मेलनं नदीसमुद्रसङ्गमो वा स
आदिर्यस्य तत् नदीसङ्गमादि तत्र अन्यतम् एकम्।
कासारादिरादिशब्दार्थः। तथोक्तं श्रीमत्सोमशंभुचरणैः
सिन्धुराङ्गमकासार तटाकेषु

p. 32)

नदे ह्रदे इत्यादि। तत्र पूर्वं करणीयमाह (आचम्य) इति।
आचमनविधिमुपरिष्टात् स्पष्टीकरिष्यति। (कृतसकलीकरणः) कृतं
वदयमाणवत् विहितं सकलीकरणं कराङ्गन्यासः येन स
तथोक्तः। तथा श्रीमन्मृगेन्द्रपद्धत्यां साङ्गन्यासः

करन्यासस्सकलीकरणं मतम् इति ।

मृत्तिकास्नानाय तद्ग्रहणतद्विभजन तदभिमन्त्रणादि

क्रममति दिशति (अस्त्रेण) इति । (अष्टाङ्गुलात्) अष्टाङ्गुलप्रमाणात् ।

शुचि स्थलादिति शेषः । तदुक्तं श्रीमत्कालोत्तरे पर्वताद्वा

नदीकूलात् पुण्यक्षेत्राच्छुचिस्थलात् । ब्रह्मवृक्षात् कुशाधस्तात् इति ।

(अधः) अधस्तात् । (एकया) प्रथमांशमृत्तिकया ।

(आनाभिपादान्तम्) नाभिमारभ्य चरणावधिकम् ॥

वारुणस्नाने मलस्नानक्रममाह (अन्यया) इति । (अन्यया)

द्वितीयांशमृत्तिकया । (सकृत्) एकवारम् । सकृत् सहैकवारे च

इत्यमरः । (अस्त्राभिमन्त्रितया)

p. 33)

अस्त्राभिजप्तया शिवास्त्रभावितयेति यावत् । (अशेषम्) स्मस्तम् ।

(अङ्गम्) शरीरम् । (आलिप्य) आसमन्तात् लेपनं विधाय । (पूर्वास्यः)

पूर्वदिङ्मुखः । (षण्मुख्या वदनादिकं विधाय) इत्यत्र

चक्षुश्श्रोत्रनासि-

(षण्मुख्या) षण्मुखीमुद्रया । एतल्लक्षणमुक्तं

श्रीमत्सिद्धान्तशेखरे अङ्गु * योजयेत् ॥ इति । (वदनादिकम्) वदनं

मुखं आदिर्यस्य तत्तथोक्तम्। आदिपदेन कर्णचक्षुर्नासिका
विवक्षिताः (पिधाय) आच्छाद्य। इति पाठान्तरम्।

कापिधानं विवक्षितम्। तथा श्रीमत्सिद्धान्तशेखरे
अङ्गुष्ठाभ्यामुभौ कर्णौ तर्जनीभ्यामथाषिणी (-क्षिणी ?)।
मध्यमाभ्यां निबध्नीयान्नासिकायुगलं दृढम्॥
षण्मुखीकरणं ह्येतत् स्नानकर्मणि योजयेत्। इति। (भास्वरम्)
कालानलवत् देदीप्यमानम्। अस्त्रमन्त्राभिजप्तमृत्तिकालेपन-

p. 34)

पूर्वकस्नानं वारुणस्नाने मलस्नानमिति निगद्यते।
तनाऽभिहितं श्रीमत्सोमशंभुचरणैः अस्त्राभिजप्तयाऽऽलिप्य
दीप्तया सर्वविग्रहम्। निरुध्याक्षिणी प्राणिभ्यां प्राणान्
संयम्य वारिणि। निमज्यासीत हृद्यस्त्रं स्मरन् कालानलप्रभम्।
मलस्नानं विधायेत्थम् इति॥

ततः किं करणीयमित्याशङ्का
अस्त्रसन्ध्योपासनाविधिमभिधत्ते (ततः) इति। (ततः)
मलस्नानानन्तरम्। द्विजशब्दस्तावत्
वागीश्वरीगर्भसंयोजनसंजननादिसंपन्नद्विजत्वयुक्तदीक्षि-
तजनवाचकः। नत्वत्र पुनरुपनीतलमात्रयुक्तः स्मार्तो

द्विजशब्देनेष्टः अदीक्षितानां

शैवतन्त्रसंसिद्धाचारानधिकारात् प्रत्युत प्रत्यवायश्रुतेः।

तस्मात् द्विजशब्देन शिवदीक्षा संपन्ना विप्रक्षत्रियवैश्याः

प्रदर्शिताः। यदाह श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारः

ब्राह्मणादित्रयं स्मार्तसन्ध्यावन्दनानन्तरं

p. 35)

पारमेश्वरमस्त्रं शास्त्रोक्तक्रमेण ध्यायेत् इति। (प्रथमम्)

पूर्वम्। (ब्राह्मीम् वैदिकीम्।

वेदसिद्धैरापोहिष्ठादिमन्त्रैसम्नातमार्जनविधिमिति यावत्।

एवमुक्तं श्रीमन्मृगेन्द्रवृत्तिकारैः। तथा श्रीमत्सुप्रभेदे

आपोहिष्ठेति संप्रोक्ष्य सावित्र्याचोदकं क्षिपेत् इति। (पश्चात्)

वेदसिद्धसूक्ष्मसन्ध्यावन्दनानुष्ठानानन्तरम्।

(अस्त्रसन्ध्याम्) अस्त्रमुद्दिश्य सन्ध्या अस्त्रसन्ध्या ताम्। तथा

अस्त्रमुच्छिश्यं या सन्ध्या साऽस्त्रसन्ध्या प्रकीर्तिता इति।

एवकारेण पारमेश्वरसन्ध्यायाः प्राधानं प्रतिपाद्यते। तथा

श्रीमद्बृहत्कालोत्तरे वैदिकीन्तु पुरः कृत्वा पश्चात्छैवीं

समाचरेत्। भौतिको नैष्ठिक स्तद्वत् ब्राह्मीं कुर्यात् पुरा न वा॥

शैवी तु नियमेनैव संध्या पतनमन्यथा। इति। (उपास्यात्) वन्देत।

(तत्सन्ध्यार्थम्) अस्त्रसन्ध्यायै। (जलबिन्दून्)

p. 36)

जलकणात्। (निक्षिप्य) प्रकीर्य। (अनेनैव) अस्त्रमन्त्रेणैव। अत्र
शूद्रस्तु ब्राह्मीं सन्ध्यां विहाय शैवी कुर्यादिति बोद्धव्यम्।
तथा श्रीमत्कामिके नित्यादित्रितयं कार्यं चतुर्भिरविशेषतः।
वैश्वदेवं तथा सन्ध्यां शूद्रस्त्यक्त्वा त्रयीमयीम्। इति तथा च
।

* पा- समभ्यसेत्॥ स्तावत्॥

२५ स्मृतिकौमुद्यां यश्च आगमदीक्षाविधियुक्तस्य पुंसः
श्रुतिस्मृत्यविरुद्ध आगमोक्त एव सन्ध्याविधिः श्रूद्रस्य च सोऽस्तु।
न तु श्रौतः स्मार्तो वा शूद्रस्य श्रुतिस्मृतिक्रियास्वनधिकारात्
आगमेष्वेवाधिकारः इति॥

इदानीं अस्त्रसन्ध्यामुपास्याथ विधिस्नानं समाचरेत् इति
श्रीमत्सोमशंभुवचनेन विधिस्नानक्रममाह (पुनः) इति।
(शेषमृद्भागम्) शेषः उपमुक्ताभ्यां उभाभ्यां
भागाम्यामवशिष्टः

p. 37)

तृतीय इत्यर्थः। स चासौ मृद्भागश्च तम्। संहिताशब्दस्तु

द्विशतिकालोत्तरदृशा मूलाद्यस्त्रान्तमन्वषट्कवाचकः।

सार्द्धत्रिशतिकादिदृशा मूलब्रह्माङ्गवाचकः। तथा च

श्रीमत्कामिके सब्रह्माङ्गशिशवश्शास्त्रे सहितेत्यभिधीयते इति।

अस्यास्तु पद्धतेः सार्द्धत्रिशतिमूलत्वात् तत्रैव(?) संहिता ग्राह्या

। एवं निर्धारितं सोमशंभुपद्धतिव्याख्याकारेण।

(नाभिदघ्नजलम्) नाभिप्रमाणोदकम्। (विभज्य) इति विभागं

विधाय पूर्वदक्षिणोत्तरदिक्स्थं कुले त्यर्थः। (पूर्वम्)

पूर्वदिङ्निष्ठमृद्भागम्। (ब्रह्मभिः)

ईशानादिपञ्चब्रह्ममन्त्रैः (दक्षिणम्) याम्यदिक्स्थम्। (मूलेन)

ॐ हां हौं शिवाय नमः इति मन्त्रेण (उत्तरम्) सौम्यदिग्वर्तिनम्।

(सकृत्) एकवारम्। (दिग्बन्धन कृत्वा) इति अस्त्रेण

जलगतविघ्नशमनाय दिग्विदिक्षु अस्त्राभिमन्त्रितमृदं

विक्षिप्येत्यर्थः।

p. 38)

(बाहुभ्रमणात्) भुजवेष्टनात्। (अवग्राह्य) इति

शिवतीर्थसीमार्थममृतीकरणाय च स्वशरीरतो

बाहुभ्रमणप्रमाणेन मूलमन्त्रेण स्नानोदकमावेष्ट्य

इत्यर्थः। (शिवतीर्थतत्) शिवतीर्थेन तुल्यम्। तेन तुल्यम् इति पतिः।

यद्वा शिवतीर्थवदिति शिवतीर्थसंयुक्तमित्यर्थः।

शिवजप्तमृदवगाहनेन अत्र जलं शिवतीर्थं जातमिति मन्तव्यम्।

तथा श्रीमत्सर्वज्ञानोत्तरे शिवजप्तेन भागेन

ततोऽभ्यावर्तयेज्जलम्। शिवतीर्थं भवेदेवं विधिस्नानेन

षण्मुख इति। अत्र शिवतीर्थविचिन्तनं

जलस्थितमत्स्यादिसेवासमुत्थदोषापशमनायेत्यवधेयम्। तथा

श्रीमत्सुप्रभेदे मत्स्यमण्डूकसर्पाद्यैरन्यैश्च जलजन्तुभिः।

सेवितन्तु जलं नित्यं तस्माद्दुष्टं विशेषतः॥

तद्दोषशमनार्थं तु शिवतीर्थं प्रकल्पयेत् इति। (विग्रहम्)

शरीरम्

p. 39)

(कुण्डायित्वा) इति ब्रह्मपञ्चकमुच्चरन् कायपापसंशोधनाय

मस्तकादिचर-

* पा ति यावत्॥

२६ णान्तं समालिप्येत्यर्थः। तथा श्रीमन्मतङ्गे

शिरोवदनहृद्गुह्यं ब्रह्मभिश्चालभेत् क्रमात् इति॥ तथा

श्रीमतपराख्ये ककुप्राची तु या प्रोक्ता तस्या नाथश्शतक्रतुः।

नियुक्तस्सर्वदेवानां नायकत्वेन वेधसा। न केवलमसौ तेषां

विघ्नानामपि नायकः। तेन तद्विग्गतेनास्मिन् विघ्नप्रोत्सारणं

भवेत्॥ सौम्या या तु ककुप्तस्यामीशानोऽमृतसंभवः।

शिवेनालोडितस्सोमः क्षणात् क्षरति केवलम्॥ तत्तीर्थममृतं यस्मात् तस्मिन् स्नातोऽमृती भवेत्। दक्षिणाशाधिपो धर्मस्सर्वपापापहारकः॥ तेन तद्दिग्गता या मृत् तत्स्पर्शादिनसः क्षयः इति॥ मन्त्रस्नानविधिमाचष्टे (ततः) इति। (ततः)

p. 40)

स्नानानन्तरम्। (सोमसूर्यौ) सोमश्च सूर्यश्च तौ। (शक्तिशिवौ) शक्तिश्च शिवश्च तौ। चकारस्समुच्चयार्थः। (सञ्चिन्त्य) इति। अत्र वामहस्तं सोमशक्त्यात्मकं दक्षिणहस्तं सूर्यशिवात्मकं भावयेदिति तात्पर्यम्। (वौषडन्तसंहितया) वौषडित्यन्ते यस्याः सा वौषडन्ता सा चासौ संहिता च तथोक्ता तया। संहिताशब्दार्थः पूर्वं व्याख्यातः। (कुंभकमुद्रया) इति। एतल्लक्षणमुक्तं मुद्रालक्षणे कुंभकमुद्रा सुश्लिष्टतर्जनीमूलगताङ्गुष्ठिकासङ्गतहस्ततलद्वयकन्यसाङ्गुलिरूद्ध्वविस्तारितपाणिद्वयानामिका स्नाने मन्त्राभिषेके कार्या इति। (अभिषिच्य) इत्यत्र मूलादिब्रह्माङ्गमन्त्रैरेकैकशोऽभिषेचयेत् इति तात्पर्यम्। तथा श्रीमत्कामिके

सूर्यसोमात्मकौ हस्तौ संयोज्य घटमुद्रया।

मूलमन्त्रादिकैर्मन्त्रैस्सेकः कार्यस्सकृत्सकृत् ॥ इति ।

p. 41)

तथा च श्रीचिन्त्यविश्वसादाख्ये चन्द्रार्करूपहस्ताभ्यां सेचयेत्
कुंभमुद्रया । वौषडन्तषडङ्गेन मूलेन ब्रह्मभिर्मुहुः इति ।
स्वरक्षार्थमविच्छिन्नविघ्नविध्वंसनाय च । अस्त्राभिमन्त्रितं
तोयं दिग्विदिक्षु विनिक्षिपेत् ॥ इति श्रीमत्सोमशंभुपद्धतिश्रुतेः
स्वरक्षार्थं दिग्विदिक्षु जलं विक्षिपेदित्याह (दिग्विदिक्षु) इति ।
दिशाश्च ककुभः विदिश्च दिङ्मध्याः दिग्विदिशः तासु क्लीनेऽव्य
यंत्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् इत्यमरः ।
विधिस्नानसमनन्तरकरणीयमाह

*पा मूलादिब्रह्माङ्गमन्त्राः । व्याख्यातमेतत् तथा ॐ हां
हौं शिवाय वौषडित्यादि ॥

पा- संहितामन्त्राणामेकैकेन अभिषेचयेदित्यर्थः ॥

(२७) (चक्रवर्ति) इति । (चक्रवर्त्युपचारेण) चक्रवर्ती सार्वभौमः
तस्य उपचारः शंखतूर्यादिमङ्गलध्वनिः

p. 42) तेन । तथा श्रीमत्कामिके

सुगन्धामलकाद्यैस्तु स्नायाद्राजोपचारतः।
राजवद्धेमपीठादिसंस्थितो हेमकुंभकैः॥

स्नात्वा निमज्जनार्थन्तु कुर्याच्छब्दैस्सुमङ्गलैः। इति
(सुगन्धामलकादिना) इति सुगन्धञ्च परिमलद्रव्यं आमलकञ्च
शुष्कधात्रिफलं सुगन्धामलके ते आदी यस्य तत् तथोक्तं तेन।
तैलादिरादिशब्दार्थः। तथा श्रीमद्वीस्तन्त्रे तैलगामलकं
युक्तमङ्गमालिप्य सर्वशः इति। चक्रवर्त्युपचारेणेत्युक्तेपि पुनः
सुगन्धामलकादिनेति वचनमामलकादेरवश्यंभावित्वं
विधिस्नानसमनन्तरकरणीयत्वञ्च दर्शयति। तथा समान्नातं
श्रीमन्मतङ्गे विधिस्नानसमनन्तरं तथोद्वर्तनकैः पश्चात्
सुगन्धामलकादिभिः। गायत्र्या मन्त्रितैर्मन्त्री
स्नायाच्छिवमनुस्मरन्॥ इति॥ (उत्तीर्य) उत्तरणं कृत्वा तीरं

p. 43) गत्वेति यावत्। ह्रस्वप्रासादस्तावत् ह्रस्वं बिन्दुगतं ज्ञेयम्
इति श्रुतेः बिन्द्वन्तव्याप्तिकप्रासादः। अस्त्र मन्त्रमिति केचित्। (तीर्थम्)
तीर्यते अनेनेति तीर्थं पूर्वं शिवतीर्थवद्विचिन्त्येति
प्रकल्पितशिवतीर्थमित्यर्थः। (उपसंहरेत्) संहारिण्या बिन्दुस्थाने
लयं नयेदित्यर्थः। तथा श्रीमत्सार्द्धत्रिशतिकायां

संहरेच्छिवतीर्थन्तु ध्यात्वा संहारमुद्रया इति ।

तदनन्तरकरणीय माह (ततः) इति । (ततः)

शिवंतीर्थोपसंहारानन्तरम् । (अङ्गलग्नजलम्) देहसंयुक्तं

जलम् । (अनार्द्रवाससा) शुष्कवस्त्रेण । वाससी

अधरांबरोत्तरासङ्गावित्यर्थः । तथा श्रीमज्ज्ञानरत्नावल्यां

स्नाने देवार्चने यागे भोजने च विपश्चिता । धौतवस्त्रद्वयं

धार्यमखण्डं सदशं सितम् ॥ नैकवस्त्रः क्रियाः

कुर्यान्नग्नः कौपीनकेवलः इति । (परिधाय) परिधृत्वा ॥

p. 44)

आचमनविधिः ॥

(क्रि) (७) बद्धचूडः प्रागास्य उदगास्यो वा अनावृतशिरा आसीनः

केनबुद्बुदरहितेन वीक्षितेनाऽम्भसा ओम् हां आत्मतत्वाय

स्वधा ॐ हीं विद्यातत्वाय स्वधा, ॐ हूं शिवतत्वाय स्वधा, इति

प्रत्येकं पाणिं प्रक्षाल्य, ब्रह्मतीर्थेनाचम्य,

ओष्ठावङ्गुष्ठमूले-

-

* पा नीजमिति ॥ * पा योगे ॥

(२८) नास्त्रेण द्विः परिमृज्य, हस्ततलेनाधोमुखं सकृत् परिमृज्य,
अङ्गुष्ठानामिकाभ्यां मुखनासिकाक्षिकर्णविवराणि
नाभिहृदंसद्वयशिसंसि दक्षिणवामक्रमेण हृदा संस्पृश्य,
आचमनं भवति ॥ (७)

(प्र) अथ वारुणस्नानक्रममुपवर्ण्य
सकलकर्माङ्गमाचमनविधिमाचष्टे (बद्धञ्चूडः) इत्यादिना
(भवति) इत्यन्तेन। (बद्धचूडः) बद्धा ग्रथिता

p. 45)

चूडा शिखा येन स तथोक्तः। शिखा चूडा केशपाशी इत्यमरः।
(प्रागास्यः) पूर्वदिङ्मुखः। (उदगास्यः) उत्तरदिङ्मुखः।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः इत्यमरः।
(अनावृतशिराः) आवृतं शिरोवेष्टनेनाच्छादितं न भवतीति
अनावृतं शिरः मूर्धा येन स तथोक्तः। (आसीनः) समुपविष्टः।
[फेनबुद्बुदरहितेन] फेनश्च डिण्डीरः डिण्डीरोऽब्धिकफः
फेनः इत्यमरः। बुद्बुदश्च जलस्फोटः फेनबुद्बुदौ ताभ्यां
रहितं शून्यं तेन। (वीक्षितेन) विलोकितेन। (ओम् हाम्) इत्यादि।
आत्मतत्वादिबीजानि तु हृदयशिरश्शिखाबीजानि। तथा
श्रीमरामनाथपद्धत्यां हृत् पूर्वमात्मतत्वाय स्वधेति

चुलुकं पुरा। पिबेन्निरीक्ष्य निश्शब्दं ब्रह्मतीर्थेन हृद्गतम्।

अवं शिरश्शिस्वापूर्वमन्यतत्वद्वयेन तु इति। अत्रत्य स्वधाशब्दः

सरस्वतीवाचकः। तदुक्तं स्वधा या

p. 46)

स्वः स्वयं भूयात् तन्मेधा सा सरस्वती। स्वधा जातिस्ततो योज्या

वाणीशुद्ध्यर्थमर्थतः॥ इति। (इति) एवम्। (ब्रह्मतीर्थेन)

अङ्गुष्ठमूलगतोदकेन। तथोदीरितं श्रीमत्सोमशंभुचरणैः

ब्राह्ममङ्गुष्ठमूलस्थम् इति। (आचम्य) इति। अत्र

निरङ्गुष्ठकनिष्ठकमाचमेदिति बोध्यम्। तथा दक्षपाणितले

कृत्वा मुक्ताङ्गुष्ठकनिष्ठिके। सोमरूपं सिते पक्षे

कृष्णेत्वकर्मात्मकं स्मरेत्॥ आत्मविद्या शिवैस्तत्त्वैस्स्वधान्तैः

प्रणवादिकैः इति। (ओष्ठौ) उत्तराघोरदनच्छदौ। ओष्ठाधरौ तु

रदनच्छदौ दशनवाससी इत्यमरः। (द्विः) द्विवारम्।

(अङ्गुष्ठानामिकाभ्याम्) इति। अत्र अङ्गुष्ठ ईशानरूपः

अनामिका अमृतकलात्मिका। तथा श्रीमत्पराख्ये

भवेदीशस्सदाऽङ्गुष्ठोऽनामानामामृता कला।

तयाऽमृतात्मना देवा अमृततृप्तास्त्वनामया इति।

(मुखनासिकाक्षिकर्णविवराणि)

p. 47)

मुखञ्च वक्त्रं नासिके च घ्राणे अक्षिणी च नयने कर्णौ च श्रोत्रे
मुखनासिकाक्षिकर्णाः एतेषां विवराणि सुषिराणि बिलानि ।
(२९) सुषिरं बिवरं बिलम् इत्यमरः । (नाभिहृदंसद्वयशिरांसि)
नाभिश्च निम्नप्रदेशः हृच्च हृदयं अंसद्वयं च
स्कन्धयुगलम् । स्कन्धो भुजशिरोऽस्सोऽस्त्री इत्यमरः । शिरश्च
मुर्द्धा तानि । (दक्षिणवामक्रमेण) पूर्वं दक्षिणपार्श्वं
पश्चात् वामभागं संस्पृशेदित्यर्थः ॥

अशक्तस्य गृहस्नानविधिः ॥

(क्रि) (८) यद्वा गृहेऽपि पूर्ववन्मृदादिभिः स्नात्वा, वस्त्रपूततोय
परिपूर्णैर्नवभिरष्टभिः पञ्चभिर्वा
कुंभैश्शिवमन्त्रप्रकल्पितैः स्नायात् ॥ (८)

(प्र) अथ आचमनविधिं प्रतिपाद्य नदीसङ्गमादि
स्नानाशक्तानां गृहस्नानविधिमतिदिशति (यद्वव) इत्यादिना
(स्नायात्) इत्यन्तेन । (यद्वा) नदीसङ्गमादिस्नानं

p. 48)

नोचेत् नदीसङ्गमादिस्नानेन तुल्यम् । (वस्त्रपूततोयपरिपूर्णैः)
वस्त्रपूतानि पटपवित्राणि पटपरिगलितानीति यावत् । तानि च तानि

तोयानि उदकानि तैः परिपूर्णाः परिपूरिताः तैः। (नवभिः)

नवसंख्यैः। वा शब्दे विकल्पवाची। (कुम्भैः)

सौवर्णादिघटैः) तथा श्रीमच्चिन्त्यविश्वे

मृत्कुम्भात्ताम्रकुंभेन स्नानं शतगुणं भवेत्।

ताम्राक्षतगुणं रौप्यं राजताद्धेमकं शतम्॥ इति।

(शिवमन्त्रप्रकल्पितैः) शिवमन्त्राभिमन्त्रितैः॥

कापिलस्नानविधिः॥

(क्रि) (९) वारुणस्नानाशक्तो यथाशक्त्याऽऽमलं कट्यधः पादौ

वा प्रक्षाल्य, अप्रक्षालितं शिष्टमङ्गमार्द्रवस्त्रेणोन्मृज्य,

अस्त्रेण हुंफडन्तेन पादाङ्गुष्ठोत्थितवद्विना

शरीरगतबाह्यमलगात्रं दग्ध्वा,

क्षुब्धशक्तिपरिस्त्रुतशुद्धतोयेनाप्लाव्य, संहितामेकवारं जपेत्॥

(९)

p. 49)

(प्र) अथ वारुणस्नानविधिं निरूप्य, तदशक्तानां

स्नानाशक्तस्तु यो मर्त्यः कापिलस्नानमाचरेत्। आर्द्रवस्त्रेण

मूर्द्धादिमार्जनं कापिलं स्मृतम्॥ इति वचनं हृदि निधाय

कापिलस्नानप्रकारं दर्शयति (वारुण) इत्यादिना (जपेत्) इत्यन्तेन।

(वारुणस्नानाशक्तः) वारुणं वारिणा स्नानम्। तथा
श्रीमृगेन्द्रे वारुणं वारुणस्नानम् इति। तच्च तत् स्नानं
आप्लावनं तस्य अशक्तः रोगादिना
वारिभिरापादमस्तकमाप्लावयितुं असमर्थ इत्यर्थः। (आगलम्)
आकण्ठम्। (कट्यधः) श्रोण्यधस्तात्। (पादौ) चरणौ। वा शब्दो
विकल्पवाची। (शिष्यम्) प्रक्षालितशरीरावशिष्टम्। (आर्द्रवस्त्रेण)
जलसंसिक्तपटेन। (पादाङ्गुष्ठोत्थितवह्निना) पादाङ्गुष्ठः
दक्षिणचरणाङ्गुष्ठः तस्मादुत्थितः उत्पन्नः स चासौ वह्निश्च
अग्निः तेन। (शरीरगतबाह्यमलमात्रम्)

p. 50)

शरीरगतबाह्यमलः श्रोत्रनेत्रादिसंभवमलः। तथा
श्रीमच्छिवधर्मोत्तरे कर्णाक्षिनासिकाजिह्वादन्तशिश्नगुदन्नखः
। मलाश्रयाः कफस्वेदौ विण्मूत्रे द्वादश स्मृताः॥

इति अत्रत्यमात्रशब्दः कात्स्न्र्यार्थः यावावशरीरगतत्वाह्यमलः
तावन्तमित्यर्थः। कल्पे अकल्पे च परिमाणे स्यान्मात्रं
कात्स्न्र्येऽवधारणे इत्यमरः। (दग्ध्वा) दहनं कृत्वा।
(क्षुब्धशक्तिपरिस्रुतशुद्धतोयेन) क्षुब्धा
उच्चारितमूलमन्त्रक्षोभिता सा चासौ शक्तिः कुटिलाशक्तिः तस्याः
परिस्रुतं परितो निष्यन्दितं तच्च तत् शुद्धतोयं अमृतं तेन॥

आग्नेयस्नानविधिः ॥

(क्रि) (२०) अथ भस्मस्नानंविधिर्यथा कल्पादि सिद्धं भस्म
समादाय, संहितयाऽभिमन्त्रयेत्। अकल्पन्तु
निवृच्यादिकलामन्त्रैस्संशोद्धय, संहितया

p. 51)

चाभिमन्त्रय, अस्त्रबीजेन मूर्द्धनं आरभ्य पादपर्यन्तं
भस्मरजोमुक्तदक्षिणहस्तस्पर्शनेन मलस्नानं कृत्वा, ईशानेन
शिरः तत्पुरुषेण वक्त्रं अघोरेण हृदयं वामदेवेन गुह्यं
सद्योजातेन पादौ अंसक्रयं सर्वाङ्गानि च त्रिपुण्ड्रादिभिः
प्रत्यङ्गमस्त्रेण कर्महस्तशुद्धिं स्मरन्नुद्धूल्य
शेषभस्मना ब्रह्मभिर्मूलेन शिरस्यभिषेचयेत्। ततः
पूर्ववदाचमेत्॥ (२०)

(प्र) अथ कापिलस्नानविधिमुदीर्य, आग्नेयस्नानविधिमुदाहर्तुं
प्रतिजानीते (अथ) इत्यादिना (यथा) इत्यन्तेन। (अथ)
उक्तस्नानान्यतमस्नानानन्तरम्। अन्यथा भस्मस्नाने नाधिकारो
यतः। तथा श्रीमन्मतङ्गे एवं सकृद्यथाशक्ति स्नातोऽम्भसि
दिने दिने। भस्मस्नानेऽधिकारी स्यान्नान्यथा मुनिपुङ्गवः॥ इति।

एतन्न सर्वथा वारुणस्नानपूर्वकत्वनियमाय। अपि तु
यथाशक्त्युपदेशात् सामर्थ्यापेक्षया
जलस्नानपूर्वकत्वमतत्पूर्वकत्वं

p. 52)

वा ज्ञापयितुमुक्तम्। (२२) श्रीमत्किरणादौ जलस्नानं विनापि
पाक्षिकभस्मस्नानानुज्ञानात्। श्रीमत्स्वायंभुवे च
आग्नेयस्नानमपरं भस्मस्नानमुदाहृतम्। जलस्नानोत्तरं
नित्यमनुत्तरमथापि वा॥ इति स्पष्टमेतोक्तत्वात्। तथा च
श्रीमन्मतङ्ग एव समनन्तरमुक्तं भूयोभूयोऽम्भसि स्नानं
सेवमानस्य रुग्भवेत्। तस्मात् तत् सततं नेष्टमिष्टमाग्नेयमुच्यते
॥ इति। एवं चात्यन्तरोगिण आतुसदेः जलस्नानावप्रेक्षमेव
भस्मस्नानं नित्यं अन्यस्व तु स्वशक्त्यपेक्षयेति बोध्यम्। तथा
श्रीमन्निश्वासोत्तरे वारिणा तु सकृत् स्नात्वा त्रिसन्ध्यं भस्मना
पुनः। स्नायादथातुरो नित्यं इति। (भस्मस्नानविधिः)
भस्मस्नानं त्रिपुंड्रादिभिरुद्धलनम्। यद्वक्ष्यति
त्रिपुंड्रादिभिः प्रत्यङ्गमस्त्रेण कर्महस्तशुद्धिं
स्मरन्नुद्धूल्य इति। तस्य

p. 53)

विधिः विधानम्। विधिर्विधाने दैवेऽपि इत्यमरः। स्नानमत्र

शुद्धत्वमेव न तु जल इव विमज्जनासंभवात्। (यथा) यथा

स्पष्टं तथोच्यते। तत् कथमित्याह (कल्प) इत्यादिना (अभिषेचयेत्)

इत्यन्तेन। (कल्पादिसिद्धम्) कल्पः मुख्यः। मुख्यस्स्यात् प्रथमः

कल्पः इत्यमरः। आदिः यस्य तत् कल्पादि तेन सिद्धं समुत्पन्नम्।

अमुकल्पादिसदिशब्दार्थः। तथा श्रीमद्वल्लाशभुपद्धतौ

आग्नेयं भस्मना कुर्याद्भुक्तिदं मुक्तिदं नृणाम्। संस्कृतेन

विशुद्धेन तच्च भस्म चतुर्विधम्। कल्पन्तदनुकल्पाख्य

मुपकल्पमकल्पकम्। पूर्वं पूर्वं गुणोत्कृष्टम् इति।

कल्पलक्षणमुक्तं श्रीमत्पौष्करे

अभूतलनिसृष्टेन कपिला गोमयेन तु।

सद्योजातगृहीतेन सितस्य वृषभस्य वा॥

स्थापितेनान्तरिक्षे तु वामदेवेन धीमता।

p. 54)

शुष्केण सञ्चितेनाथ विधिवद्बहुरूपिणा॥

शिवानलप्रदीप्तेन वक्त्रेण तु यथाविधि।

निवाते श्वभ्रदग्धन्तु ईशानेन समाहरेत्॥

इति । अनुकल्पोपकल्पलक्षणं तत्रैवावधार्यताम् । (भस्म)
निष्कादिमानं परित्यक्तक्रव्याकांशं श्वेतं भसितमित्यर्थः ।
(समादाय) वामहस्ते सङ्गृह्येत्यर्थः । तथा भसितं
धूम्रवर्णं च रक्तं पीतं च वर्जयेत् । धारयेद्भसितं
श्वेतं सर्वपुण्यफलप्रदम् ॥ इति । तथा च श्रीमत्सूक्ष्मे

विभूतिं वामहस्ते च सव्यहस्तेन मन्त्रयेत् ।
असुरांशं त्यजेद्धीमान् द्वात्रिंशैकांशराक्षसम् ॥

निष्कं निष्कार्द्धकं चैव द्वयं द्वयार्धकं तथा इति ।
भस्मपदनिर्वचनं प्रदर्शितं श्रीमत्कामिके

भासयत्येव यद्भस्म शुभं भासयते च यत् ।
भर्त्सनात् सर्वपापानां भस्मेति परिगीयते ॥

इति । यद्यकल्पं तर्हि शुद्धिपूर्वं ग्राह्यमित्याह

p. 55)

(अकल्पम्) इति । अकल्पलक्षणमुपलक्षितं श्रीमदजिते
पूर्वोक्तविधिमुत्सृज्य केवलं भस्मसाधनम् । अन्यैसपादितं
भस्म अकल्पकमिति स्मृतम् ॥ इति । तुशब्दः

पूर्वस्माद्वैषम्यद्योतकः। (निवृत्त्यादिकलामन्त्रैः) निवृत्तिः
आदिर्यासान्ताः निवृत्त्यादयः ताश्च ताः कलाश्च तासां मन्त्राः
तैः। प्रतिष्ठादिरादिपदेन प्रकाश्यते। तथा
श्रीमद्वरुणपद्धत्यां निवृत्तिश्च प्रतिष्ठा च विद्या
शान्तिस्तथैव च। शान्त्यतीता कलाः पञ्च इति। (संशोध्य) इति। अस्य
हि औत्पत्तिकशुद्ध्य योगान्निवृत्त्यादिभिः शुद्धिसभाव्येत्यर्थः।
अत्र वौत्पतिकशुद्धियोगिना त्रिविधेन भस्मना अकल्पेन वा स्नयादिति
भावः। भस्मस्नाने मलस्नानमाह (अस्त्र) इति। (अस्त्रबीजेन) ॐ हः इति
शिवास्त्रबीजेन एवमुक्तं श्रीमत्सार्द्धत्रिशतिवृत्तिकृता।
(भस्मरजोयुक्तदक्षिणहस्तस्पर्शनेन) भस्मरजांसि
विभूतिपांसवः

p. 56)

तैर्युक्तः स चासौ दक्षिणहस्तश्च तस्य स्पर्शनं
निखिलाङ्गनिघर्षणं तेन। अनेन देहस्था विघ्ना निरस्ता
इत्यवधेयम्। तथा

तेन स्नायात् पवित्रेन भस्मना करजेन च।
शस्त्रोच्चारान्मलस्नानं निखिलाङ्गनिघर्षणम्॥

अङ्गस्थानि च विघ्नानि विनाशं यान्ति शस्त्रतः।

इति । तत्र विधिस्नानमाह (ईशानेन) इति ।

(वक्त्रम्) ललाटम् । (हृदयम्) वक्षः । हृदयं चित्तवक्षसोः इति नानार्थरत्नमाला । गुह्यशब्दो नाभिवाचकः । (पादौ) जानुनी । (सर्वाङ्गानि) इति । कूर्परादिस्थानानीत्यर्थः । तथा श्रीमच्चिन्त्यविश्वसादाख्ये विद्यात्तु षोडशस्थाने त्रिपुण्ड्रञ्च समाहितः । शीर्षे चैव ललाटे च कण्ठे चांस द्वयोरपि ॥ कूर्परे मणिबन्धे च हृदये नाभिपार्श्वके । पृष्ठे चैव प्रतिस्थानं जङ्घे इति । (त्रिपुण्ड्रादिभिः) त्रयाणां पुण्ड्राणां तिलकभेदानां

p. 57)

समाहारः त्रिपुण्ड्रं तत् आदिः येषां ते तथोक्ताः । पुण्ड्रो देशेषु तिलकभेदे कृम्यतिमुक्तयोः इति नानार्थरत्नमाला । एतल्लक्षणं यथा ललाटे हृदि बाह्वोश्च षडङ्गुलन्तु दैर्घिकम् । शेषमेकाङ्गुलं प्रोक्तं त्रिपुण्ड्रं सर्वसन्धिषु इति । तिलकादिरादिशब्दार्थः । तथा श्रीमत्पौष्करे यतिरुद्धूलनेनैव स्नायाद्वा सुसमाहितः । गृही यथाङ्गमारभ्य तिलकैर्वा त्रिपुण्ड्रकैः ॥ इति । (कर्महस्तशुद्धिम्) कर्महस्तः भस्मधारणक्रियाप्रवृत्तः दक्षिणकरो वामकरश्च तस्य

शुद्धिः ताम्। तथा श्रीमन्मतङ्गे

यदगम्यं दक्षिणस्य तद्वामेन तु पाणिना।
सम्यगुद्धूलयेच्चाङ्गं स्पृष्ट्वाऽन्योन्यं करावुभौ॥

इति। ततः किं कुर्यादित्याह (शेष) इति। (शेषभस्मना)
धारितावशिष्टभस्मना। (अभिषेचयेत्) ॐ हां हौं शिवाय
स्वाहां इत्यभिषेचनं कुर्यादित्यर्थः।

p. 58)

एतदाग्नेयस्नाने मन्त्रस्नानमित्युच्यते। तथा समाम्नातं
श्रीमत्सोमशंभुचरणैः

सद्योजातादिभिर्मन्त्रैरंभोभिरभिषेचनम्।
मन्त्रस्नानं भवेदेवं वारुणाग्नेययोरपि॥

इति। अथ भस्मस्नानविधिमभिधाय आचमनं कुर्यादित्याह (ततः)
इत्यादिना (आचमेत्) इत्यन्तेन। (ततः) भस्मस्नानानन्तरम्॥

मानसस्नानविधिः॥

(क्रि) (२२) मनसा मूलमन्त्रं नादान्तमुच्चरन्
क्षुब्धशक्तिपरिस्रुतवहुलामृतधाराभिः
स्नातनुमन्तबर्हिरभिषिक्तां भावयेत्। इति मानसं स्नानं
सर्वत्र विधेयम्॥ (२२)

(प्र) अथ मानसस्नानविधिमाह (मनसा) इत्यादिना (विधेयम्)
इत्यन्तेन। (नादान्तम्) नादान्तकलाव्याप्तिकम्।
(क्षुब्धशक्तिपरिस्रुतबहुलामृतधाराभिः) क्षुब्धा
नादान्तोच्चारित मूलमन्त्रक्षोभिता

p. 59)

सा चासौ शक्तिः कुटिलाशक्तिः तस्याः परिसुताः निष्ठ्युताः।
बहुलामृतधाराः प्रचुरामृतप्रवाहाः ताभिः। (स्वाम्)
स्वात्मीयाम्। (अभिषिक्ताम्) आप्लाविताम्। तथा
मूलमन्त्रपरिक्षुब्धशक्तिपीयुषधारया।
सबाह्याभ्यन्तरासेकान्मानसं स्नानमाचरेत्॥ इति।
मानसस्नानन्तावत् मनसा मूलमन्त्रस्मरणपूर्वकमुक्तवत्
शाक्तजलौघाप्लवनतः शाक्तं स्नानमिति कल्प्यते। तथा
श्रीमन्मृगेन्द्रे मानसं शाक्तम् इति। (सर्वत्र) इति सर्वस्मिन् काले
अशुचिशंकायामित्यर्थः। (विधेयम्) कर्तव्यम्॥

दिव्यादिस्नानविधिः ॥

(क्रि) (२२) दिव्यादीनान्तु नैमित्तिकत्वात् ततन्निमित्तोपस्थाने विदध्यात् ॥

(२२)

(प्र) अथ मानसस्नानविधिं व्याहृत्य दिव्यादीनां नैमित्तिकत्वात्

विहितकाले कर्तव्यतामाह

p. 60)

(दिव्य) इत्यादिना (विदध्यात्) इत्यन्तेन । (दिव्यादीनाम्) दिव्यं

महेन्द्रस्नानं आदिः येषां तानि दिव्यादीनि तेषाम् । आदिपदेन

भौमाद्युच्यते । तथा श्रीमन्मृगेन्द्रे वारुणं तैजसं

भौममानिलं दिव्यगौरवे । मानसं चेति संक्षेपात् इति ।

दिव्यलक्षणञ्च तत्रैवोक्तं पुण्यां सार्दातपां वृष्टिं

विभृयाच्छिवमुच्चरन् इति । पुनरवशेषस्नानलक्षणं तत

एवावधार्यम् । (नैमित्तिकत्वात्) विमित्तमूलकत्वात् ।

(तत्तन्निमित्तोपस्थाने) तानि तानि विमित्तानि सार्दातपवृष्टयादीनि

ततन्निमित्तानि तेषां तेषामुपस्थानं संप्राप्तिः तस्मिन् ।

(विदध्यात्) कुर्यात् । तत्तन्निमित्तोपस्थान इत्यनेन

दिव्यादिस्थानचतुष्टयं नैमितिकमिति दर्शितम् । तथा चोक्तं

श्रीमद्ब्रह्मशंभुपादैः माहेन्द्रादिचतुष्कन्तन्नैमित्तिकमिति

स्मृतम् इति । माहेन्द्रं दिव्यस्नानम् ॥

p. 61)

सकलीकरणविधिः ॥

(क्रि) (२३) ततस्सकलीकरणं कुर्यात् । ॐ हः अस्त्राय फट्, इति
दक्षिणवामहस्तावूर्ध्वाधः क्रमेण संशोध्य, ॐ हौं
शक्तये वौषट्, इत्याप्लाव्य, ततो हस्ततलयोरङ्गुष्ठाभ्यां, ॐ
हां शिवासनाय नमः, ॐ हां हं हां शिवमूर्तये नमः, इति
विन्यस्य, ॐ हों ईशानमूर्द्धाय नमः,
इत्यङ्गुष्ठयोस्तर्जनीभ्यां, अन्यासु
तर्पन्यादिकनिष्ठान्तमङ्गुष्ठाभ्यां, ॐ हें तत्पुरुषवक्त्राय
नमः, ॐ हुं अघोरहृदयाय नमः, ॐ हिं वामदेवक्त्राय?
नमः, ॐ हं सद्योजातमूर्तये नमः, तलयो, ॐ हां हौं
विद्यादेवाय नमः, अङ्गुष्ठाभ्यां
पुनर्मध्यमाङ्गुलीभिस्तिसृभिः , ॐ हौं नेत्रेभ्यो नमः,
सकलहस्तव्याप्तशक्तित्वेन मध्ये तद्व्यापकत्वेन
अङ्गुष्ठाभ्यां प्रासादमावाह्य, कनिष्ठादिकरशास्त्रासु, ॐ
हां हृदयाय नमः, ॐ हीं शिरसे नमः, ॐ हूं शिखायै
नमः, ॐ हैं कवचाय नमः,

p. 62)

ॐ हः अस्त्राय नमः, इति विन्यस्य, कवचेनावकुण्ठ्य, उभौ,
संयोज्य, वौषडन्तमूलेन परमीकृत्य,

हृद्यासनमूर्तीदक्षिणाङ्गुष्ठानामिकाभ्यां विन्यस्य,
ईशानमन्त्रं मूर्ध्नि मुष्टिं बद्ध्वा अङ्गुष्ठेन बिन्यस्य,
वक्त्रहृद्गुह्यपादप्रदेशेषु तत्पुरुषाघोर
वामदेवसद्योजातमन्त्रानङ्गुष्ठयुक्ततर्जन्याद्यङ्गुलिक्रमेण,
हृदि विद्यादेहमङ्गुष्ठानामिकाभ्यां, नेत्रमन्त्रं नेत्रेषु
मध्यमाङ्गुलीभिस्तिसृभिर्विन्यस्य, विशेषाधिष्ठात्त्वेन प्रासादं
देहे समावाह्य, हृदयशिरश्शिखास्थानेषु
हृदयशिरश्शिसामन्त्रान् साङ्गुष्ठकनिष्ठानामिका
मध्यमाभिः, कण्ठप्रावरणत्वेन स्तनमध्यान्तं
तर्जनीभ्यां वक्त्रं, हस्ततलयोरस्त्रमनामिकाभ्यां न्यस्य,
अस्त्रेण तालत्रयपुरस्सरं दिग्बन्धनं कृत्वा, कवचेनावगुण्ठ्य,
मूलेन वौषडन्तेन महामुद्रां दर्शयेत्।

p. 63)

इति ॥ (२३)

(प्र) अथ सकलीकरणक्रमविधिमतिदिशति (ततः) इत्यादिना (दर्शयेत्)
इत्यन्तेन। (ततः) मानसस्नानानन्तरम्। (सकलीकरणम्)

साङ्गन्यासकरन्यासम्। कथं सकलीकरणक्रम इत्याशङ्क्य एव?

पूर्वं करन्यासप्रकारमाह (ओं हः अस्त्राय फट्) इति।

(ऊर्ध्वाधःक्रमेण)

दक्षिणहस्ततलतत्पृष्ठवामहस्ततलतत्पुरुषपरिपाठोत्यर्थः।

(संशोध्य) इति। अग्निरूपेणास्त्रेण मणिबन्धपर्यन्तं दग्ध्वा

इत्यर्थः। (आप्लाव्य) वौषडन्तशक्तिमन्त्रेण। अमृताप्लावनं

विधान। तथा श्रीमत्क्रियाकरणमण्डनपद्धत्यां पाण्योस्तलं

च पृष्ठं च संशोध्यास्त्रेण देशिकः।

वौषडन्तपराशक्तिप्रासादेनामृताप्लवः॥ इति। तथा

श्रीमच्चिन्त्यनिश्वसादाख्ये अस्त्रतेजोऽन्वितौहस्तौ मणिबन्धावधि

स्मरन्। इति (हस्ततलयोः) दक्षिणवामकरोपरिभावयोः।

p. 64)

(अङ्गुष्ठाभ्याम्) दक्षिणवामाङ्गुष्ठाभ्याम्। (तर्जनीभ्याम्)

दक्षिणवामतर्जनीभ्याम्। (तर्जन्यादिकनिष्ठान्तम्) तर्जनी

आदिर्यस्य तत् तथोक्तं कनिष्ठा अन्ते यस्य तत्तथोक्तं तर्जन्यादिं च

तत् कनिष्ठान्तञ्च तथा। (मध्यमाङ्गुलीभिः)

तर्जनीमध्यमानामिकाभिः। (तिसृभिः) त्रित्वसंख्याकाभिः।

(सकलहस्तव्याप्तशक्तित्वेन) सकलहस्तयोः व्याप्ता व्यापिनी शक्तिः

यस्य स तथोक्तः तस्य भावस्तत्वं तेन। अत्र

यस्माद्दहनाप्लावनविधिना करतलौ शक्तिमयौ कृत्वा

अङ्गुष्ठादि करशाखासु ईशानादिब्रह्माणि विन्यस्य विद्यादेहोपि
विन्यस्तः ततः करतलयोः शाक्तत्वं जातमिति तात्पर्यम्। यद्वा
सकलहस्तव्याप्तशक्तित्वेनेत्यत्र कलाभिस्सहितौ सकलौ, सकलौ च तौ
हस्तौ च सकलहस्तौ तयोः व्याप्ता शक्तिरीशान्यादिरूपा तथोक्ता
तस्या भावतत्वं तेन। (मध्ये)

p. 65)

करतलान्तरे। (तद्व्यापकत्वेन) तस्या विद्या देहस्यायाश्शक्तिः
व्यापकः अधिष्ठाता तस्य भावस्तत्वं तेन। तथा
श्रीमत्सर्वज्ञानोत्तरे शाक्तौ कर-

* पा- हस्तव्याप्तशक्तिमध्ये॥

(२६) तलौ कृत्वा इति। तथा श्रीमत्कालोत्तरे कराङ्गुलिषु सर्वासु
प्रासादं विन्यसेत्ततः इति (प्रासादम्) शिवमन्त्रम्। (आवाह्य)
विन्यस्य। (कनिष्ठादिकरशाखासु) कनिष्ठा आदिर्यासान्ताः
कनिष्ठादयः ताश्च ताः करशाखाः अङ्गुलयः अङ्गुल्यः
करशाखास्स्युः इत्यमरः। तासु। अनामिकादिरादिशब्दार्थः। कानि
विन्यसेदित्याकांक्षायामाह (ॐ हां हृदयाय नमः) इत्यादि।
ननु हृदाद्यन्ते नमस्स्वाहा वषधुं? वौषडित्यपि। फट्
चण्डेश्वरमन्त्रान्ते तद्वदेव हरोऽब्रवीत्॥ इति

श्रीमन्मृगेन्द्रश्रुतेः हृदयादिषडवयवाः स्वधानमस्स्वाहा

वषढादिजातिषट्कसंयुक्ता भवन्ति कथमत्रते

p. 66)

सर्वे नमोऽन्ताः प्रयुक्ताः ? सत्यं षडङ्गानि

प्रणवादिनमोऽन्तानि च सन्ति । यदाह

श्रीमद्विंशतिकालोत्तरवृतिकारः एषां चाद्यन्तयोः

प्रणवनमस्कारप्रसङ्गः । श्रीमन्निश्वासादावुक्तः

ॐकारपूर्वका मन्त्रा नमस्कारान्तयोजिताः इति ।

काम्यकर्मविधाने तु नमस्स्वाहेत्यादिजातिषट्कयुतानुच्चरेत् इति

श्रीमन्मृगेन्द्रपद्धतिव्याख्याने मन्त्रोद्धारप्रकरणे

व्याख्यातः इति । (उभौ) दक्षिणवामहस्तौ । (परमीकृत्य) इति ।

करतलविन्यस्तमन्त्राणां मूलमन्त्रमयेन शिवेन

सार्द्धमैक्यं विधायेत्यर्थः । तथा श्रीरामनाथपद्धत्यां

आवेष्टय तर्जन्याङ्गानां परमीकारमङ्गिना । शिवेन इति ॥

करन्यासविधिमुक्त्वा अङ्गन्यासप्रकारं वक्ति (हृदि) इति ।

(आसनमूर्त्तौ) आसनं च शिवासनं मूर्तिश्च

पादतलप्रभृतिसकलशरीरव्यापिका तेजोरूपा शिवमूर्तिः ते ।

(अङ्गुष्ठयुक्ततर्जन्याद्यङ्गुलिक्रमेण)

p. 67)

अङ्गुष्ठेन युक्ता अङ्गुष्ठयुक्ता सा चासौ तर्जनी च सा

आदिर्यासान्ताः अङ्गुष्ठयुक्ततर्जन्यादयः। ताश्च ताः

अङ्गुलयश्च तस्याः क्रमः परिपाटिः तेन। अत्र

अङ्गुष्ठयुक्ततर्जन्या मुखे तत्पुरुषमन्त्रं

अङ्गुष्ठयुक्तमध्यमया हृदि अघोरमन्त्रं

अङ्गुष्ठंयुक्तानामिकया नाभौ वामदेव? मन्त्रं,

अङ्गुष्ठयुक्तकनिष्ठया जान्वोः सद्योजातमन्त्रं,

विन्यसेदित्यवधेयम्। (विद्यादेहम्) ईशानादिब्रह्म समष्टिरूपं

पञ्चवक्त्रादिविशिष्टं सकलशरीरव्यापकं निग्रहमित्यर्थः।

(नेत्रेषु) दक्षिणवामललाटनेत्रेषु। (विशेषाधिष्ठातृत्वेन) इत्यत्र

ब्रह्माणन्तु मूर्तित्वेनाधिष्ठेयत्वात् नेत्रस्य व तदन्तर्गतत्वात्

अधिष्ठातृभूतं शिववाधकं (२७) प्रासादं

समस्तशरीरव्यापकत्वेन समावाहयेदिति * * *? तथोक्तं

श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण। (देहे) हृदये इत्यर्थ।

(समासृत्य?) इति। अङ्गुष्ठानामिकाभ्यां

p. 68)

विन्यस्येत्यर्थः। तथा श्रीमत्क्रियाकरणमण्डनपद्धत्यां

अङ्गुष्ठानामिकाभ्यां तु मूलं न्यस्य हृदन्तरे इति।

(साङ्गुष्ठकनिष्ठानामिकामध्यमाभिः) अङ्गुष्ठेन सह

वर्तन्ते इति साङ्गुष्ठाः ताश्च ताः कनिष्ठानामिकामध्यमाः
ताभिः। अत्र अङ्गुष्ठयुक्तकनिष्ठया हृदि हृदयं अङ्गुष्ठयुक्ता
नामिकया शिरसि शिरोमन्त्रं अङ्गुष्ठयुक्तमध्यमया
शिखायां शिखामन्त्रं विन्यसेदित्यवधेयम्।
(कण्ठप्रावरणत्वेन) कण्ठप्रावरणं कण्ठवेष्टनं तस्य
भावस्तत्वं तेन। (स्तनमध्यान्तम्) स्तनौ दक्षिणवामस्तनौ
तयोर्मध्यं अन्तरालं तस्यान्तम्। (तर्जनीभ्याम्)
दक्षिणवामतर्जनीभ्याम्। नन्वत्र विद्यादेहन्यासेनैव
हृदयाद्यङ्गयुक्ता मूर्तिर्निष्पन्ना पुनरङ्गमन्त्रैः किं
साध्यते ? सत्यं साधकस्य पुनः शरीररक्षणार्थमङ्गमन्त्रा
न्यस्तव्याः। तथा श्रीमज्ज्ञानरत्नावल्यां हृदयं
हृत्परित्राणं बद्धपट्टतदाहृतम्।

p. 69)

शिरश्च तच्छिरस्त्राणं शिरसः परिवेष्टनम्। चूलिका
मस्तकत्राणमङ्गत्राणं च कंकटम्। करे शस्त्रे गृहीते तु
भीक्षणो भटवत् स्थितः। क्षुद्राणामप्रभृष्यस्स्यात् ताक्ष्यों
दृक्श्रवसामिव। इति। (तालत्रयपुरस्सरम्) तालानि करास्कालनानि
तेषां त्रयं तत् पुरस्सरं पूर्वं यथा भवति तथा। तालः
कालक्रियामाने करास्काले क्रुमान्तरे इति नानार्थरत्नमाला।
एतल्लक्षणमुक्तमजिते दक्षिणाङ्गुलिभिर्वामहस्तस्य तलताडनम्।

अङ्गुष्ठवर्जिताभिरसा तालमुद्रा विशुद्धिदा? इति । मुद्रालक्षणे
तालाख्या पाण्योस्त्रिसहत्या? भवति सकलीकरणादौ इति ।
महामुद्रा तावत् कराभ्यां संमुखाभ्यां
पादपङ्कजादामस्तकस्पर्शनस्या इत्युक्तं मुद्रालक्षणे । एतेन
शरीरविन्यस्तहृदयादिमन्त्राणां मूलमन्त्रमयेन शिवेन
सार्द्धमैक्यसिद्धिरित्युक्तं श्रीमद्बालज्ञानरत्नावलीकारेन ॥

p. 70)

प्राणायामविधिः ॥

(क्रि) (२४) पश्चात् प्राणायामं मन्त्रसंहितया कृत्वा ॥ (२४)

(२७) (प्र) अथ सकलीकरणविधिमुक्त्वा
देहान्तश्चावायुशुद्ध्यर्थं प्राणायामं क्रमं वक्ति
(पश्चात्) इत्यादिना (कृत्वा) इत्यन्तेन । (पश्चात्) सकलीकरणानन्तरम् ।
(प्राणायामम्) प्राणाः प्राणवायवः तेषामायाः निरोधः तम्
। तथा श्रीमच्छिवधर्मोत्तरे प्राणो वायुश्शरीरस्थस्तस्यायामो
निरोधनम् इति । अत्र
पूरककुंभकरेचकात्मकप्राणायामकरणाय त्रिवारं
शिवसंहितां पठेत् । तदुक्तं श्रीमत्सोमशंभुचरणैः
सकलीकरणं कृत्वा प्राणायामेन संस्थितः ।

त्रिस्समावर्तयेत्मन्त्री मनसा शिवसंहिताम्॥ इति॥

अमृतीकरणम्॥

(क्रि) (२५) बिन्दुस्थानादङ्कुशमुद्रया, ॐ हां हृदयाय

p. 71)

वौषट् इत्याकृष्य, जले संस्थाप्य, मूलेन शिवतीर्थमभिमन्त्र्य,
संरक्ष्य, अवकुण्ठ्य, अमृतीकुर्यात्॥ (२५)

(प्र) अथ सन्ध्यावन्दनार्थं तत्पूर्वकरणीयमाह (बिन्दु)
इत्यादिना (अमृतीकुर्यात्) इत्यन्तेन। (बिन्दुस्थानात्) बिन्दुः बिन्दुकला
तस्याः स्थानं भूमध्यं तस्मात्। तथा भूमध्ये द्वयङ्गुले
दीपनिभो वृत्तोऽर्द्धमात्रकः इति। (अङ्कुशमुद्रया) इति।
एतल्लक्षणमुक्तं मुद्रालक्षणे अथ सृणिमुद्रा
कुञ्चिताग्रतर्जनीसहिता मुष्टिः इति। (आकृष्य) इत्यत्र अमृतमिति शेषः
। तथा श्रीरामनाथपद्धत्यां बिन्दोराकृष्य पीयूषं हृदा
संस्थापयेज्जले इति। (संरक्ष्य) अस्त्रेण दिग्वन्धनं विधाय।
(अवकुण्ठ्य) कवचेनावेष्ट्य। (अमृतीकुर्यात्) धेनुमुद्रया अमृतं
कुर्यात्॥

p. 72)

सकलसन्ध्याध्यानम् ॥

(क्रि) (२६) ततस्सन्ध्यां ध्यात्वा, वन्दयेत् ॥

रक्ताभूषाम्वरां रक्तां जटायज्ञोपवीतिनीम् ।
हंसपद्मासनां बालां चतुर्वक्त्रां चतुर्भुजाम् ॥

रागक्षमालिनीं(?) दक्षे वामे दण्डकमण्डुलुम् ।
ब्राह्मीष्टमदृशं(?) ध्यायेत् प्रातस्तारकितेऽम्बरे ॥

शुक्लाम्बरधरां शुक्लां वनमालोपवीतिनीम् ।
तार्क्ष्यपद्मासनासीनामुद्भिन्न नवयौवनाम् ॥

-

पा- विधिम् ॥

(२९) शङ्खचक्रधरां वामे दक्षिणे स गदाभयाम् ।
ध्यायेन्माध्यन्दिने देवीं वैष्णवीं सर्वभूषणाम् ॥

नीलोत्पलदलाभासां किञ्चिच्चलितयौवनाम् ।

चतुर्भुजां त्रिनेत्राञ्च जटाखण्डेन्दुमण्डिताम् ॥

त्रिशूलाक्षधरां दक्षे वामे साभयशक्तिकाम् ।

रोद्री ध्यायेद्वृषाब्जस्थां कालेऽर्धास्तमितारुणे ।

कृष्णाजिनधरास्सर्वास्साक्षिण्यस्सर्वकर्मणाम् ।

तिस्रस्सलादिकारस्योपाधिभेदभिन्नां संयुक्ताश्चतुर्थी

p. 73)

गुणवर्जिता ॥ इति ब्रह्मादिकारणोपाधिभेदभिन्नां

सर्वकृत्यानां साक्षिणीं शिवशक्तिमेव सन्ध्यां

तत्तत्कालानुगुणं हृद्विन्दुब्रह्मरन्ध्रेषु क्रमेण ध्यायीरन्

समयिनः ॥ (२६)

(प्र) अथ सन्ध्यावन्दनस्य ध्यानपूर्वकत्वेन समयिनां

विशिष्टसमयिनाञ्च सामान्येन सकलसन्ध्याध्यानं वक्ति (ततः)

इत्यादिना (समयिनः) इत्यन्तेन । (ततः) शिवतीर्थकरणानन्तरम् ।

सन्ध्यापदाभिधेयं स्वयमेव स्पष्टीकरिष्यति । (वंदयेत्)

अभिवादयेत् । अत्र सन्ध्यावन्दनन्तावत् सन्ध्याध्यानानन्तरं

तत्प्रभामण्डलपरिपूर्णतामध्ये स्थित्वा तदनु क्रियमाणं

कर्मेति निगद्यते। तथा

तत्प्रभामण्डलाभोगप्रविष्टामात्मनस्तनुम्। सञ्चिन्त्य

कुर्याद्यत् कर्म तस्यास्तद्वन्दनं हि तत्॥ इति।

कथं? ध्यात्वा वन्दयेदित्याकांक्षायां तत्र प्रातः

प्राभातिकरसन्ध्याध्यानं? ब्रूते (रक्त)

p. 74)

इति। (जटायज्ञोपवीतिनीम्) इति। अत्र जटा दृढं ग्रथितकेशाः।

(कमण्डलुम्) इति। कं जलं अण्डे मध्ये लाति आदत्ते इति कमण्डलुः

कुण्डी। * स्त्री? कमण्डलुः कुण्डी इत्यमरः। (तारकिते)

तारकाण्यस्य सञ्जातानि तारकितं तस्मिन्। सञ्जातार्थे इतच्। अनेन

च दृष्टतारकायास्संध्याया उत्तमत्वं लुप्ततारकाया

उत्तममध्यमाधमभेदेन कालत्रयं प्रदर्शितम्। तथा

श्रीमज्ज्ञानरत्नावल्यां उत्तमा दृष्टनक्षत्रा

मध्यमालुप्ततारका। अर्द्धोदितारुणा कन्या? प्रातस्सन्ध्या त्रिधा

स्मृता॥ इति। शेषं सुगमम्॥

मध्याह्निकसन्ध्याध्यानमाह। (शुक्ल) इति।

(वनमालोपवीतिनीम्) वनमाला तुलसीमाला उपवीतञ्च

यज्ञसूत्रं वनमालोपवीते अस्याः स्व इति तथोक्ता ताम्।

(तार्क्ष्यपद्मासनासीनाम्) तार्क्ष्यः गरुडः तत्र

पद्मासनासीनां

p. 75)

पद्मासनस्थिताम्। गरुत्मान् गुरु * * *?तार्क्ष्यः इत्यमरः।

(सगदाभयाम्) गदा च कौमोदकी कौमोदकी गदा इत्यमरः।

अभयञ्च ऊर्ध्वपताका मध्याह्ने। माध्यन्दिनो नाम

मुहूर्तपञ्चकावधिः कालः। तथा मुहूर्तैः पञ्चभिर्यातैः

कृत्वा माध्याह्निकं विधिम्। इति। अत्र माध्यन्दिनस्यापि तथा

त्रैविध्यं ज्ञेयम्। तथा श्रीमज्ज्ञानरत्नावल्यां मध्याह्ने च

तथा ज्ञेया घटिकात्रयकल्पिता इति। सुबोधमन्यत्।

सायाह्नसन्ध्याध्यानमाह (नीलोत्पल) इति। साभयशक्तिकाम्

) अभयञ्च व्याख्यातमेतत् शक्तिश्च कासूः आयुधविशेषः।

कासूसामर्थ्ययोश्शक्तिः इत्यमरः। स्वार्थेकन् अभयशक्तिके।

ताभ्यां सहवर्तत इति तथोक्ता ताम्। (वृषाब्जस्थाम्) वृषः

वृषभः ऋषभो वृषभो वृषः इत्यमरः। तस्मिन् अब्जस्थां

पद्मासनस्थिताम्

p. 76)

लवणांबुजयोरब्जम् इति नानार्थरत्नमाला। (अर्धास्तमितारुणे)

अर्धश्च समांशः अस्तमितः अर्धास्तमनं गतः स चासौ

अरुणश्च सूर्यः यस्य स तथोक्तः तस्मिन्। अरुणो भास्करेऽपि

स्याद्वर्णभेदे स तु त्रिषु इत्यमरः। अनेन

अर्द्धास्तमितार्कमण्डलायास्सन्ध्याया उत्तमलं

अस्तमितसूर्याया मध्यमलं(?) दृष्टतारकाया अधमत्वञ्च

प्रकाशितम्। तथा श्रीमञ्ज्ञानरत्नावल्यां

अर्द्धार्कमण्डलश्रेष्ठो मध्यमाऽस्तमिते रवौ।

अन्यसा दृष्टनक्षत्रा सायं सन्ध्या त्रिधोदिता॥

इति। स्फुटमन्यत्॥

ननु किं ब्राह्मयादीनां विशेषान्तराणि न सन्तीत्याशक्य

सन्तीत्याह (कृष्णाजिनधराः) इति। कृष्णाजिनं एणचर्म तस्य

धरन्तीति धराः। (सर्वाः) समस्ताः) अनेन ब्राह्मयादयः

अरुणाम्बरादिधरा अपि कृष्णजिनधारिण्यश्च भवन्तीति तात्पर्यम्।

p. 77)

तथा श्रीरामनाथपद्धत्यां कृतन्यासः प्रभाते तु

ब्राह्मीमष्टविलोचनाम्। रक्तभूषांभबरां रक्तां

रक्तमाल्यविलेपनाम्॥ हंसपद्मासनां बालां

जय(?)यज्ञोपवीतिनीम्। कृष्णाजिनधरां कर्म साक्षिणीं
चतुराननाम्। इत्यादि उपक्रम्य दक्षे चक्राभययुतां वामे
शङ्खगदायुताम्। कृष्णाजिनधरामेकां
द्विवक्त्रनयनाम्बुजाम्। वृषाञ्जसंस्थितां
सर्वसाक्षिणीमुपवीतिनीम्। कृष्णाजिनधरां रौद्रीम् इति अभिहितम्।
(सर्वकर्मणाम्) निखिलकृत्यानाम्। (साक्षिण्यः) उपद्रष्ट्र्यः।
(तिस्रः) त्रित्वसंख्यायुक्ताः ब्राह्मी वैष्णवी रौद्री इत्यर्थः।
(सत्वादियुक्ताः) सत्वं सत्वगुणः आदिर्यस्य तत् सत्वादि तेन
संयुक्ताः। रजोगुणादिरादिशब्दार्थः। तथा श्रीमन्मृगेन्द्रे ततो
बुद्ध्याद्युपादानं गौणं सत्वं रजस्तमः इति। अत्र ब्राह्मी
सत्वगुणयुक्ता वैष्णवी रजोगुणसहिता

p. 78)

रौद्री तमोगुणोपेता इति तात्पर्यार्थः। तथा च
श्रीमत्सोमशंभुपद्धतिव्याख्याकारः प्रातरादिसन्ध्यानां
सत्वादिवृतित्वेनोक्तप्रकाशप्रवृत्तिनियमहेतुस्तद्वशात् पाठक्रम
एव क्रमः इति। (चतुर्थी) तुर्यसन्ध्या। (गुणवर्णिता)
सत्वादिगुणरहिता। गुणास्सत्वं रज * *ः? मौलीं द्रव्याश्रिते
सत्वशुक्लसन्ध्यादिके गुणः इत्यमरः। स्पष्टमन्यत्। (इति) एवम्।

ब्रह्माणीवैष्णवीरौद्रीभेदाद्भिन्ना विभाति सा।

साक्षिणी कर्मणां शंभोश्शक्तिस्सन्ध्येति गम्यते ॥

इति श्रीमत्सोमशंभुपद्धतिश्रुतिं हृदि निधाय

न?गुशक्तिशंभुभेदेन मन्त्रमन्त्रेश्वराणामिव

कारणेशानामपि त्रिविधत्वात् ब्रह्माद्यधिष्ठानो पा *?

भेदभिन्ना तदुपाधिकृतवर्णवाहनायुधविग्रहा शिवशक्तिरेव

सन्ध्येति ब्रूते (ब्रह्मादिकारण) इति ।

(p.79)

(ब्रह्मादिकारणोपाधिभेदभिन्नाम्) ब्रह्मा आदिर्येषां तानि

ब्रह्मादीनि । आदिपदेन विष्णुरुद्रौ निगद्यते । तानि च तानि कारणानि

च तेषां उपाधयः अधिष्ठानविशेषाः

उपाधिर्धर्मचिन्तायां कैवनेऽपि विशेषणे

इति विश्वः । तेषां भेदः तेन भिन्ना ताम् । (सर्वकृत्वानाम्)

निखिलकर्मणाम् । (साक्षिणीम्) उपद्रष्ट्रीम् । (सन्ध्याम्)

सन्ध्यादेवताम् । (तत्तकालानुगुणम्)

प्रातर्मध्याह्नसायाह्नानुरूपम् । अत्र प्रभाते ब्राह्मीं हृदये

मध्याह्ने वैष्णवी भ्रूमध्ये सायाह्ने रौद्रीं ब्रह्मरन्ध्रे

ध्यायीरन्निति तात्पर्यार्थः । एतत्सकलसन्ध्याध्याने अधिकारिणः

के इत्याकांक्षायामाह (समयिनः) इति। अत्र समयिपदेन
तन्त्रोच्चारात् सामान्यसमयिनो विशिष्टसमयिनश्च विवक्षिताः। अत्र
सामान्यसमयिनो नाम रुद्रपदप्रापकसमयदीक्षया

p. 80)

संस्कृताः। विशिष्टसमयिनः
पुनरीश्वरपदपापकविशिष्टसमयदीक्षया संस्कृताः। तथा
श्रीमद्वरुणपद्धत्यां यत्र रुद्रपदे योगो योगो यत्रैश्वरे पदे।
शिखाच्छेदो न यत्रास्ति दीक्षा सा सामयी द्विधा॥ इति। एतेषामेन
रक्तभूषाम्बरां रक्ताम् एत्यादिसकलसन्ध्याध्यानत्रयं
प्रातरादिकालत्रयस्य भवति। यदाह
श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारः अथ सन्ध्याध्यानं
सकलनिष्कलभेदेन द्विविधं तत्र समयिविशिष्टसमयिविषये सकलम्
। पुत्रकादिविषये अध्यात्मनि हृद्विन्दुब्रह्मरन्ध्रपरस्थानेषु
निष्कलम् इत्यादि। तथा चाह
श्रीमत्सोमशंभुपद्धतिव्याख्याकारः अत्र समयिनां सन्ध्या
स्थूला निर्वाणदीक्षितानां सूक्ष्मां इति। ननु
प्राक्सन्ध्यासमयस्थस्य विशिष्टस्याग्निकद्वयम्।
निर्वाणदीक्षितस्यात्र संध्यात्रयमुदाहृतम्॥

p. 81)

इति । श्रीमज्ज्ञानरत्नावलीवचनेन समयिनामेकसन्ध्या नतु
सन्ध्यात्रयमिति चेत् । सत्यं तथा केषाञ्चिदाचार्याणामनुमतम् ।
अत्र तु कालत्रयस्यापि रक्तभूषाम्बराम्
इत्यादिसकलसन्ध्याध्यानत्रयकथनानन्तरं ध्यायीरन्
समयिनः इत्युदीर्य तदनु पुत्रकाद्यास्तु मृणालतन्तुवत्तन्वी रक्ता
शुक्ला इत्यादि व्याहृत्य एताः पूर्वोक्तस्थानेषु द्वादशान्ते वा
ध्यायीरन् इति पृथगेव पुत्रकादीनां कालवतुष्टयस्यापि
वाहनायुधविग्रहव्यतिरेकेण
केवलरक्तशुक्लादिवर्णमात्रपरत्वेन
निष्कलसन्ध्याध्यानचतुष्कस्य उच्यमानत्वात् । अतः
सकलसन्ध्याध्यानत्रयं समयिविषयमेव । अन्यथा
सकलसन्ध्याध्यानत्रयनिरूपणस्य वैयर्थ्यप्रसङ्गस्स्यात् ॥

निष्कलसन्ध्याध्यानम् ॥

(क्रि) (२७) पुत्रकाद्यास्तु

p. 82) मृणालतन्तुवत्तन्वी रक्ता शुक्ला सितेवरा ।?
तुर्यात्वरूपा कृष्णा वा या निशीथे विभाव्यते ॥

इति एताः पूर्वोक्तस्थानेषु द्वादशान्ते वा ध्यायीरन् ॥

(प्र) अथ समयिनां स्थूलसन्ध्याध्यानमभिधाय
निरातन्तुनिभा सूक्ष्मा रक्ता शुक्ला सितेतरा इति
श्रीमच्चिन्त्यविश्वसादाख्यश्रुतेः
निर्वाणदीक्षितपुत्रकसाधकाचार्याणां त्रयाणां
निष्कलसन्ध्याध्यानमभिधत्ते (पुत्रकाद्याः) इत्यादिना
(ध्यायीरन्) इत्यन्तेन । (पुत्रकाद्याः) पुत्रकाः निर्वाणदीक्षिताः ।
तथा श्रीमद्वरुणपद्धत्यां यत्र पाशशिखाच्छेदो
योगशिवपदे भवेत् । निर्वाणाख्या तु सा सैव पुत्रके नाभिषेकतः
॥ इति । एतत्कारिकावलीव्याख्याकारेण भट्टशिवोत्तमेन
पुत्रकलक्षणमप्युक्तमेवं निरधिकारतया
कृतसमयनिर्वाणदीक्षाच्छिन्नपाश

p. 83)

शिखोऽभिषेकरहितो यः स पुत्रको नाम इति । तं यद्वक्ष्यति
चोत्तरकर्मविधानोपक्रमे
आचार्यसाधकपुत्राणागन्त्येष्टिरध्वशुद्धियुता कर्तव्या
समयिनस्तद्वर्जिता इति ॥ ते आद्याः येषां ते पुत्रकाद्याः ।
आद्यपदेन साधकदेशिकाः सूचिताः । तथा श्रीमन्मृगेन्द्रे
देशिको मन्त्रमृतिश्च पुत्रकस्समयी च यः । चत्वार एते शैवास्स्युः

इति । तु शब्दः पूर्वस्माद्वैषम्यद्योतकः (मृणालतन्तुवत्)
बिससूत्रेण तुल्यम् । मृणालं बिसम् इत्यमरः । (तन्वी) सूक्ष्मा ।
तथा श्रीमच्चिन्त्यविश्वसादाख्ये बिसतन्तुनिभा सूक्ष्मा रक्ता
शुक्ला सितेतरा इति । (रक्ता) उद्यद्दिनकरनिकरारुणप्रभा । एतत्प्रातः
कालीनसन्ध्याध्यानम् । (शुक्ला) चन्द्रकोटिसदृशकान्तिरित्यर्थः ।
इदं माध्याह्निकसन्ध्याध्यानम् । (असितेतरा) श्वेतकान्तिः
अमृतार्णवसवर्णवर्णेत्यर्थः ।

p. 84)

एतत् सायन्तनसन्ध्याध्यानम् (या) सन्ध्या । (निशीथे) अर्द्धरात्रे ।
अर्द्धरात्रनिशीथौ द्वौ इत्यमरः । (विभाष्यते) विशेषणे तु चिन्त्यते ।
अत्र यत्तदोर्नित्यसंबन्धात् तत्पदं अध्याहतव्यं सा । (तुर्या)
चतुर्थी । (अस्पा) न विद्यते रूपं रक्तादिवर्णः यस्यारसा तथोक्ता ।
केवलं तेजोस्पेति यावत् । तथा श्रीमत्सिद्धान्तसासवल्यां हृत्पद्मे
प्रातरर्कोदयनिवहनिभं मध्यनाड्यां विचिन्त्यं मध्याह्ने
भ्रूसरोजे परमशिवत्वचिद्रूपमिन्दुप्रकाशम् । सायाह्ने चोर्ध्व
पद्मेह्यमृतजलनिधिद्योतनं स्वोत्थनादं रात्रेरर्द्धेऽप्रमेयं
त्वचलमविकलं द्वादशान्तेमहस्तत् ॥ इति ।
इदमर्द्धरात्रसन्ध्याध्यानम् । तस्या एव पक्षान्तरध्यानमाह
(कृष्णा वा) इति । (इति) जलम् । (एताः) प्रातस्सन्ध्याप्रभृतयः ।
(पूर्वोक्तस्थानेषु) हृद्विन्दुब्रह्मरन्ध्रस्थलेषु ॥

p. 85)

सन्ध्यावन्दनविधिः ॥

(क्रि) (२८) ततो यथाधिकारं तत्तत्कालोचितां सन्ध्यां ध्यात्वा,
तत्प्रभामण्डलमध्यस्थितो दक्षिणहस्तेन वामहस्ते जलं
निक्षिप्य, संहितया सकृदभिमन्त्र्य, कुम्भकमुद्रया
वौषडन्तमुलेन सकृत्प्रयोगेण शिरसि

१ पा (सितेतरा) श्वेतान्या ॥

(३४) निक्षिप्य, पुनस्संहितयाऽभिमन्त्रितं वारि कुशानिते
वामपाणौ निधाय, दक्षिणहस्तेन तदधोगलितं जलं मूर्ध्नि
संहितयां वौषडन्तया निक्षिपेत्। इति मार्जनम् ॥

तत्पुनरवशिष्टं तोयं दक्षिणकरस्थं धर्मरूपं
शुद्धं पूरकवायुना वामनासाप्रविष्टं सञ्चिन्त्य,
कुंभकयोगेनान्तः पापक्षयं कृत्वा तत्पापं कज्जलाभं
दक्षिणनासापुटेन विनिस्सृतं विभाव्य, हुंफडन्तास्त्रेण

p. 86)

ज्वलदग्निवर्णवज्रशिलायां सभ्रुक्षेपं क्षिपेत्।

सोऽयमद्यमर्थः॥

ततो मन्त्रवत् सम्यगाचम्य, पूर्ववत् सकलीकृत्य,

कवचेनाद्भिरात्मानं संवेष्ट्य, सूर्यमण्डलंमध्यस्थितं

भगवन्तं सदाशिवं संचिन्त्य, यद्वा गायत्रीं च

तप्तकाञ्चनवर्णाभां समयस्थापनीं पराम्।

वराभयाक्षमालां च कुण्डिकां बिभ्रतीं करैः॥

चतुर्भुजां त्रिनेत्रां च गायत्रीं सततोदिताम्॥

इति ध्यात्वा, ॐ तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि।

तन्नश्शिवः प्रचोदयात्, इत्यञ्जलित्रयं सकुशहस्ताभ्यां दद्यात्।

ततो दशवारं सप्तवारं वा गायत्रीं जप्त्वा, ॐ हां हौं

शिवाय स्वाहा, इत्यञ्जलित्रयदानेन सह जपं निवेद्य, संहितया

स्वाहान्तं सन्तर्प्य, ॐ हां सर्वेभ्यो मन्त्रेभ्यस्स्वाहा, ॐ हां

सर्वेभ्यो

p. 87)

देवेभ्यस्स्वाहा, इति कराग्रेण ऋजुकुशैः,

ततः कण्ठोपवीती ॐ हां सर्वेभ्य ऋषिभ्यो नमः,
इत्यङ्गुलिपर्वसन्धिभिः, ॐ हां सर्वेभ्यो मनुष्येभ्यो वषट् इति
कनिष्ठामूलाभ्यां ॐ हां सर्वेभ्यो भूतेभ्यो वौषट् इति
संलग्नकरतलमूलेन,

ततोऽपसव्यं कृत्वा,* कुशान् भक्त्वा, स तिलचारिणा, ॐ हां
सर्वेभ्यः पितृभ्यस्स्वधा, ॐ हां सर्वाभ्यो मातृभ्यस्स्वधा ॐ
हां सर्वेभ्यो ज्ञातिभ्यस्स्वधा, ॐ हां सर्वेभ्य
आचार्येभ्यस्स्वधा इति प्रदेशिन्यङ्गुष्ठमूलाभ्यां तर्पयेत् ॥

–

* पा कुशमूलाग्रेण ॥

–

(३५) यद्वा विस्तरेण मूलमन्त्रप्रभृतिमन्त्रान् स्वाहान्तं
प्रथममङ्गुल्यग्रेण देवतीर्थेन सन्तर्प्य, तथैव, ॐ हां
आदित्येभ्यस्स्वाहा, ॐ हां वसुभ्यस्स्वाहा,

p. 88)

ॐ हां रुद्रेभ्यस्स्वाहा, ॐ हां विश्वेभ्यस्स्वाहा, ॐ हां

साध्येभ्यस्स्वाहा, ॐ हां मरुद्भ्यस्स्वाहा, ॐ हां भृगुभ्यस्स्वाहा, ॐ हां अङ्गिरोभ्यस्स्वाहा, इत्यष्टौ देवगणांस्तर्पयेत् ॥

ततः कण्ठोपवीती ॐ हां अत्र ये नमः , ॐ हां वसिष्ठाय नमः , ॐ हां पुत्वस्त्यायनमः, ॐ हां क्रतवे नमः, ॐ हां भारद्वाजाय नमः, ॐ हां विश्वामित्राय नमः, ॐ हां प्रचेतसे नमः, ॐ हां ऋच्छकाय नमः , ॐ हां अगस्त्याय नमः, ॐ हां दधीचये नमः, ॐ हां दुर्वाससे नमः, इत्येकादशर्षीन् पर्वसन्धिभिः,

ॐ हां सनकाय वषट्, ॐ हां। सनन्दाय वषट्, ॐ हां सनातनाय वषट्, ॐ हां सनत्कुमाराय वषट्, ॐ हां कपिलाय वषट्, ॐ हां पञ्चशिखाय वषट्, ॐ हां ऋभवे वषट्, इति सप्त मनुष्यान् कनिष्ठामूलाभ्यां,

p. 89)

ॐ हां सर्वेभ्यो भूतेभ्यो वौषट्, इति संलग्नकरतलमूलेन पञ्चभूतानि,

अथ दक्षस्कन्धोपवीती कुशमूलाग्रेण स तिलवारिणा ॐ हां कन्यवाहनाय स्वधा, ॐ हां अनलाय स्वधा, ॐ हां सोमाय

स्वधा, ॐ हां यमाय स्वधा, ॐ हां अर्यमणे स्वधा, ॐ हां अग्निष्वात्ताय स्वधा, ॐ हां बर्हिषदे स्वधा, ॐ हां आज्यपाय स्वधा, ॐ हां सोमपाय स्वधा, इति देवपितृन्

ॐ हां ईशाय पित्रे स्वधा, ॐ हां सदाशिवाय पितामहाय स्वधा, ॐ हां शान्ताय पवित्रामहाय स्वधा इति विशेषपितृन्

ॐ हां पितृभ्यस्स्वधा, ॐ हां पितामहेभ्यस्स्वधा, ॐ हां प्रपितामहेभ्यस्स्वधा, ॐ हां वृद्धप्रपिता

* पा सनन्तनाय ॥

(३६) महेभ्यस्स्वधा ॐ हां मातृभ्यस्स्वधा, ॐ हां

p. 90)

मातामहेभ्यस्स्वधा, ॐ हां प्रमातामहेभ्यस्स्वधा, ॐ हां वृद्धप्रमातामहेभ्यस्स्वधा, ॐ हां सर्वेभ्यः पितृभ्यस्स्वधा इति प्रेतपितृन्

ॐ हां मातृभ्यस्स्वधा, ॐ हां मातामहीभ्यस्स्वधा, ॐ हां पितामहीभ्यस्स्वधा, ॐ हां प्रपितामहीभ्यस्स्वधा, ॐ हां सर्वेभ्यो ज्ञातिभ्यस्स्वधा, ॐ हां सर्वेभ्य

आचार्येभ्यस्स्वधा, ॐ हां दिग्भ्यस्स्वधा, ॐ हां

दिग्पतिभ्यस्स्वधा, ॐ हां सिद्धेभ्यस्स्वधा, ॐ हां

मातृभ्यस्स्वधा, ॐ हां ग्रहेभ्यस्स्वधा, ॐ हां

नक्षत्रेभ्यस्स्वधा, ॐ हां रक्षोभ्यस्स्वधा, इति सन्तर्प्य, ॐ हः

अस्त्राय हुं फट्, इति सकुशं जलं तीरे निक्षिपेत्। अथोपवीती

गणपत्यम्बिकादीनां मन्त्रमुच्चार्य सन्तर्प्य, कुशांस्त्यक्त्वा,

समाचम्य, सकलीकृत्य, ह्रस्वप्रासादेन तीर्थमुपसंहरेत्।

द्विजश्चेत् सावित्रीजपोपस्थानानन्तरं

p. 91)

संहितया आदित्यमूर्तये शिवायोपस्थानं कृत्वा, प्रासादं

यथाशक्ति शतमर्धं तदर्धं दशवारं वा जप्त्वा, निवेदयेत्॥

(२८)

(प्र) * अथ समय्याद्यधिकारिभेदेन सन्ध्याध्यानमुदाहृत्य

कथं सन्ध्यां वन्दयेदित्याकांक्षायां तद्वन्दनविधिं

ब्रूते (ततः) इत्यादिना (त्यक्त्वा) इत्यन्तेन। (ततः)

सन्ध्याध्यानानन्तरम्। (यथाधिकारम्)

समयिपुत्रकाद्यधिकारमनतिक्रम्य। (तत्तत्कालोचिताम्) ते ते

कालास्तत्तत्कालाः प्रातरादिसमया इत्यर्थः। तेषामुचिता अर्हा ताम्

। (तत्प्रभामण्डलमध्यस्थितः) तस्याः सन्ध्यायाः

प्रभामण्डलं रक्तादिमरीचिमण्डलं तस्य मध्यः तत्र स्थितः।
स्वतनुं सन्ध्याकान्तिमण्डलाभ्यन्तर- प्रविष्टां चिन्तयान्निति
तात्पर्यार्थः॥

सन्ध्यावन्दनविधौ मन्त्राभिषेकक्रममाह

p. 92)

(दक्षिण) इति। कुंभकमुद्रालक्षणमुक्तं मुद्रालक्षणे
कुंभकंमुद्रा

* पा यथाधिकारम्॥

(३७) अन्योन्यसंबद्धाङ्गुष्ठद्वया
सजलवामहस्ततलोपरिन्यस्तसव्यपाणितला अर्द्धेन्दुवत् पृष्ठतो
वक्राङ्गुलिपाणिद्वयात्मिका सन्ध्यायां मन्त्राभिषेकादौ
कार्या इति। * मन्त्राभिषेकानन्तरकार्यमाह
(पुनस्संहितयाऽभिमन्त्रितम्) इति। (तदधोगलितम्) तदधः
वामकरादधस्तात् गलितं च्युतम्। (इति) इत्थम्। (मार्जनम्)
मार्जनाख्यं कर्म। संहितामन्त्रैर्मूर्ध्नि
जलकणविकिरणलक्षणं मार्जनसंश, कर्मेत्युच्यते। तदुक्तं
श्रीमत्सोमशंभुचरणैः

वामपाणिपतत्तोयं योजयन् सव्य पाणिना ।
उत्तमाङ्गे क्रमान्मन्त्रैर्मार्जनं समुदाहृतम् ॥

इति । * मार्जनकर्मावशेषिततोयं किं कुर्यादित्याह

p. 93)

(तत्) इति । (तत्) वामकरस्थोदकम् । (अवशिष्टम्)
मार्जनकर्मणोऽवशेषम् । (दक्षिणकरस्थम्) वामकरात्
दक्षिणकरे प्रक्षिप्तमित्यर्थः । (शुद्धम्) सितवर्णम् ।
(कुंभकयोगेन) कुंभकीकरणेन । (अन्तः) देहाभ्यन्तरे ।
(पापक्षयम्) पापानि वाचिकादिकुष्कर्माणि । तेषां क्षयः
विनाशः तम् । तथा

पूरकेण हृदिस्थन्तन्नीत्वाऽस्त्रन्तु त्रिधा स्मरेत् ।
वाङ्मनः कायिकं पापं रेचकेण तु रेचयेत् ॥

इति । (तत् पापम्) शरीराभ्यन्तरस्थमधर्मम् । (कज्जलाभम्)
अञ्जनवर्णं कृष्णमित्यर्थः । (विनिस्सृतम्) नहिर्गतम् ।
(ज्वलदग्निवर्णवज्रशिलायाम्) ज्वलन् दीप्यमानः स चासौ अग्निः
तस्य वर्णः कान्तिर्यस्यास्सा ज्वलदग्निवर्णा सा चासौ वज्रशिला

वज्रोपलः तस्यां नैर्ऋतदिग्भागे विभावितवज्रशिलायामित्यर्थः ।

p. 94)

एवमुवाच श्रीमद्वालज्ञानरत्नावलीकारः । तथा चाह
श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारः ।

जलं बज्रशिलापृष्ठे क्षिपेत् तदघमर्षणम्

इत्यत्र जलक्षेपो नैर्ऋत्यां दिशि कर्तव्यः इति । तथा
श्रीमत्किरणव्याख्याने

अघं पापं समाख्यातं मर्षणं तस्य नाशनम् ।
नैर्ऋती या शिवेनोक्ता संज्ञया पापहारिणी ॥

इति । नन्वेनं कृतस्य देहान्तः पापमयतोयस्य
वज्रशिलाप्रक्षेपात्मकस्य कर्मणः किमभिधानमित्याशंवय

बोधरूपं सितं तोयं वामयाऽकृष्य कुंभयेत् ।
क्षिपेद्वज्रशिलायां यत्तद्भवेदघमर्षणम् ॥

इति सोमशंभुपद्धतिश्रुतेः तदघमर्षणमित्युच्यते इत्याह

(सोऽयम्) इति । (अघमर्षः) अघशमनमित्यर्थः । अनन्तरं किं
कुर्यादित्याशंक्य
अघमर्षणकर्मकरणशुद्ध्यर्थमुपस्पृंशेदि

p. 95)

* पा मार्जनविधिं वक्ति (पुनः) इति ॥

* पा अघमर्षणविधिमाह (तत्) इति ॥

(३८) त्याह (ततो मन्त्रवत्) इति (ततः) अघमर्षानन्तरम् । अत्र
आचमनान्तरं शुद्ध्यर्थमित्युक्तं
श्रीमन्मृगेन्द्रव्याख्याकारेण ।

यदा यदा समाचामेन्मन्त्रन्यासं तदा तदा ।
कुर्वीत करकायेषु मन्त्रिमन्त्रार्थसिद्धये ॥

इति श्रीमत्सोमशंभुपद्धतौ प्रत्याचमनं मन्त्रन्यासस्य
विहितत्वात् सकलीकुर्यादित्याह (पूर्ववत् सकलीकृत्य) इति ।
अदीक्षितादिजनानामप्रकाशार्थं स्वशरीरमंभोभिः
कवचमन्त्रेण समावेष्टयेदित्याह (कवचेन) इति । एवमुक्तं
श्रीमद्बालज्ञानरत्नावलीकारेण । (आत्मानम्) स्वशरीरम् ।
हस्ताभ्यां तर्पणं प्रोक्तं प्रीणनं तर्पणं स्मृतम् । इति

श्रीमत्कामिकश्रुतेः गायत्रिमूलसंहितादिसर्वमन्त्राणां

p. 96)

प्रीणनार्थं तर्पणविधिमाह (सूर्यमण्डल) इति । (भगवन्तम्)

भगः षाड्गुण्यम् । तदुक्तं विष्णुपुराणे

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

इति । तेन नित्ययुक्तम् । मतुवयं नित्ययोगे । (गायत्रीञ्च) इति । अत्र

गायन्तं त्रायत इति गायत्रीशब्दार्थः गायत्रीदेवताञ्च ।

तद्ध्यानमाह (तप्तकाञ्चन) इति । (समयस्थापनीम्)

शैवाचारप्रतिष्ठाकरीम् । (चराम्) श्रेष्ठाम् ।

(समयाश्शपथाचारकालसिद्धान्तसञ्चिदः

एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः पराः इति चामरः ।

(कुण्डिकाम्) कमण्डलुम् । सुबोधमन्यत् ।

गायत्रिमन्त्रोद्धारः प्रदर्शितः

श्रीमद्वालज्ञानरत्नावल्यां

ॐ तन्महेशाय पदं विद्महे च ततः पदम्। वाग्विशुद्धाय

तत्राऽन्ते

p. 97)

धीमहीति समन्वितम्॥

तन्नश्शिवपदं तस्मान्नियो। जेच्च प्रचोदयात्।

गायत्री कथिता वत्स इति कालोत्तरीयके॥ इति। (अञ्जलित्रयम्) अञ्जलयः

उत्तानहस्तद्वयसम्पुटाः। तथा मनुः श्राद्धे पिण्डे विवाहे च

दाने चैकेन दीयते। तर्पणे तूभयेनैव जलं देयन्तु नान्यथा इति।

पाणिर्निकुञ्जः प्रसृतिस्तौ युतावञ्जलिः पुमान् इत्यमरः। तेषां

त्रयं। (ततः) गायत्री तर्पणानन्तरम्। (जप्त्वा) जपं विधाय।

त्रिसन्ध्यं शिवगायत्रीं जपेद्भक्तिसमन्वितः।

एवं मन्त्रं जपित्वाऽर्घ्यं दत्वा सद्योविसर्जनम्॥

इति श्रीमच्चिन्त्यविश्वसादाख्यश्रुतेः गायत्री जपानन्तरं

विसर्जनार्घ्यं दद्यात्। (शिवायस्वाहा) इति। अत्र स्वस्स्वर्गे इत्यनेन

स्वाहा शब्दस्यामृतार्थत्वात् स्व

* पा ज्य च॥

p. 98)

(३९) शब्देन स्वर्गः कथ्यते हाकारेणापि एकदेशलक्षणयैवाहार
इति स्वः स्वर्गे यः आहारः अमृतमिति स्वाहाशब्दार्थो ज्ञेयः।
(अञ्जलित्रयदानेन) तर्पणत्रयदानेन। (सर्वेभ्यो मन्त्रेभ्यः) इति।
अत्र सर्वमन्त्रा आणवशाक्तशांभवभेदेन शतकोटिमन्त्राः।
(सर्वेभ्यो देवेभ्यः) इति। अत्र सर्वदेवाः आदित्यादिदेवगणाः अष्टौ।
(कराग्रेण) देवतीर्थेनेत्यर्थः। (ऋजुकुशैः) इति। कुशाग्रेणेत्यर्थः॥

देवानामुपवीतेन ऋषीणां कण्ठलंबनम् इति
श्रीमत्कालोत्तरश्रुतेः अनुद्धृतान्यतरबाहुकोपवीतस्सन्
ऋषींस्तर्पयेदित्याह (ततः कण्ठोपवीती) इति। (सर्वेभ्य ऋषिभ्यो
नमः) इति। (अत्र सर्वर्षयः अत्रिवसिष्ठाद्येकादशर्षयः। नम

p. 99)

इत्यत्र नकारेण नाक उच्यते। मकारेणापि बिन्दुस्वरूपलक्षणया
चन्द्रामृतमेवेति नमश्शब्दार्थः। तथा श्रीमत्कालोत्तरे कथितम्।
(अङ्गुलिपर्वसन्धिभिः) आर्षतीर्थेनेत्यर्थः। अत्र ऋषीणां तर्पणं
कुशमध्येन विधेयमित्युक्तं श्रीमद्बालज्ञानरत्नावलीकारेण।
(सर्वेभ्यो मनुष्येभ्यः) इति। अत्र सर्वमनुष्याः
सनकादिसप्तमनुष्याः। (कनिष्ठामूलाभ्याम्)

प्राजापत्यतीर्थेनेत्यर्थः। (सर्वेभ्यो भूतेभ्यः) इति। अत्र
सर्वभूतानि आकाशादीनि पञ्च। एवमुक्तं
श्रीमद्बालज्ञानरत्नावल्याम्। (संलग्नकरतलमूलेन)
संश्लिष्टहस्ततलबुध्नभागेनब्रह्मतीर्थेनेत्यर्थः॥

पितॄणां प्राचीनावीतं तर्पयेत् सुसमाहितः इति
श्रीमत्कालोत्तरश्रुतेः उद्धृतवामबाहुकोपवीतस्सन्
पितॄंस्तर्पयेदित्याह (अपसव्यं कृत्वा) इति।

p. 100)

(कुशान्) कर्मान्। (भंक्त्वा) तिर्यक् कृत्वा कुशमूलाग्राभ्यामिति
यावत्। (सर्वेभ्यः पितृभ्यः) इति। अत्र सर्वपितरः देव
पितृविशेषपितृप्रेतपितरः। (सर्वाभ्यो मातृभ्यः) इति। अत्र
सर्वमातरः मातृपितामहयादयः। (सर्वेभ्यो ज्ञातिभ्यः) इति। अत्र
ज्ञातयः सगोत्राः। सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनास्समाः
इत्यमरः। (सर्वेभ्य आचार्येभ्यः) इति। अत्र आचार्याः
स्वगुरुप्रभृतयः। तथा श्रीमन्मृगेन्द्रे तथा ऽपसव्येन पितॄन्
सपत्नीकान् पितामहान्। प्रपूर्वान् स्वगुरुनैवं चोदकान् बोधकान्
परान्॥ इति। (प्रदेशिन्यङ्गुष्ठमूलाभ्याम्) प्रदेशिनी च तर्जनी
तर्जनी स्यात् प्रदेशिनी इत्यमरः। अङ्गुष्ठमूलञ्च
अङ्गुष्ठबुध्नभागः प्रदेशिन्यङ्गुष्ठमूले ताभ्यां

पितृतीर्थेनेत्यर्थः। तथा श्रीमत्कामिके

p. 101)

कराग्रे दैविकं तीर्थं पर्वसन्धिषु चार्षकम्। तीर्थं

कनिष्ठकामूले प्राजापत्यं प्रकीर्तितम्। पैतृकं तर्जनीमूले

ब्राह्मकं करमूलतः। इति। स्वधेत्यत्र स्वशब्देन दिव्यमुच्यते।

धाशब्देनाप्येकदेशलक्षणया सुधैवेति स्वधाशब्दार्थः।

तथा श्रीमद्वालज्ञानरत्नावल्यां संप्रदाने।

यतः प्रोक्तश्शब्दस्स्वाहा स्वधा नमः।

दीयतेऽमृतमेतेषां त्रयाणामपि तत् समम्॥

स्वस्स्वर्गेयस्तदाहारोऽमृतं तेषां दिवौकसाम्।

स्वधा यत्स्वर्दिव्यं प्रोक्तं धा सुधा पितृषु प्रिया॥

नमो यो नेति नाको यस्तस्मिन्मेन्दुस्सुधा नृणाम्। इति। (तर्पयेत्)

तर्पणं कुर्यात्। तर्पणं नाम तृप्तिः सोहित्यं तर्पणं तृप्तिः

इत्यमरः॥

एवं सङ्ग्रहतर्पणं प्रदर्श्य विस्तरतर्पणविधिमाह।

(यद्वा) इति। आदित्यादिदेवगणानां तर्पणमाह (तथैव) इति।

अङ्गुल्यग्रेणैवेत्यर्थः ।

p. 102)

अत्रिप्रभृतिमुनीनां तर्पणमाह (ततः) इति । सनकादिमनुष्याणां तर्पणमाह (ॐ हां सनकाय वषट्) इति । आकाशादिभूतानां तर्पणमाह (ॐ हां सर्वेभ्यः) इति । कव्यवाहादि देवपितृतर्पणमाह (ततः) इति । सनकादिमनुष्याणां तर्पणमाह (ॐ हां सनकाय वषट्) इति । आकाशादिभूतानां तर्पणमाह (ॐ हां सर्वेभ्यः) इति । कव्यवाहादिदेवपितृतर्पणमाह (अथ) इति । (दक्षस्कन्धोपवीती) अपसव्योपवीतीत्यर्थः ।
ईशादिविशेषपितृतर्पणमाह (ॐ हां ईशाय पित्रे स्वधा) इति । पितृप्रभृतिप्रेतपितृतर्पणमाह (ॐ हां पितृभ्यस्स्वधा) इति । पितामहाः पितृजनकाः । प्रपितामहाः पितामहजनकाः । वृद्धप्रपितामहाः पितामहजनकजनकाः । मातामहाः मातृजनकाः । प्रमातामहाः मातामहजनकाः । वृद्धप्रमातामहाः मातामहजनकजनकाः ।

p. 103)

पितामः पितृपिता तत्पिता प्रपितामहः । मातुर्मातामहाद्येवम् इत्यमरः । (प्रेतपितॄन्) इति । अत्र यद्यपि सपिण्डीकरणानन्तरं प्रेतत्वमविद्यमानं तथापि भूतपूर्वगत्या प्रोक्तमित्यदोषः ।

तदनन्तरकरणीयानि तर्पणान्याह (ॐ हां मातृभ्यस्स्वधा)
इत्यादि ॥

अथ तर्पणानन्तरकरणीयान्याह (समाचम्य) इत्यादिना
(निवेदयेत्) इत्यन्तेन । (तीर्थम्) इति । पूर्वं बिन्दुस्था

* पा यथोक्तश्च ॥

(४२) नादाकृष्टममृतमित्यर्थः । (उपसंहरेत्) बिन्दुस्थान एव
योजयेत् । (उपस्थानम्) इति । अत्र शिवरूपायादित्याय
जलाञ्जलिजलैरभिमुखमुपस्थानं सिद्धमेवेत्युक्तं
श्रीमत्सार्द्धत्रिशतिवृत्तिकारेण । तथा च महाभारते
कर्णप?र्वणि

p. 104)

कृत्वा प्रदक्षिणं यत्वादुपस्थाय च भास्करम् इति । (निवेदयेत्) शिवे
समर्पयेत् ॥

सन्ध्यातिक्रमे परिहारः ॥

(क्रि) (२९) उक्तसन्ध्याकालभ्रंशे संहितामेकवारं जपेत् ॥ (२९)

(प्र) अथ सन्ध्यायाः कालातिक्रमेण कृतौ प्रायश्चित्तमाह (उक्त)
इत्यादिना (जपेत्) इत्यन्तेन। (उक्तसन्ध्याकालभ्रंशे)
उक्तसन्ध्याकालः प्रातस्तारकितेऽम्बरे इत्याद्युदितसन्ध्यासमयः।
तस्य भ्रंशः परिच्युतिः तस्मिन्। (संहिताम्) शिवैकादशिकाम्।
तथा सन्ध्याकालपरिभ्रम्शे शिवैकादशिकां जपेत् इति। अत्र
परिभ्रंशः संध्याकालत एव न तु कर्मतः। तस्य सकृत्
सन्ध्याविलेपे तु सद्योजातशतं जपेत् इति पृथक्तया
प्रायाश्चित्तश्रुतेः॥

सूर्यपूजा॥

(क्रि) (२०) ततोऽस्त्रपञ्जरमध्यगः पृथिव्यादितत्वानि

p. 105)

मनसा सन्त्यजन् शुद्धविद्यातत्त्वान्तव्याप्तिकं पूजास्थानं
प्रविश्य, पूजोपकरणाव्युपाहृत्य,

पूर्वास्यो भास्करमर्चयेत्। ॐ रः अस्त्रा। फट्, इति
हस्ततलपृष्ठे संशोद्धय, वौषडन्तमूलेनाप्लाव्य,
अङ्गुष्ठयोस्तर्जनीभ्यां ॐ अं हृदयाय नमः,
कनिष्ठानामिकामध्यमांसु अङ्गुष्ठाभ्यां ॐ अं अर्काय

शिरसे नमः, ॐ अं भूर्भुवस्स्वरों ज्वालिनीशिखायै नमः, ॐ अं
हूं कवचाय नमः, हस्ततलयोर्मध्यमाङ्गुलीभ्यां, ॐ हां
भानुनेत्राभ्यां नमः, तर्जन्योरङ्गुष्ठाभ्यां, ॐ रः अस्त्राय
फट्, इति विन्यस्य, कवचेनावकुण्ठ्य, उभौ संयोज्य, मूलं
वौषडन्तं विन्यस्य, सूर्यमूलमन्त्रेण
कृतदेहशुद्धिर्दक्षिणाङ्गुष्ठानामिकायुग्मेन हृदि हृदयं
मूर्ध्नि शिरोमन्त्रं शिखायां शिखां कण्ठप्रावरणत्वेन
स्तनमध्यान्तं तर्जनीभ्यां कवचं मध्यमातर्जनीभ्यां

p. 106)

नेत्रमन्त्रं नेत्रयोर्हस्ततलयोरस्त्रं च विन्यस्य, दशदिक्षु
छोटिकया अस्त्रेण दिग्बन्धनं विधाय, सर्वाङ्गेषु मूलमन्त्रं
महामुद्रया विन्यस्य, स्वतनुं सूर्यरूपं भावयेत्॥

पश्चात्ताम्रपात्रे रक्तपुष्पादितोयेन अर्घ्यं कृत्वा
जानुभ्यामवनिं गतो मस्तकान्तं नीत्वा, ॐ स्त्रां ह्रीं सः।
सूर्याय नमः, इति दर्शनार्घ्यं दत्वा, यथाशक्तिजपं च कुर्यात्
।

ततोऽर्घ्यपात्रमस्त्रेण संशोध्य,
ललाट्मध्यस्फुरदरुणबिन्दुविनिसुतामृतधारया, ॐ खं

खषोल्काय नमः इति गन्धोदकेनापूर्य, तत्र
षडङ्गैर्मूलमन्त्रेण च संपूज्य, अस्त्रकवचाभ्यां
रक्षावकुण्ठने विधाय, मूलेन धेनुमुद्रां दर्शयित्वा,
तज्जलैर्द्रव्यमात्मानं भूमि चास्त्रेण संप्रोक्ष्य,
पुष्पक्षेपेणास्त्रेण विघ्नानुच्चाट्य, ततः स्थण्डिले
लिखिताष्टदलपद्मेताम्रादिनिर्मितपद्मेनार्चयेत् ॥

p. 107)

तत्र द्वारदक्षिणपार्श्वे, ॐ अं दण्डिने नमः, इति दण्डी
द्वार्दक्षिणे गौस्तुन्दिलो लम्बकूर्चतान्। मषीभाजनलेखिन्यौ
धारयन् हस्तयोर्द्वयोः ॥ प्राणिनां कर्मसाक्षी च तत्कर्माणि
लिखत्यसौ। इति तद्वामपार्श्वे ॐ अं पिङ्गलाय नमः,

रक्तवर्णस्सुवेषाढ्यस्सूचीहस्तसमन्वितः।
पिङ्गलो वा पार्श्वे तु प्रतीहारश्च दण्डवान् ॥

इति ध्यात्वाऽभ्यर्च्य, पद्मस्यैशान्यां, ॐ अं गणपतये नमः, इति

* रक्तं पद्मासनासीनं दन्तौ पाशाङ्कुशौ फलम्।
दधानं च चतुहस्तैर्गजवक्त्रं गणाधिपम् ॥

इति ध्यात्वाऽभ्यर्च्य, तस्याग्नेय्यां, ॐ अं गुरुभ्यो नमः, इति

जटामकुटशोभाढ्यं भस्मपाण्डरविग्रहम् ।
योगपट्टयुतं ब्रह्मसूत्रन्नाभिस्थलोपरि ॥

–

* पा शिवसूर्याय ॥ * पा रक्तपद्मा ॥

–

p. 108)

(४३) कृतयोगाख्यमुद्रं च ध्यायेच्छान्तं गुरुं परम् ।

इति ध्यात्वा संपूज्य, मध्ये, ॐ अं प्रभूतासनाय नमः इति
श्वेतपीठमर्चयेत् । आग्नेयादिचतुष्कोणेषु, ॐ अं विमलाय नमः, ॐ
अं साराय नमः, ॐ अं आराध्याय नमः, ॐ अं परमसुखाय
नमः, इति सितरक्तपीतहरितसिम्हरूपाणि विचिन्त्यार्चयेत् ॥

तदुपरि, ॐ अं पद्माय नमः, इति सितपद्मं तस्य
पूर्वादीशान्तकेसरेषु, ॐ रां दीप्तायै नमः, ॐ रीं सूक्ष्मायै
नमः, ॐ रुं रुजायै नमः, ॐ रूं भद्रायै नमः, ॐ रें

विभूत्यै नमः, ॐ रैं विमलायै नमः, ॐ रों अमोघायै नमः,
ॐ रौं विद्युतायै नमः, कर्णिकायामीशाने, ओं रः सर्वतोमुख्यै
नमः, इति

यद्वां दीप्तदीपशिखाकारा ध्यातव्या नवशक्तयः।
पद्मचामरहस्ताश्चरक्तास्सर्वाङ्गभूषणाः॥

p. 109)

एवं ध्यात्वाऽभ्यर्च्य, विस्फुरमुद्रां दर्शयित्वा, मध्ये ॐ अं
अर्कासनाय नमः, इत्यर्कासनं सम्पूज्य,

धवलाम्भोरुहारूढं दाडिमीकुसुमप्रभम्।
स्फुरद्रक्तमहातेजो वृत्तमण्डलमध्यगम्॥

अंसासक्तस्फुटश्वेत सनालाब्जकरद्वयम्।
एकास्यं चिन्तयेद्भानुं द्विनेत्रं रक्तवाससम्॥

इति ध्यात्वा, ॐ खं खषोल्कायं सूर्यमूर्तये नमः, इत्यासनोपरि
मूर्तिं विन्यस्य, ॐ भां भानुनेत्राभ्यां नमः, इति नेत्रे दत्वा,
पुष्पैरञ्जलिमापूर्य, ललाटाकृष्टस्फुरदरुणबिन्दुमञ्जलौ
विचिन्त्य, ॐ ह्रां ह्रीं सः सूर्याय नमः, इत्यनेन मूलमन्त्रेण

तद्व्यापकमावाहयेत् ॥

उपहृदयेनावाहनीमुद्रयाऽवाह्य, स्थापन्या पद्मासने
संस्थाप्य, सन्निधान्या सन्निधाप्य, निष्ठुरया निरोध्य, नित्य?
मुद्रां प्रदर्श्य,

p. 110)

सूर्यस्य हृदयादिकरान्तस्थानेषु हृदयादिमन्त्रान् विन्यस्य,
मूलेनैकत्वं कृत्वा, रक्षावकुण्ठने कृत्वा,
मूलेनामृतमुद्रां महामुद्राञ्च विधाय,
पाद्याचमनार्घ्याणि नमस्स्वधास्वाहान्तखषोल्किना दत्वा,
मूलेन वौषडन्तेन पुष्पदूर्वाक्षतादि च कृत्वा, ॐ खं
खषोल्काय नमः, इत्युपहृदयेनाभ्यङ्गादिपूर्वं संस्नाप्य,
रक्त *पुष्पगन्धादिभिरलंकृत्य, ॐ ह्रां ह्रीं सः सूर्याय
नमः, इति पुष्पाञ्जलित्रयेणाभ्यर्च्य अर्घ्यं दत्वा, पद्ममुद्रां
बिम्बमुद्रां च दर्शयेत् ॥

ततो लयाङ्गमभ्यर्च्य, भोगाङ्गपूजार्थं प्रार्थ्य,
आग्नेयैशाननैर्ऋतवायव्यदलेषु हृदयशिरश्शिखाकवचमन्त्रान्
सूर्यहृदयादिस्थानेभ्य आदाय,

सौम्यानि रक्तवर्णानि परदाञ्जकराणि च ।

भूषितानि द्विहस्तानि भानोरङ्गानि भावयेत्॥

p. 111)

इति विभाव्याभ्यर्च्य, देवस्याग्रतस्तद्वन्नेत्रं पूर्वोक्तरूपं
पूर्वादिचतुर्दलेषु अस्त्रं च

विद्युत्पुंज निभं चास्त्रमुग्रदंष्ट्राकरालिनम्।

इति ध्यात्वाऽभ्यर्च्य, हृदयादीनां धेनुमुद्रां
नेत्रयोर्गोविषाणमुद्रामस्त्रस्य त्रासनीमुद्रां च
प्रदर्श्यार्घ्ययेत्॥

तदनु पूर्वादिदलाग्रेषु ॐ सं सोमाय नमः, ॐ बुं
बुधाय नमः, ॐ बृं वृहस्पतये नमः, ॐ भं भार्गवाय
नमः, इति आग्नेयादिदलाग्रेषु, ॐ अं अङ्गारकाय नमः, ॐ शं
शनैश्चराय नमः, ॐ रं राह्वे? नमः, ॐ कं केतवे नमः, इति
च,

सोमं कुमुदकुन्दाभं बुधं चामीकरप्रभम्।
गुरुं गोरोचनाभासं शुक्रं गोक्षीरसन्निभम्॥

रक्तमङ्गारकं ध्यायेद्राजावर्तनिभं शनिम् ।

कृष्णं कृताञ्जलिं राहुं केतुं धूम्राहिसन्निभम् ॥

p. 112)

कामरूपधरान् सर्वान् दिव्याभरणभूषितान् ।

वामोरुन्यस्तहस्तांश्च दक्षहस्ताभयप्रदान् ॥

सितपद्मकरं सोमं राहुकेतू कृताञ्जली ।

अर्धकायोर्ध्वकेशौ च रक्ताग्रक्तलोचनौ ॥

शनि दंष्ट्राकरालन्तु राहुञ्च विकृताननम् ।

इति ध्यात्वाऽभ्यर्च्य, नमोमुद्रां दर्शयित्वा, अर्घ्यं दत्वा,

धूपदीपनैवेद्यपानीयतांबूलादिदर्पणच्छत्र-

-

* पा वस्त्रा

-

(८५) चामराण्यन्तरान्तरा आचमनार्घ्यदानसहितान्युपहृदा

दत्वा, मूलमन्त्रं यथाशक्ति जप्त्वा, अर्घ्यपात्रांभसा
स्वाहान्तमूलेन भास्कराय समर्प्य, अङ्गानां दशांशं
जप्त्वा, निवेद्य,

दण्डयाद्यैस्सेव्यमानो विमलमुखचतुस्सिंहपादासनस्थो
दीप्ताद्यैश्शक्तिजालैररुणमणिरुचिश्श्रीखषोल्कात्ममूर्तिः ।
स्वाङ्गस्वाङ्गग्रहर्क्षप्रमुखपरिवृतश्श्वेतपद्माधिरूढश्श्
वेताब्जां

p. 113)

सद्विहस्तश्शुभनयनयुगश्शंभुसूर्योऽवताद्वः ।

इति स्तोत्रादिकं पठित्वा, देवन्नमस्कृत्य, संपूज्य, (सूर्यः?
*खेसञ्चरतीति श्वषः तत्र उल्का इव वर्तमानः) खषोल्किना
स्वाहान्तेन पराङ्मुखार्घ्यं दत्वा, क्षमस्वेत्यभिधाय,
हुंफडन्तास्त्रेण नाराचमुद्रया अङ्गादिमन्त्रानुत्थाप्य, ॐ
खं खषोल्काय सूर्यमूर्तये नमः इति दिव्यमुद्रया देवे
संयोज्य, तन्मूलमन्त्रेण हृत्पुण्डरीकस्थे शिवसूर्ये योजयेत् ॥ (२०)

(प्र) अथ सन्ध्यावन्दनक्रममुदीर्य, सूर्योपस्थानमात्मेज्या
लिङ्गाग्निगुरुपुस्तकम् । इति नित्यं समाख्यातं
षडाधारशिवार्चनम् ॥ इति वचनात्

लिङ्गादिषडाधारशिवपूजनेषु सूर्याधारसपर्यायाश्च
नित्यतयाऽन्तर्गतत्वात् प्रथमन्तदर्चनविधिं दर्शयितुं
तत्पूर्वकरणीयन्निरूपयति

p. 114)

(ततः) इत्यादिना (उपहृत्य) इत्यन्तेन। ननु तर्हि शिवार्चनानन्तरं
तदर्चनमस्त्विति चेन्न सूर्यस्य सकलतया पूर्वमर्चनीयत्वात्। तथा
श्रीमदंशुमति

सकलस्सूर्यरूपस्तु निष्कलश्शिव एव च।
देहस्थं पूर्वमाराद्ध्य पश्चाद्देवं यजेद्बुधः॥

इति। ननु एतत्सूर्यपूजा कामनाविषयत्वात् मुमुक्षुभिः न कर्तव्येति
केचिंदूचिरे। तन्न

बुभुक्षुश्च मुमुक्षुश्च सकृन्नित्यं प्रपूजयेत्

इति श्रीमत्षट्सहस्त्रिकायामुक्तत्वात् मुमुक्षूणामपि कर्तव्येति
गुरवः। स्नानादिकर्म कृत्वा गृहं प्रत्यागच्छतः कृत्यमाह
(अस्त्र) इति। (अस्त्रपञ्जरमध्यगः)
अस्त्रमन्त्रमयविमानाभ्यन्तरगतः। आत्मानं

अस्त्रमयविमानमध्यवर्तिनं भावयन्निति तात्पर्यार्थः। तथा

श्रीमत्कामिके

विघ्नान्निरोध्य मार्गस्थानस्त्रात्मकविमानगः।

p. 115)

व्रजेद्देवालयं वापि गृहमात्मीयमुत्तमम्॥

इति। (पृथिव्यादितत्वानि) इति। अत्र

अप्तत्वादिमायान्ततत्वान्यादिशब्दार्थः। (सन्त्यजन्) (४६)

सोपानक्रमेणोल्लंघयन् इत्यर्थः। तथा श्रीसमनाथपद्धत्यां

धरादिमाया- पर्यन्त-तत्वसोपानपद्धतिम्।

लङ्घयन् शुद्धविद्यात्मसदाशिवपदं विशेत्॥

इति। (शुद्धविद्यातत्वान्तव्याप्तिकम्) शुद्धविद्याविधिव्यापकम्।

(उपाहृत्य) समानीयं॥

अथ सूर्यपूजाविधिमतिदिशति (पूर्वास्यः) इत्यादिना (योजयेत्)

इत्यन्तेन। ननु कथं सूर्यं पूजयेदित्याशंक्य तत्र तावत्

कुर्यात् कराङ्गविन्यासं सूर्यमूलाङ्गशंबरैः ।
विधाय देहसंशुद्धिं सूर्यशंबरभावतः ॥

भावयेद्भानुरूपेण स्वात्मानं भास्करं परम् ।

इति सिद्धान्तशेखरश्रुतिं हृदि निधाय सूर्यार्चकस्य
तत्स्वरूपसिद्धये

p. 116)

सकलीकरणप्रकारमाह (ॐ रः अस्त्राय फट्) इति ।

सौरहृदयाद्यङ्गमन्त्राणामुद्धारः प्रदर्शितः
श्रीरामनाथपद्धत्यां

सानुस्वारेण पूर्वेण स्वरेण हृदयं शिरः ।
हृद्बीजपूर्वगर्काय शिरसे नम इत्यतः ॥

ॐभूर्भुवस्स्वरों ज्वालिनी शिखायै नमश्शिखाम् ।
हूंकारेण सरेफेण कवचं भामिति ब्रुवन् ॥

नेत्रे च सविसर्गाग्निबीजमस्त्रं च पूजयेत् ।

इति । (अङ्गन्यासक्रममाह) (दक्षिणाङ्गुष्ठे) इति । (भोटिकया) इति ।
एतल्लक्षणमुक्तं मुद्रालक्षणे छोटिका
अङ्गुष्ठतर्जनीमूर्द्धभ्यां शब्दोत्थापनरूपा
विघ्नप्रोत्सारणरूपा प्रयोज्या इति ॥

ततः किं विदधीतेत्याशंकायां दर्शनार्घ्यं
दद्यादित्याह (पश्चात्) इति । (रक्तपुष्पादि) इति । आदिपदेन
रक्तचन्दनाद्युच्यते । तथा

p. 117)

श्रीमच्चिन्त्यविश्वसादाख्ये तत्पात्रे जलमापूर्य
रक्तचन्दनतण्डुलैः । रक्तपुष्पकुशैर्वापि इति । (अर्घ्यं कृत्वा) इति ।
अत्र मूलमन्त्रेणेति शेषः । एवमाख्यातं
श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण । (जानुभ्यामवनिं गतः)
महीनिहितजानुद्वय इत्यर्थः । सूर्यस्य
विशेषार्घ्यकरणविधिमभिधत्ते (ततः) इति ।
(ललाटमध्यस्फुरदरुणबिन्दुविनिस्रुतामृतधारया)
ललाटम्द्वयः अलिकान्तरालं तस्मिन् स्फुरन् प्रकाशमानः स
चासौ अरुणबिन्दुः रक्तवर्णसुधारूपतोयधारा तया ।
धेनुमुद्रालक्षणमुक्तं श्रीभोजदेवेन

अन्योन्यग्रथिताङ्गुलीषु कनिष्ठानामिकयोर्मध्यमातर्जन्योश्च
संयोजनेन गोस्तनाकारा धेनुमुद्रा इति ।

द्रव्यातमस्थानशुद्धिमाह (तज्जलैः) इति । (द्रव्यम्)
पूजोपकरणपुष्पाद्यम् । द्रव्यं वित्ते

p. 118)

गुणाश्रये इति नानार्थरन्तमाला । (आत्मानम्) स्वमस्तकमित्यर्थः ।
ननु क्रियाधारे सूर्यं यजेदित्याह (स्थण्डिले) इति । एतल्लक्षणमग्रे
वक्ष्यामः ॥

तत्र पूर्वं द्वारपूजामाचष्टे (तत्र द्वारदक्षिणपार्श्वे)
इति । (तत्र) स्थण्डिलादौ । दण्ड्याद्यर्कासनान्तमन्त्राणां
दीप्तादिशक्तिरहितानां बीजं सौरहृदयबीजमित्युच्यते । तथा
श्रीरामनाथपद्धत्यां शक्तीर्विनासनान्तानां हृदोबीजं
समुच्चरन् इति । दण्डिध्यानमाह (दण्डी) इति । दण्ड्यतेऽनेनेति दण्डो
लगुडः सोऽस्यायुधत्वेनास्तीति दण्डी । (द्वार्दक्षिणे) द्वाः द्वारं
स्त्रीद्वाद्वारं इत्यमरः । तस्याः दक्षिणं याम्यभागः तस्मिन् ।
(गौरः) श्वेतः । गौरोऽरुणे सिते पीते इति नानार्थरत्नमाला ।
(तुंदिलः) स्थूलः । शेषं सुगमम् । (तद्वामपार्श्वे)

द्वारवामभागे इत्यर्थः।

p. 119)

न तु दण्डिनः। तद्दक्षिणभागत्वादुत्तरदिशः।

द्वारमन्तर्मुखं ज्ञेयं द्वारपास्तु बहिर्मुखाः इति वचनेन

द्वारस्यान्तर्मुखत्वात् दण्डयुक्तरदिशः द्वारवामपार्श्वत्वं

सिद्धमित्यत्र तात्पर्यम्। यदुक्तञ्च प्राक् दण्डी द्वार्दक्षिणे इति।

पिङ्गलध्यानमाह। (पिङ्गलः) इति। (प्रतीहारः) द्वारपालः।

प्रतीहारो द्वारपालः इत्यमरः। सुबोधमन्यत्। रक्तवर्ण

इत्याद्यर्द्धकारिका कैश्चित् कचित् प्रक्षिप्तेप्युपेक्षिता।

गणपतिध्यानमाह (रक्तम्) इति। (दन्तम्) निजरदनम्। (फलम्)

आम्रफलम्। स्पष्टमन्यत्। (तस्य) आसनपद्मस्य। गुरुध्यानमाह

(जटा) इति। (नाभिस्थलोपरि) कृतयोगाख्यमुद्रम्)

नाभिस्थानोर्ध्वकृतचिन्मुद्रम्। स्फुटमन्यत्। प्रभूतासनं

श्वेतपीठमयम्। तथा श्रीरामनाथपद्धत्यां

श्वेतपीठात्मकं मध्ये प्रभूतासनमर्चयेत् इति।

p. 120)

सिंहासनपादपूजामाह (आग्नेयादि) इति।

दीप्तादिनवशक्तिपूजामाह (तस्य) इति। (तस्य) पद्मस्य।

दीप्तादिशक्तिमन्त्राणामुद्धारः प्रदर्शितः

श्रीरामनाथपद्धत्यां त्यक्त्वाऽकारमिकारं च

षडर्णानन्तिमस्वरम्। क्रमाद्रेफाद्यनुस्वारस्वरा

दीप्तादिवाचकाः॥ इति। तासां ध्यानमाह (दीप्त) इति। तत्र

पक्षान्तरमाह (यद्वा) इति। सुकरः श्लोकार्थः।

विस्फुरमुद्रालक्षणमुक्तं श्रीभोजदेवेन

संमुखहस्ताकुञ्चितां गुल्यग्रोपरि अङ्गुष्ठचालनाद्विस्फुरां

इति। अर्कासनं मायातत्वान्तव्यापकम्। सूर्यध्यानमाह (धवल)

इति। (अंसासक्तस्फुटश्वेतसनालाब्जकरद्वयम्) अंसौ भुजशिरसी

तयोरासक्तञ्च संलग्नं स्फुटं च विकचं

व्याकोशविकचस्फुटाः इत्यमरः। श्वेतञ्च धवलं सनालं च तत्

अब्जञ्च पद्मं तत् करद्वये यस्य स

p. 121)

तथोक्तः तम्। (भानुम्) सूर्यं भानु रश्मिदिवाकरौं इत्यमरः।

स्फुटमन्यत् सूर्यमूर्तिः सदाशिवतत्वान्तव्याप्तिका।

एतन्मन्त्रोद्धारश्च कृतः श्रीरामनाथपद्धत्यां ॐ खं

खषोल्काय सूर्यमूर्तये नम इत्यपि इति। (नेत्रे दत्वा) इति। अत्र

गोविषाणमुद्रयेति शेषः। सूर्यावाहनक्रममाह (पुष्पैः) इति।

(अञ्जलिम्) करपुटद्वयम्। (ललाटाकृष्टस्फुरदरुणबिन्दुम्) इति

शब्दस्य तथाभूतबिन्दुगततेज इत्यर्थः। मूलमन्त्रं

शक्तितत्वान्तव्याप्तिकमुच्चरेत्। तदुक्तं माया सदेशशक्त्यन्तं

शिवाशिवोष्णरोचिषोः इति । तथा श्रीरामनाथपद्धत्यां

साग्निं सबिन्दुं हाकारं हीकारान्तत्समन्वितम् ।
सविसर्गं सकारञ्च सूर्यायेति पदं ततः ॥

नमश्चोच्चार्य शक्त्यन्तं रक्तं बिन्दुगतं महः ।
पुष्पाञ्जलिगतं ध्यात्वा बाह्ये संस्थाप्य विग्रहे ॥ इति ।

p. 122)

(तद्व्यापकम्) खषोल्कात्ममूर्तिव्यापिनम् ।
आवाहिन्यादिनिष्ठुरान्तमुद्राणां लक्षणं शिवावाहनप्रस्तावे
दर्शयिष्यामः । (बिम्बमुद्राम्) इति । एतल्लक्षणमुक्तं मुद्रालक्षणे
संबद्धपाणितला वक्राग्रसंसक्तानामिकाद्वया सूर्यस्य
दर्शनीया इति । (हृदयादिकरान्तस्थानेषु) हृदयं आदिर्येषान्तानि
हृदयादीनि करः अन्ते येषान्तानि करान्तानि हृदयादीनि च तानि
करान्तानि च हृदयादिकरान्तानि तानि च तानि स्थानानि च तथोक्तानि
तेषु । (एकत्वम्) हृदयाद्यङ्गानामङ्गिना सार्द्धमपृथग्भावम्
। अमृतमुद्रालक्षणमुक्तं प्राक् । (पायाचमनार्घ्याणि) पाद्यं
च पादार्हवारि आचमनं च वक्त्रप्रदेयं जलं अर्घ्यं च शिरः
प्रदीयमानमुदकं तथोदितानि । (खषोल्किना) ॐ खं खषोल्काय
नमः, इति मन्त्रेण । अत्र ॐ खं खषोल्काय नमः इति

p. 123)

पादयोः पाद्यं स्वधान्तेन तेन मुखे आचमनं स्वाहान्तेन तेन
शिरसि अर्घ्यं दद्यात्। यद्वक्ष्यति संहृदा नमोन्तेन पादयोह्
पाद्यं स्वधान्तेनेशानादिमुखपञ्चकेष्वाचमनं
स्वाहान्तेन तथैव शिरः पञ्चकेष्वर्घ्यं दत्वा इति। (अभ्यङ्गादि)
इति। आदिपदेन उद्वर्तनादि निगद्यते। तथा श्रीरामनाथपद्धत्यां

तदङ्गस्थानि पुष्पाणि व्यपोह्यास्त्रमुदीरयन्।
अभ्यज्योद्वर्त्य निर्मृज्य क्रमान्मूलास्त्रनामभिः॥

इति। (संस्नाप्य) इति। अत्र अभ्यङ्गादिस्नपनाङ्गानि विभाव्य
अर्घ्योदकबिन्दुना संस्नापयेत्। पद्ममुद्रालक्षणमुक्तं
श्रीभोजदेवेन पद्माकारौ करौ कृत्वा मध्येऽङ्गुष्ठौ
कर्णिकाकारौ विन्यसेत् इति। बिम्बमुद्रालक्षणं प्राक् प्रदर्शितम्॥

ततः किं कुर्यादित्याकांक्षायां लयाङ्गपूजापूर्वं

p. 124)

भोगाङ्गमर्चयेदित्याह (ततः) इति। (लयाङ्गमभ्यर्च्य) इति। अत्र
हृदयादिलयाङ्गस्थानेषु हृदयादिमन्त्रैरर्चयेत्। केषु स्थानेषु

कथं पूजयेदित्याह (आग्नेयैशान) इति। हृदयाद्यङ्गस्थानमाह

(सौम्यानि) इति (सौम्यानि) रम्याणि अनुग्राणि वा। सौम्यः पुमान्

बुधे विप्रे त्रिषु स्यात् सोमदैवते। रम्येऽनुग्रे च इति

नानार्थरत्नमाला। स्पष्टमपरम्। (देवस्य) देवनशीलस्य

सूर्यस्येत्यर्थः। (अग्रतः) पश्चिमदल इत्यर्थः। (तद्वत्) इति।

नयनस्थानादादायेत्यर्थः। (पूर्वोक्तरूपम्)

हृदयाद्यङ्गोदीरितस्वरूपम्। सूर्यास्त्रस्य ध्यानमाह (विद्युत्) इति।

सुकरः श्लोकार्थः।

गोविषाणमुद्रात्रासनीमुद्रयोर्लक्षणमुपलक्षितं

श्रीमद्भोजदेवेन बद्धमुष्टेर्दक्षिणहस्तस्य

मध्यमातर्जन्योर्विस्तारितप्रसारणेन गोविषाणा।

बद्धमुष्टेर्दक्षिणहस्तस्य प्रसारिततर्जन्या

p. 125)

वामहस्ततलताडनरूपा त्रासनी इति। (अर्घ्ययेत्) अर्घ्यं दद्यात्।

ननु भानोर्हृदयाद्यावरणादन्यदावरणं नास्ति

किमित्याशंक्य सोमाद्यावरणमस्तीत्याह (तदनु) इति। सोमादीनां

मन्त्रोद्धारः प्रदर्शितः श्रीरामनाथपद्धत्यां

स्वनामाद्यक्षरं बीजं ग्रहाणां बिन्दुसंयुतम् इति।

सोमादिध्यानमाह (सोमम्) इति। (कुमुदकुंदाभम्) कुमुदञ्च

कैरवं कुन्दञ्च माध्यं कुमुदकुन्दे तयोरामेवाभा यस्य स

तथोक्तः तम्। सिते कैमुदकैरवे माध्यं कुन्दम् इति चामरः।

(चामीकरप्रभम्) स्वर्णवर्णम्। (गुरुम्) वृहस्पतिम्।

गुरूगीष्पतिपित्राद्यौ इत्यमरः। (राजावर्तनिभम्) राजावर्तः

कृष्णवर्णः पुष्पविशेषः तस्य सन्निभस्तुल्यः तम्। (शनिम्) इति।

शनिर्नाम सूर्याच्छायादेव्यामुत्पन्नः सर्वग्रहमण्डलादुपरि

वर्तमानो गतिदृष्टिभावभेदैर्जगतां

p. 126)

शुभाशुभहेतुर्ग्रहविशेषः। शनिर्मन्दः

खेटकोणच्छायापुत्रासिर्कजाः इति वैजयन्ती। (राहुम्) इति। रहयति

चन्द्रार्काविति राहुः सिं?हिकासुतस्य आस्यात्मा (५०) ग्रहतिशेषः इति।

कात्यायनस्तु राहुश्चन्द्रस्य ग्राहकः स्वर्भानुः सूर्यस्येत्याह

(उपरागरूपपुण्यकालसंपादनादिकार्यार्थं

राहुरूपत्वाद्राहुः। (केतुम्) इति। केतुर्नाम संहितासुतस्य

कलेबरात्मा सुधापानप्रभावतो हरप्रसादाच्च

ग्रहमण्डलवर्ती ग्रहविशेषः। (अर्द्धकायोर्ध्वकेशौ)

कायस्यार्द्धौ अर्द्धकायौ तौ च तौ ऊर्ध्वकेशौ च

ऊर्ध्वमुखशिरोरुहौ तथोदितौ। अत्र शिरोमात्रं राहुः

शरीरमात्रं केतुः इत्यवसेयम्। (दंष्ट्राकरालम्) दंष्ट्रया

करालः भीषणः तम्। करालो दन्तुरे तुङ्गे भीषणे च इति

नानार्थरत्नमाला । नमोमुद्रालक्षणमाम्नातं

सतताङ्गुलिसंलग्नौ

p. 127)

हस्तौ हृद्देशमाश्रितौ । सर्वेषां बन्धनं कार्य

वामाङ्गुष्ठेन पीडय च । नमस्कारेति विज्ञेया सर्वकर्मणि

कारयेत् । इति । (उपहृदा) खषोल्काय नमः इति मन्त्रेण । यदुक्तं प्राक्

ॐ खं खषोल्काय नमः , इत्युपहृदयेनेति । तथा च व्याहृतं

श्रीमत्सोमशंभुचरणैः धूपदीपादिनैवेद्यं देयं सर्वं

खषोल्किना इति । (दशांशम्) दशभागम् । सूर्यमूलेन यदि

शतञ्जप्तं तदा तदङ्गानामेकैकस्य दशदश जपेदिति तात्पर्यम्

। स्तोत्रादिकं वक्ति (दण्डयाद्यैः) इति । (दण्डाद्यैः) दण्डी दण्डया

पदेन पिङ्गलादय उच्यन्ते । (विमलमुखचतुस्सिंहपादासनस्थः)

विमलः विमलाभिधः सिंहः मुखं प्रधानः येषां ते इति

नानार्थरत्नमाला । ते च ते चतुस्सिंहाश्च पादाः यस्य

तद्विमलमुखचतुस्सिंहपादं तच्च तत् आसनञ्च तत्र निष्ठतीति

तथोक्तः । मुखपदेन

p. 128)

सारादयो गृह्यन्ते । (शक्तिजालैः) शक्तिसमूहैः । जालं समूहं

आनायो गवाक्षक्षारयानपि इत्यमरः ।

(स्वाङ्गस्वाङ्गग्रहर्क्षप्रमुखपरिवृतः) स्वाङ्गानि

स्वकीयावयवहृदयाद्यङ्गानि स्वाङ्गग्रहर्क्षप्रमुखाः

स्वाङ्गाश्च निजपरिवाराः अङ्गं

गात्रान्तिकोपायप्रतीकेष्वप्रधानके इति नानार्थरत्नमाला ।

ग्रहाश्च ग्रहशब्दवाच्याः अर्कादयो ग्रहाः इत्यमरः ।

ऋक्ष?प्रमुखाः ऋक्षाणि नक्षत्राणि तेषां प्रमुखाः प्रकर्षेण

प्रधानाः चन्द्राङ्गारकादय इत्यर्थः । स्वाङ्गानि च

स्वाङ्गग्रहर्क्षप्रमुखाश्च स्वाङ्गस्वाङ्गग्रहर्क्षप्रमुखाः

तैः परिवृतः संवीतः । (शेताब्जां सद्विहस्तः) श्वेताब्जं

धवलाम्बुजं अंसयोः भुजशिरसोः द्विहस्तयोश्च यस्य स तथोक्तः

। (वः) युष्मान् । (भवतात्) पायात् । (स्फुटमन्यत् । अत्र गुरुः वः इति

लोकस्य अवनं प्रार्थयते स्वस्यापि लोकान्तर्भूतत्वात्

p. 129)

निजावनमेव प्रार्थयत इति भावः । इदं पद्यं प्रक्षिप्तमपि

व्याख्यातम् । (पराङ्मुखार्घ्यम्) विसर्जनाय देयमर्घ्यम् । तथा

समभिहितं श्रीमत्सर्वज्ञानोत्तरे विसर्जने तु गाङ्गेय

देयमर्घ्यं पराङ्मुखम् इति (क्षमस्व) सहस्व ।

नाराचदिव्यमुद्रयोर्लक्षणमग्रे दर्शयिष्यामः ॥

तेजश्चण्डपूजा ॥

(क्रि) (२२) ततश्चैशान्यां दिशि, ॐ अं तेजश्चण्डाय नमः इति

चण्डं रक्तं करालास्यमब्जाभयकरद्वयम् ।

इति भावयन् संपूज्य, निर्माल्यं निवेद्य, विसृज्य, अर्घ्यञ्च विसृजेत् ।
यद्वा शिवपूजान्ते विसृजेत् ॥ (२२)

(प्र) अथ मार्ताण्डपूजाप्रकारमभिधाय
तदीयचण्डार्चनविधिमाह (ततः) इत्यादिना (विसृजेत्) इत्यन्तेन ।
सूर्यविसर्जने विकल्पमाह (यद्वा) इति ।

शिवपूजाङ्गद्वारपूजा ॥

p. 130)

(क्रि) (२२) अथाचम्य, सकलीकृत्य, सामान्यार्घ्यपात्रमस्त्रेण
संशोध्य, हृदयेन वौषडन्तेन शुद्धजलेनापूर्य, प्रणवेन
सप्तधा संपूज्य, अभिमन्त्र्य, रत्ना?वकुण्ठनामृतीकरणानि
विधाय, द्वारमस्त्रेण संप्रोक्ष्य, तस्योर्ध्वोदुम्बरे दक्षिणभागे

लंबोदरं श्मामनिभं गणेशं

कुठारमक्षस्त्रजमूर्ध्वगाभ्याम्। सल्लड्डुकं दन्तमधः

कराभ्यां वामेतराभ्याञ्च दधानमीडे॥

इति ध्यात्वा, ॐ हां गणपतये नमः इति संपूज्य,

तदुत्तरभागे

शुक्लां शुक्लांबरामक्षमालापुस्तकधारिणीम्।

सव्यवामकराभ्याञ्च सुप्रसन्नां सरस्वतीम्॥

(५२) इति विभावयन्, ॐ हां सरस्वत्यै नमः, इत्यभ्यर्च्य, तयोर्मध्ये

वामदक्षिणहस्ताभ्यां दधतीं श्रीफलाम्बुजे।

हेमाभां सघटेभाभ्यां प्लाव्यमानं महाश्रियम्॥

p. 131)

इति ध्यात्वा, ॐ हां महालक्ष्म्यै नमः, इत्यभ्यर्च्य, आत्मनो

दक्षिणशाखायां

रक्तं त्रिनेत्रं जटिलं सव्यवामकरद्वये।

अक्षमालां त्रिशूलञ्च दधानं नन्दिकेश्वरम्॥

इति ध्यात्वा, ॐ हां नन्दिने नमः इति संपूज्य तदुत्तरभागे

मकरासनगां गङ्गां सव्यवामकरद्वये ।
नीलोत्पलं पूर्णकुंभं दधतीं शुक्लरूपिणीम् ॥

इति ध्यात्वा, ॐ हां गङ्गायै नमः, इति संपूज्य,
तदुत्तरशाखायां

कृष्णं ऋक्षं महाकालं वामसव्यकरद्वये ।
कपालञ्च त्रिशूलञ्च दधानं विकटाननम् ॥

इति ध्यात्वा, ॐ हां महाकालाय नमः, इत्याराध्य,
तद्दक्षिणपार्श्वे

श्यामां कूर्मस्थितां वामसव्यहस्तद्वये घटम् ।
नीलोत्पलञ्च बिभ्राणां यमुनाञ्च विभावयेत् ॥

p. 132)

इति ध्यात्वा, ॐ हां यमुनायै नमः, इत्यभ्यर्च्य रक्षामेषां
विज्ञाप्य,

(प्र) अथ सूर्यादिषड्विधाधारेषु प्रथमं
सूर्यार्चनविधिमुदीर्य अधुना लिङ्गाधिकरणं शिवपूजां
वक्तुं तन्मन्दिररक्षार्थं द्वारसपर्या वक्ति (अथ) इत्यादिना
[विज्ञाप्य] इत्यन्तेन। अथ सूर्यार्चनानन्तरम्। (आचम्य) इति।
पूर्वोक्तसौरभावनानिवृच्यर्थमेतत्। द्वारार्चनार्थं
सामान्यार्घ्यस्थापनक्रममाह (सामान्यार्घ्यपात्रम्) इति।
(शुद्ध जलेन) बिन्दुपरिस्रुतसुधारूपतोयेन। (प्रणवेन)
मुमुक्षुभिरसकृदावर्त्यमानोऽप्यादरातिशयात् क्षणे क्षणे
प्रकर्षेण नवो भवन् यः सः प्रणवः तेन ओमित्येकाक्षरेण। तथा
श्रीमत्सुप्रभेदे ओमित्येकाक्षरं ब्रह्म वदन्ते सर्वयोगिनः।
(४३) प्रणवन्तु समासोक्तम् इति। (अभिमन्त्र्य) इति। अत्र
सप्तधेत्यनुसन्धेयम्। तथा श्रीमत्सहस्रे

p. 133)

प्रणवं सप्तधाऽऽमन्त्र्य धेनुमुद्रां प्रदर्शयेत् इति। ततः
किमित्याकांक्षायां द्वारयजनक्रममाह (द्वारम्) इति। (द्वारम्)
पश्चिमद्वारम्। अत्र पश्चिमद्वारपूजैव चललिङ्गविषये प्रशस्ता।
स्थिरलिङ्गविषये तु यथाद्वारं पूजा कर्तव्येति तात्पर्यम्। तथा
श्रीमदंशुमति खेटके पश्चिमे देशे द्वारं संपूज्य देशिकः
इति। तथा चोक्तं श्रीमद्वालज्ञानरत्नावल्याम्। तदनु
पश्चिमद्वारे द्वारपालानर्चयेत्। कथमिति चेत् पश्चिमद्वारस्य

पार्थिवत्वात् सद्योजातमयत्वात् पार्थिवस्य सिद्धिप्रदत्वात्। तथा आवाहयेत् पश्चिमद्वारं सिद्धिकामस्समीहिते इति। अत्र केचित् सदाशिवस्य पश्चिमाभिमुखत्वं व्यावर्णयन्ति। तदयुक्तं सद्योजातस्य मूर्तित्वात् सृष्टिकारणत्वाच्च। तथा ईशमूर्द्धा स पुवक्त्रोऽघोरहृद्वामगुह्यकः।

p. 134)

सद्योमूर्तिश्च सादाख्यः प्रागास्यो हृदयांघ्रिकः॥

इति। ततः सदाशिवस्य पूर्वाभिमुखत्वं उक्तरीत्या वक्ष्यमाणेन च परिभाव्य पश्चिमद्वारे द्वारपालानर्चयेत्। किञ्च स्वात्मसदाशिवयोर्दक्षिणवामत्वं पश्चिमद्वारस्यैव भवतीति। यद्वक्ष्यति च पश्चिमे नित्यवत् द्वारपालानाराध्य इति। तत्र द्वारपालेषु गणपतिपूजां प्रथममाह (तस्य) इति। (तस्य) द्वारस्य। (ऊर्ध्वोदुम्बरे) उपरिस्थदेहल्याम्। उदुम्बरो द्रुदेहल्योः इति नानार्थरत्नमाला। (दक्षिणभागे) इति। अत्र पूजकापेक्षया दक्षिणवामविभागो गन्तव्यः। तदुक्तं श्रीमताभोजदेवेन नन्दिगङ्गे महाकालयमुने चात्मनो दक्षिणवामशाखयोः इति। तस्य ध्यानमाह (लम्बोदरम्) इति। (कुठारम्) परशुम्। (ईडे) वन्दे। शेषं सुगमम्॥

सरस्वतीपूजामाह (तदुत्तरभागे) इति । तस्य

p. 135)

गणपतेः उत्तरपार्श्वे । तस्या ध्यानमाचष्टे (शुक्लाम्) इति ।
(सव्यवामकराभ्याम्) दक्षिणवामकराभ्याम् ।
वामदक्षिणयोस्सव्यम् इति नानार्थरत्नमाला । स्फुटमन्यत् ।
महालक्ष्मीसपर्यामाह (तयोः) इति । (तयोः) गणपतिसरस्वत्योः ।
तस्या ध्यानमाह (वाम) इति । (श्रीफलांबुजे) श्रीफलं च
बिल्वफलं बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि इत्यमरः
। अम्बुजं च पद्मं ते । (सघटेभाभ्याम्) घटेन कुंभेन सह
वर्तेते इति सघटौ तौ च तौ उभौ च गजौ सघटेभौ ताभ्याम् ।
(प्लाव्यमानाम्) अभिषिच्यमानाम् । उभयतः
पुष्करपरिधृतकुंभाभ्यामुभाभ्यामिभाभ्यां
अभिषिच्यमानं इत्यर्थः ॥ सुकरः श्लोकार्थः । नन्दिपूजामाह
(आत्मनः) इति । ननु नन्दिसपर्या पूर्वोक्तस्थाने किं इति शंकां
वारयति (दक्षिणशाखायाम्) इति ।
स्वदक्षिणपार्श्वस्थद्वारशाखायामित्यर्थः ।

p. 136)

तस्य ध्यानमाह (रक्तम्) इति । (जटिलम्) जटावन्तम् । सुबोधमन्यत् ।
गङ्गासमाराधनमाह (तदुत्तरभागे) इति । तस्य नन्दिनः

उत्तरपार्श्वे। तस्या ध्यानमाह (मकरासनगाम्) इति। स्पष्टः
श्लोकार्थः। महाकालस्यापवितिमाह (तत्) इति। (तदुत्तरशाखायाम्)
तस्याः गंगायाः उत्तरशाखा उदग्दिक्स्थितद्वारशाखा तस्यां
आत्मनो वामशाखायामित्यर्थः। तस्यं ध्यानमाह (कृष्णम्) इति
। (विकटाननम्) दंष्ट्राविकटमुखमित्यर्थः। तथा कृष्णं
पिङ्गजटं भीमं दंष्ट्राविकटवक्त्रकम् इति। स्फुटमन्यत्।
यमुनार्चामाहं (तत्) इति। (तद्दक्षिणपार्श्वे) महाकालस्य
दक्षिणभागे। तस्या ध्यानमाह (श्यामाम्) इति। सुकरः
श्लोकार्थः। अत्र गणपत्यादीनां स्वैस्स्वैर्मन्त्रैरर्घ्यं दद्यात्
इत्युदीरितं श्रीमता मृगेन्द्रपद्धतिव्याख्याकारेण। वक्ष्यति च
प्रतिष्ठाविधौ

p. 137)

पश्चिमे नित्यवत् द्वारपाला चाभ्यचर्यार्घ्ययित्वा इति। (एषाम्)
गणपत्यादिद्वारपालानाम्। (विज्ञाप्य) इति। भवद्भिः
पूजास्थानस्य रक्षकत्वेन स्थातव्यमाहितादरैरिति
प्रार्थ्येत्यर्थः॥

विघ्नोच्चाटनम्॥

(क्रि) (२३) न्यस्तमूलेन चक्षुषोर्ध्वं विलोक्य, दिव्यान्, ॐ अः अस्त्राय

फट् इति ज्वलन्नाराचमुद्रया अस्त्रेण पुष्पं क्षिप्त्वा अन्तरिक्षगान्, ॐ
हुं फट्, इति पाशुपतास्त्रेण दक्षिणपार्ष्णिघातत्रयेण
भूमिष्ठांस्त्रिविधान् विघ्नान् यागगृहादुद्वास्य ॥ (२३)

(प्र) अथ द्वारपालार्चां व्यपदिश्य, शिवपूजाया
निर्विघ्नसमापनाय विघ्नोच्चाटनमाचष्टे (न्यस्त) इत्यादिना
(उद्वास्य) इत्यन्तेन । (न्यस्तमूलेन) न्यस्तः
अङ्गुष्ठानामिकाभ्यां विन्यासितः मूलः, ॐ हां हौं शिवाय
नमः, इति मायान्तोच्चारितमन्त्रो

p. 138)

यस्य तत् तथोक्तं तेन । तथा श्रीमच्चिन्त्यविश्वसादाख्ये,
अङ्गुष्ठानामिकाभ्यां ॐ हौं शिवायनमोन्तकम् । नेत्रद्वये च
विन्यस्य निरीक्ष्य दिव्यविघ्नकान् ॥ इति । (चक्षुषा) इति (५५)
न्यस्तमूलतया दिव्यदृष्ट्येत्यर्थः । तथा समादिष्टं
श्रीमत्सोमशंभुचरणैः दिव्यदृष्टिनिपातेन दिव्यानुपरिवर्तिनः ।
इति । (दिव्यान्) दिव्याः दिविभवाः तान् । (अन्तरिक्षगान्)
अन्तरिक्षमाकाशं गच्छन्तीत्यन्तरिक्षगाः तान् ।
(दक्षिणपार्ष्णिघातत्रयेण) दक्षिणपार्ष्णिः
दक्षिणपादपार्ष्णिः पुमान् पार्ष्णिस्तयोरधः इत्यमरः । तस्य
घाताः आहतयः तेषां त्रयं तेन । (भूमिष्ठान्) भूमौ

तिष्ठन्तीति भूमिष्ठाः तान्। (त्रिविधान्)

दिव्यान्तरिक्षगभूमिष्ठभेदेन त्रिप्रकारान्। (उद्वास्य) उच्चाट्य ॥

p. 139)

शिवधामप्रवेशादिकम् ॥

(क्रि) (२८) किञ्चिद्वामशाखां समाश्रयन्

दक्षिणपादपुरस्सरमन्तः प्रविश्य, देहल्यां, ॐ हः अस्त्राय

द्वारपालाय नमः, इत्यत्र वक्ष्यमाणरूपं विभाव्य,

संपूज्य, प्रादक्षिण्येन गत्वा, नैर्ऋते, ॐ हां वास्त्वधिपतये

ब्रह्मणे नमः, इति

हंसस्थं तुन्दिलं गौरं सश्मश्रुचतुराननम्।

दधानं दक्षिणे वामे दण्डाक्षस्त्रुक्कमण्डलुम् ॥

इति ध्यात्वा, संपूज्य,

(प्र) अथ दिव्याद्यन्तरायनिरसनक्रममुदीर्य,

शिवधामप्रवेशनं तदनन्तरकरणीयञ्चाह (किंचित्) इत्यादिना

(ध्यात्वा), इत्यन्तेन। (किंचिद्वामशाखां समाश्रयन्

दक्षिणपादपुरस्सरमन्तः प्रविश्य) इति। एतत्

शाखागतदेवानुसरणार्थमिति व्यपदिष्टं श्रीमता

सोमशम्भुपद्धतिव्याख्याकारेण । (देहल्याम्) अधोदुम्बरे ।

गृहावग्रहणी

p. 140)

देहली, इत्यमरः । (अस्त्रम्) शिवास्त्रम् । तथा, शिवास्त्रं देहलीमध्ये

पूर्ववच्चासनादिकम्, इति । (वक्ष्यमाणरूपम्) अथास्त्रं च

दंष्ट्रिणं पिङ्गद्युतिम्, इति वक्ष्यमाणस्वरूपम् । अत्र

देहल्यामस्त्रार्चनं दिव्यादि

प्रत्यूहनिवहानामत्यन्तन्यपोहनायेत्यवसेयम् । तथा

श्रीमत्पञ्चावरणस्तवे गुरुभिरादर्शितं,

कल्पान्ताग्निप्रभञ्चास्त्रमधोदुम्बरगं भजे ।

दिव्यान्तरिक्षभूमिष्ठविघ्नसङ्घनिवारकम् ॥ इति ।

ततः किं कुर्यादित्याह (नैर्ऋते) इति । वास्त्वधिपति ब्रह्मध्यानमाह

(हंसस्थम्) इति । (गौरम्) पीतवर्णम् । गौरोऽरुणे सिते पीते इति

नानार्थरत्नमाला । (सश्मश्रुचतुराननम्) श्मश्रुभिः

मुखरोमभिः सह वर्तन्त इति सश्मश्रूणि तानि च तानि चतुराननानि

यस्यं स तथोक्तः तम् । (दण्डाक्षस्रुक्कमण्डलुम्) अत्र दण्डः

स्रुवः अक्षः

p. 141)

अक्षमाला । सुबोधमन्यत् । (संपूज्य) इति पूर्वेणान्वयः ॥

पूजोपकरणसमाहरणप्रकारः ॥

(क्रि) (२५) स्नपनार्थं

गड्डुकांश्चतुस्संस्कारसंस्कृतांस्तोयवस्त्रञ्चास्त्रेण

प्रक्षाल्य, हृदयेन पटपरिस्रुततोयेन सुधापुरेणापूर्य,

यागार्थं पुष्पादिसर्वद्रव्याण्युपाहृत्य,

(प्र) अथ शिवधामनिवेशनादिकं व्यपदिश्य स्नपनतीर्थादि

पूजोपकरण समाहरणप्रकारमाह (स्नपनार्थम्) इत्यादिना

(उपाहृत्य) इत्यन्तेन । (गुड्डुकान्)

अष्टोत्तरशतादिसंख्याकाभिषेककलशान् । तथा

श्रीमज्ज्ञानरत्नावल्यां, शतं साष्टोत्तरं वार्द्धं

तदर्द्धाष्टौ सदैव हि । गड्डुकानि प्रदेयानि यथाविधिरनुक्रमात्

॥ इति । यद्वक्ष्यति? च , जलबिन्दून् स्नानतोयभाण्डेषु सपुष्पं

निक्षिप्य, इति । स्थापितशिवकलशेनापि

p. 142)

संस्नाप्य, इति च। (चतुस्संस्कारसंस्कृतान्) चत्वारः संस्काराः
चतुस्संस्काराः ते चात्र निरीक्षणादयः तैः संस्कृताः
समाहितातिशयाः तान्। तथा श्रीमत्कामिके

रङ्गणं मूलमन्त्रेण प्रोक्षणञ्चास्त्रमन्त्रतः।
ताडनञ्चास्त्रमन्त्रेण वर्मणाऽभ्युक्षणं भवेत्॥

इति। (उपाहृत्य) सन्निधीकृत्य॥

भूतशुद्धिः॥

(क्रि) (२६) देवस्य दक्षिणदिग्भागे ब्रु?स्याद्यासने
उदङ्मुखस्युखासनं समुपविश्य,
अस्त्रप्राकारकवचावकुण्ठनाभ्यां यागगृहं संरक्ष्य,
शिवी?करणं कुर्यात्। तत्र पूर्वं करन्यासं विधाय।
पादाङ्गुष्ठद्वयादारभ्य यावद्वस्ति द्विरूपामूर्ध्वं
ब्रह्मनिलान्तमेकरूपां, हृतकण्ठादिष्विडापिङ्गलाभ्यां
संयुक्तामुधोमुखपद्ममुकुलयुक्तां सुषिररूपां सुषुम्नां
सञ्चिन्त्य तस्या एवान्तर्बहिरस्त्र

वदमृतधारां परमव्योमरूपिणीं शक्तिं विभाव्य, मध्ये
हूंकारं ज्वलन्तं (जीव) सञ्चिन्त्य पूरकं ?

(५७) कुंभकञ्च कृत्वा, हूंकारे चित्तं निवेश्य, वायुमूर्ध्वं
विरेचयेत् ॥

हूं फट् इति सन्ततोच्चारेण पद्ममुकुलानूर्ध्वमुखान्
भिन्नग्रन्थींश्च विधाय, प्रति उनिवर्त्य, दक्षिणनाड्या विरेच्य,
पुनः पूरकवायुना संहृतचैतन्यं हृत्कमलाश्रितं
स्फुरत्तारकाकारं सान्तबीजमयं जीवं हृत्संफुटितं
हूंकारमूर्ध्नि विन्यस्य । बीजविग्रहं हूंकारशिखान्तस्स्थं
पुर्यष्टकावच्छिन्नं पुरुषं सूक्ष्मं
बिन्दुभूतमेकाकिवन्निरामयं ध्यात्या ।

कुंभकं कृत्वा, वायुमूर्ध्वं प्रवर्तयन्
संहारमुद्रयाऽऽदाय,
ब्रह्मादिकारणत्यागक्रमेणैकेनोद्घातेन ॐ हूं हां हं हां
हूं आत्मने नमः इति भोग्यकर्मोपभोगार्थं द्वादशान्ते शिवे
संयोजयेत् ॥

p. 144)

एवं बीजवृच्या शिवे लीनः सूक्ष्मदेहविशुद्धये प्रातिलोम्येन
स्वेषु स्वेषु कारणेषु तत्वानि बिन्दुपर्यन्तं लयं नयेत्॥

तद्यथा गन्धे पृथ्वी, रसे जलं, रूपेऽग्निः स्पर्शे वायुः
शब्दे व्योम, एतास्तन्मात्रास्तामसाहङ्कारे,
वाक्पाणिपादपायूवस्थाख्यानि राजसाहंकारे,
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि मनश्च सात्विकाहंकारे, स च
बुद्धौ, सा गुणेषु, गुणतत्वं पकृतौ, सा रागविधे च कलायां,
पुंस्तत्वं कालो नियतिः कला च मायायां, एवं विलीनानीति
विभाव्य, शुद्धिविद्यातत्वमीश्वरतत्वे, तत् सदाशिवतत्वे,
तच्छक्तितत्वे, तच्च शिवतत्वे, तदप्यक्षुब्धरूपे बिन्दौ विलीनमिति
भावयेत्॥

यद्वा शब्दस्पर्शौ त्यजेद्वाह्ये रसं वै केशवे, त्यजेत्।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहंकारमीश्वरे॥

मनोबिन्दू क्रमादेव तत्वज्ञानी शिवे त्यजेत्।

p. 145)

ततः स्थूलदेहं विशोधयेत्। पार्थिवं मण्डलं पीतं
कठिनं वज्रलाञ्छितं। *?मिति पार्थिवबीजेनाधिनायकेन

सद्योजातेनाधिष्ठितं ब्रह्मणा कारणेश्वरेण

-

२ पा विरेचयन्॥

३ पा- निवृत्य॥

* पा- मनोबिन्दौ लये चैव तत्वज्ञाने शिवे त्यजेत्॥

-

(५८) युक्तं निवृत्तिकलारूपं चतुरश्रं पादादारभ्य
मूर्धान्तं विचिन्त्य, ॐ ह्लां ह्लां ह्लां ह्लां ह्लां
निवृतिकलायै हः हुं फट्, इति पूरकपूर्वं सुषुम्नायां
यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा, प्रतिनिवर्त्य,
दक्षिणनाड्या रेचयेत्। इत्युद्घातपञ्चकेन
गन्धरसरूपस्पर्शशब्दगुणानुत्सार्य, पृथ्वीं
स्वविरुद्धवायुनाभिभूतां तदाकारान्वितां चिन्तयेत्॥
तदनु आप्यं मण्डलं द्रवस्वभावमर्धचन्द्रनिभं सौम्यं
शुभ्रमंभोजलाञ्छितं ह्रीमित्याप्य

p. 146)

बीजेन वामदेवेनाधिनायकेनाधिष्ठितं विष्णुना कारणेश्वरेण
युक्तं प्रतिष्ठाकलारूपं।

(ह्रीं) पूर्ववद्विभाव्य, पूर्वोक्तवदुद्घातचतुष्टयेन
रसादिगुणचतुष्टयमुत्सार्य, जलं स्वविरुद्धवह्निनाभिभूतं
तदाकारं भावयेत्॥
ततः आग्नेयं मण्डलं त्र्यश्रं रक्तं स्वस्तिकलांछितं
ह्रूमिति वह्निबीजेनाधिनायकेनाघोरेणाधिष्ठितं रुद्रेण
कारणेश्वरेण युक्तं विद्याकलारूप (ह्रूं) मुद्घातत्रयेण
रूपादिगुणत्रयमुत्सार्य, तद्धि? स्वविरुद्धजलेनाभिभूतं
तदाकारं भावयेत्॥
पश्चात् षडश्रं मण्डलं वायोर्बिन्दुभिष्षड्भिरङ्कितं
कृष्णं ह्यौमिति वायुबीजेनाधिनायकेन तत्पुरुषेणाधिष्ठितं
ईश्वरेण कारणेश्वरेणान्वितं शान्तिकलारूपमुद्घातद्वयेन
स्पर्शशब्दगुणद्वयमुत्सार्य, वायुं
स्वविरुद्धपृथिव्याभिभूतस्वरूपं तदाकारं चिन्तयेत्॥

p. 147)

तदनु नभोमण्डले व्योमाकारं शुद्धस्फटिकसन्निभं
शून्यं बिन्दुशक्त्या विभूषितं ह्रौमिति
नभोबीजेनाधिनायकेनेशानेनाधिष्ठितं कारणेशेन
सदाशिवेनोपेतं शान्त्यतीतकलामयं पूर्ववद्विभाव्य,
पूर्वोक्तवदेकेनोद्घातेन शब्दगुणमुत्सार्य,
अनित्यत्वाव्यापकत्वाशुद्धत्वादि स्वस्वरूपं विमुच्य,

नित्यत्वव्यापकत्वशुद्ध?त्वादियुक्तपरमाकाशाभिभूत-

स्वरूपं भावयेत् ॥

ततोऽस्त्रेण

पादाङ्गुष्ठोत्थितेनाग्निनाऽरब्धशरीरगतभूतदोषान् दग्ध्वा

आप्लावयेत् ॥

(५८) यद्वा स्वदेहं पृथिव्यादिभूतबीजं

ब्रह्मविष्णुभ्यामुद्भिन्नांकुरं रागद्वेष

धर्माधर्ममोहमूलं विद्याविद्याधिपतिपालितं

कलादितत्वसारं तन्मात्रेन्द्रियशाखोपशाखं

विषयालोचनपल्लवं भावप्रपञ्चकुसुमं

बुद्ध्यध्यवसायसंकल्पफलं पुरुषविहङ्गोपभोग्यं

भोग्यभोक्तृत्वरसमूर्ध्वमूलमधश्शाखं

p. 148)

वटतरुरूपं सञ्चिन्त्य प्रथमपूरकार्धेन

निवृत्तिकलाबीजोच्चारपञ्चकेन पत्रपुष्पफलरहितं स्तब्धं

विभाव्य, पूरकापरार्धेन प्रतिष्ठाकलाबीजस्य चतुर्धोच्चारेण

स्निग्धं पत्रपुष्पफलोपेतं विचिन्त्य,

कुंभकप्रथमापरार्धाभ्यां विद्याकलाबीजोच्चारत्रितयेन

सव्यपादाङ्गुष्ठोत्थितकालाग्निना शुष्कं पत्राद्यपेतं

दग्धञ्च विभाव्य, रेचकपूर्वार्धेन शान्तिकलाबीजोच्चारद्वयेन

भस्मीभूतं दशदिक्षु प्रलीनं विभाव्य, रेचकापरार्धेन
शान्त्यतीताकलाबीजैकोच्चारेण शुद्धस्फटिकरूपं व्योमरूपं
सञ्चिन्तयेत् ॥
ततो बन्धकरूपं सर्वशून्यमिति विभाव्य, वौषडन्तमूलेन
शिखान्तरुस्थाधोमुखपद्मस्त्रवदमृतधाराभिः
सकलनाडीमुखं प्रविष्टाभिः स्वबाह्याभ्यन्तरं
सर्वशरीरमाप्लाव्य,

p. 149)

हृदये नालपत्रकर्णिकारूपं पद्ममकारादिमात्रात्रययुक्तेन
प्रणवेनावतीर्णं शुद्धविद्यात्मकमासनं विन्यस्य,
तत्कर्णिकायां पुर्यष्टकं चतुष्कलेन प्रणवेनावतीर्णं
भावयित्वा, तस्मिन् द्वादशान्तस्थं बीजरूपं
शिवमयमात्मानं पञ्चकलेन प्रणवेन पूरकेण सृष्ट्या
समानीय, ज्योतीरूपं संस्थाप्य, वौषडन्तशक्तिमन्त्रोच्चारेण
क्षुब्धशक्तिबहुलामृतप्रवाहेणाभिषिञ्चेत् ॥
(प्र) अथार्चनोपकरणानयनक्रममुपवर्ण्य यो वेत्ति
पञ्चशुद्धिन्तु स पूजां कर्तुमर्हति इति श्रीमद्वातुलवचनेन
शिवीभूय शिवं यजेत् इति श्रुतेश्च
सकलीकरणपरभावनालम्बनादिना शिवीभूय अन्तर्बहिश्च
शिवं यजेदिति हृदि निधाय तत्र प्रथमं

आत्मशुद्ध्युपवर्णनतत्परः, तस्या

भूतशुद्ध्यन्तर्यजनहवनसमाधिसमाहारात्मकत्वात्

p. 150)

तेष्वपि पूर्वं भूतशुद्धिविधिमुदाहरति (देवस्य) इत्यादिनी

* पा सहात्ममन्त्रेण इत्यधिकः पाठः ॥

(६०) (अभिषिञ्चेत्) इत्यन्तेन । किमत्र भूतशुद्ध्यादिना क्रियत इति

चेदुच्यते, समयिनां तावत् सर्वमन्त्रप्रसाध्यानां यास्स्थिता *

व्यक्तशक्तयः विघ्नभूता निरोधिन्यस्तासां दाह इहेष्यते ॥

दाहश्चाप्तसवस्तासां निरोधो वा तदां स्मृतः । इति ।

निर्वाणदीक्षितानान्तु

अनेकभविकं कर्म दग्धं बीजमिवाणुभिः ।

भविष्यदपि संरुद्धं येनेदं तद्धि भोगतः ॥

इति दीक्षायामक्षपितस्य प्रारब्धकार्यस्य कर्मणः

प्रत्यहमुपभोगेन क्षीयमाणस्यापि वासनायाः संभवात्

तस्यास्तदनुरोधेन स्थितस्य भोक्तृत्वविषयासक्तिजनकस्य

मलांशकस्य तत्साधनशरीरेन्द्रियजनकस्य मायांशस्य

p. 151)

च प्रत्यहमंशाशिकयाऽपचयः क्रियते इति समाख्यातं श्रीमता

सूक्ष्मस्वायम्भुववृत्तिकारेण । (देवस्य) आराध्यस्य ।

दक्षिणदिग्भागे । अघोरसन्निधावित्यर्थः ।

उत्तरदिग्भागावस्थितस्य देवानुकूल्येन उत्तरास्यानुपपतेः ।

तथा न प्राच्यामग्रतश्शंभोर्नोत्तरे योषिदाश्रये ।

न प्रतीच्यां यतः पृष्ठं तद्वक्षे देवमर्चयेत् ॥ इति ।

अत्र प्राच्यामग्रतश्शंभोरित्युक्तेः पूर्वाभिमुखत्वं

परमेश्वरस्य प्रतिपादितमेव । न प्रतीच्यां यतः पृष्ठमिति

पश्चिमभागे देवस्य पृष्ठसद्योजातवक्त्रस्य

पृष्ठग्रीवोपरिस्थितत्वं युक्तमेवेत्युक्तं

श्रीमद्बालज्ञानरत्नावल्याम् । (ब्र?स्याद्यासने) ब्र?सी

दर्भासनम्) व्याघ्राजिनादिरादिशब्दार्थः ।

तथा श्रीमत्सूक्ष्मे नासनं दर्भदारुं च सारङ्गञ्चर्म चैव

च । व्याघ्रचर्म सरोमापिं रत्नकंबलमासनम् ।

p. 152)

इति । व्रतिनामासनं ब्रसी इत्यमरः ।

सुखासनं तावत् पद्माद्यासनेषु सुस्थाभिधानमासनम् ।

तदुक्तं श्रेयस्सुस्थं सुखासनम् इति ।

अथार्चाभवने शुद्धे शस्त्रप्राकाररक्षिते ।

वर्मगर्भे शिवीभूय बहिरन्तश्शिवं यजेत् ॥

इति श्रीमन्मृगेन्द्रश्रुतेः शिवधामसंरक्षणक्रममाह

(अस्त्रप्राकार) इति । ततः किं विदधीत्याह (शिवीकरणम्) इति ।

शिवीकरणं तावत् आत्मनो विशेषशुद्धि साधनं कर्म ।

यदाह श्रीमत्सर्वज्ञानोत्तरवृत्तिकारः ।

अथातस्संप्रवक्ष्यामि शिवीकरणमुत्तमम् इत्यत्र शिवत्वं

सर्वज्ञत्वसर्वकर्तृत्वात्मकमुच्यते ।

तेन च नित्येनानावृतेन योगात् परमेश्वरः शिवोऽभिधीयते ।

तच्च शिवत्वमात्मनामनादिना अशुद्धिपर्ययेण मलेनावृतत्वात्

न सर्वविषयं प्रकाशते । तदुक्तमाचार्यैरपि न सर्वत्रयुगपत्

शिव

* पा- व्यक्ति । * पा-विभवं ॥ ३ पा- इतर ॥

p. 153)

(६२) त्वं विराजते इति । अतश्च शिवोऽत्र शुद्धोऽभिधीयत इति ।

मलादियुक्तस्त्वशिवोऽशुद्धः । किञ्च येनेदं तद्धि भोगतः इति

श्रीमत्किरणश्रुतेः

असद्योनिर्वाणदीक्षायामारब्धकार्यकर्मभोगोपरोधेन सर्वथा

मलस्याक्षपितत्वात् प्रत्यहमपचयक्रमेण दीक्षोत्तरं

शिवीकरणार्चनादिना सोऽपनेय इति तावन्मात्रया शुद्धया
युक्तस्यात्मनः सामान्यशुद्धिभेदात् वक्ष्यमाणात्
स्नानादेरनन्तरं शुद्धिहेतुत्वादेव हेतोरुत्तमं
विशेषशुद्धिसाधकं शिवीकरणं संक्षेपप्रकर्षतो वक्ष्यामि
इति। अशिवः शिवः संपद्यमानः क्रियते अनेनेति
शिवीकरणशब्दार्थः तत् कथमित्याचष्टे (तत्र) इति।
(तत्र) शिवीकरणे (करन्यासं विधाय) इति। अत्र पूर्वं

p. 154)

करन्यासाङ्गन्यासद्वये कृते सति हृदयादिस्थानन्यस्तमन्त्राणां
दाहप्रसङ्गः।
अतः पूर्वं करन्यासमात्रं कर्तव्यमिति व्याहृतं
श्रीमद्वालज्ञानरत्नावल्याम्। तदनु किं विदधीतेत्याशंक्य
सुषुम्नावर्त्मना आत्मनो गमनागमनस्य करणीयत्वात् पूर्वं
तद्ध्यानमाह (पादाङ्गुष्ठद्वयात्) इति। (यावद्वस्ति)
यावन्मूलाधारः तावदवधिरित्यर्थः।
तथा श्रीमत्सुप्रभेदे वस्तिश्चतुष्कलापत्रः कमलस्तेजसां निधिः
इति। वस्तिनाभेरधो द्वयोः इत्यमरः। (ब्रह्मविलान्तम्)
यावद्ब्रह्मरन्ध्रम्। (हृत्कण्ठादिषु) इति।
आदिपदेन तालुभ्रूमध्यब्रह्मरन्ध्राणि गृह्यन्ते।
(इडापिङ्गलाभ्यां संयुक्ताम्) इति। अत्र कलेवरस्य वामभागे

इडानाडी दक्षिणे पिङ्गलानाडी मध्ये सुषुम्नानाडी।

तथा सर्वज्ञानोत्तरे

p. 155)

वामनासापुटे यातु इडा सा परिकीर्तिता। दक्षिणे पिङ्गला ज्ञेया

सुषुम्ना मध्यतस्स्थिता॥ इति। (सुषिररूपाम्) सरन्ध्राकाराम्।

सरन्ध्रे सुषिरं त्रिषु इत्यमरः। (सञ्चिन्त्य) इति। विद्युल्लेखामिव

भास्वरां विभाव्येत्यर्थः। (तस्या एव) षुषुम्नाया एव।

(परमव्योमरूपिणीं शक्तिम्) इति। परमव्योम परमाकाशं

कुण्डलिन्याख्यं रूपं अधिष्ठेयं यस्यास्तां तादृशीं

तद्द्वारा आत्मनः सूक्ष्मदेहस्थस्याधिष्ठात्रिं ततः

प्रवर्तितेनामृतेन च वर्षन्तीं शिवशक्तिमित्यर्थः। एवं

समादिष्टं श्रीमत्सर्वज्ञानोत्तरवृत्तिकारैः। (मध्ये)

सुषिरमध्यस्थायाश्शक्तेरन्तराले। तथा श्रीमत्सर्वज्ञानोत्तरे

सुषिरान्ते बहिश्शक्तिं विन्यसेद्व्योमरूपिणीम्। तस्या मध्ये तु

हूंकारं ज्वलन्तं पावकप्रभम्॥ इति। (हूंकारम्)

शिखाबीजम्।

p. 156)

(ज्वलन्तम्) प्रदीपवत् प्रकाशमानम्। तदनन्तरकरणीयान्याह

(पूरकम्) इति। पूर्वं अशुद्धं मारुतं विरेच्य, बहिष्ठेनं

शुद्धेन मारुतेन यथाशक्ति मूर्तेः पूरणम्।

(कुंभकम्) रेचकात्मकं त्यागं पूरणरूपं संग्रहञ्च

त्यक्त्वा अन्तस्स्थस्य वायोर्निरोधात् कुम्भीकृत्यावस्थापनम्।

तथा श्रीमत्तन्त्रसारे रेचयेद्देहगं वायुमशुद्धं

व्योमसंस्थितम्। शुद्धं वायुं पूरकेण समाहृत्य

शनैश्शनिः॥ इति। तद्रुक्तञ्च श्रीमन्मृगेन्द्रे वाह्येन वायुना

मूर्तेश्शक्तिसीमप्रपूरणम्। पूरकस्स तदभ्यासात् सुमुर्वपि

विकर्षयेत्॥ त्याग?संग्रहणे हित्वा निरोधः कुंभकस्स्मृतः। इति।

(वायुम्) कुंभितमारुतम्। (ऊर्ध्वम्) यावद्द्वादशान्तम्।

(विरेचयेत्) हृदयपुण्डरीकस्थं वायुं ब्रह्मरन्ध्रेण

विनिक्षिपेदित्यर्थः॥

p. 157)

(हूं फट् इति सन्ततोच्चारेण) इति। पुरा भावितशिखाबीजं

फडन्तं विधाय तन्मन्त्रस्य निरन्तरपञ्चवारपठनेनेत्यर्थः।

तथा श्रीरामनाथपद्धत्यां

शिखां समुच्चरेन्नाभेरूर्ध्वं तां दीपिकाकृतिम्।

ध्यात्वा तया मनःप्राणयुक्तया ग्रन्थिपञ्चकम्॥

सुरेचकं फडन्तां तामेकैकस्यैकशो वदन्। इति। (भिन्नग्रन्थीन्)

भिन्नाः दलिताः ग्रन्थयः दलसन्धयः येषान्ते भिन्न ग्रन्थयः

तान्। अत्र हृदयकण्ठतालु भ्रूमध्यब्रह्मरन्ध्रेषु

अधोमुखमवस्थितं कमलमुकुलबृन्द पूरकेण विकसितं,

कुंभकेन रोधितं ऊर्ध्वरेचकेन ऊर्ध्वमुखञ्च भवतीति

तात्पर्यम्। तथा श्रीमत्समानतन्त्रे

विकसति च वै पद्मं पूरकेण तु पूरितम्।

ऊर्ध्वस्त्रोतो भवेत् पद्मं कुंभकेन तु रोधितम्॥

इति। (विरेच्य) वायुं बहिः क्षिप्य।

तत्स्थं गृहीत्वा चात्मानं रेचनाद्विन्दुं मध्यगम्।

कृत्वा कायं दहेत् पाशादस्त्रं सञ्चिन्त्य तैजसम्॥

(p.158)

इति श्रीमत्किरणश्रुतेः

शरीरदाहायात्मनश्शिवसंयोजनप्रकारमाह (पुनः

पूरकवायुना) इति। (संहृतचैतन्यम्) संहृतं चैतन्यं चेतनस्य

भावः कर्म वा दृक्क्रियारूपमित्यर्थः। तत् यस्य स तथोक्तः तम्।

तथा श्रीमन्मृगेन्द्रे चैतन्यं दृक्क्रियारूपम् इति।

(हृत्कमलाश्रितम्) इति। अत्र हृत्प्रदेश एव

पुर्यष्टकाख्यसूक्ष्मदेहस्थस्यात्मनोऽनुसन्धेयमित्यवधेयं

इत्युक्तम् श्रीमत्सर्वज्ञानोत्तर वृत्तिकारैः ।

(स्फुरत्तारकाकारम्) देदीप्यमाननक्षत्राकृतिम् ।

(सान्तबीजमयम्) सान्तः हकारः बीजं अक्षरं

बिन्दुयुक्तहंकाराक्षरात्मकमित्यर्थः । तथा

श्रीमद्वातुलशुद्धाख्यायां

नादं गुह्यं परो जीवो देहं भूतञ्च पञ्चमम् ।

सान्तं तत्वान्तभूतान्तं शिवान्तं शून्यमव्ययम् ॥

वर्णं बीजं तथाऽर्णञ्च लिपिरक्षरमातृकाः ।

एते वै बद्ध नामानि वर्ण पर्यायवाचकाः ॥

p. 159)

इति । तथा चाह श्रीमत्किरणवृत्तिकारः

बीजञ्चात्र प्रागुक्तमन्त्रारम्भकं प्रणवादि इति ।

(हृत्संपुटितम्) हृत्संपुटं कृतं हृद्बीजमध्यममित्यर्थः ।

(हूंकारमूर्ध्नि विन्यस्य) इति । प्राणवृत्तिनिरोधवशेन

हूंकारशिखारूढं कृत्वेत्यर्थः (बीजविग्रहम्) बीजमेन

सान्तात्मकं प्रोक्तवद्धृदयसंपुटं विग्रहो रूपं यस्य स

तथोक्तः तम्। (हूंकारशिखान्तस्थम्) हूंकारमूर्ध्नि

विन्यस्तत्वात् तच्छिखान्तस्थमित्यर्थः। एवमुक्तं

श्रीमत्सर्वज्ञानोत्तरवृत्तिकारैः। (पुर्यष्टकावच्छिन्नम्)

पुर्यष्टकाख्येनोपाधिना अवच्छिन्नम्

अत्र पुर्यष्टकं नाम प्रतिपुरुषनियतः सर्गादारभ्य

आकल्पान्तं मोक्षान्तं वाऽवस्थितः पृथिव्यादिकलान्त

त्रिंशत्तत्वात्मकोऽसाधारणरूपः सूक्ष्मदेहः। तथा

श्रीमत्तत्वसङ्ग्रहे

वसुधाद्यस्तत्वगणः प्रतिपुंनियतः कलान्तोऽयम्।

p. 160)

पर्यटति कर्मवशतो भुवनजदेहेष्वयञ्च सर्वेषु॥

इति। ननु

शब्दस्स्पर्शश्च रूपञ्च रसो गन्धरुप पञ्चमः।

बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमुदाहृतम्॥

इति श्रीमत्कालोत्तरे श्रूयते। सत्यं अत एव तत् सूत्रं तत्र भगवता

रामकण्ठेन सङ्त्रिंशत्तत्ववाचकतया व्याख्यातम्। कथं

पुनरस्य पुर्यष्टकत्वम् ?

भूततन्मात्रकर्मेन्द्रियबुद्धीन्द्रियान्तः करणसंज्ञैः

पञ्चभिर्वर्गैस्तत्कारणेन गुणेन तदापूरकेण प्रधानेन

कलादिपञ्चकञ्चुकात्मना वर् ।गेणारब्धत्वादित्यविरोधः इति ।

(पुरुषम्) आत्मानम्। क्षेत्रज्ञ आत्मा पुरुषः इत्यमरः।

पुरुषशब्दस्य तु निर्वचनमुदाहृतं

अव्यक्तं मन इत्याहुश्शरीरं पुरमुच्यते ।

अव्यक्ताख्ये पुरे शेते पुरुषस्तेन चोच्यते ॥

इति । (बिन्दुभूतम्) मन्त्रोच्चार

p. 161)

लयक्रमेण परमकारणबिन्दुस्वरूपम्। (एकाकिनम्)

सूक्ष्मशरीरेण मुच्यमानम्। तथा श्रीरामनाथपद्धत्यां

क्रमाच्छिसैकोच्चारेण देहं सूक्ष्ममपि त्यजन्। बिन्दुं

नादात्मना प्राप्यं इति। (निरामयम्) निर्गतः आमयः

अविद्यादिक्लेशः सत्वादिगुणश्च यस्य स तथोक्तः तम्।

संहारमुद्रालक्षणमुक्तं मुद्रालक्षणे।

अथ संहारिणी कनिष्ठाद्यङ्गुलिचतुष्टयानामङ्गुष्ठमूले

क्रमेण संयोजनात्मिका गृह्यसन्निधौ प्रदर्श्या इति ।

(ब्रह्मादिकारणत्यागक्रमेण) ब्रह्मा आदिर्येषां तानि

ब्रह्मादीनि तानि च तानि कारणानि च तेषां त्यागः विसर्जनं तस्य

क्रमः तेन । विष्णवादिरादिशब्दार्थः । अत्र त्यागक्रमः

हृदयकमलमध्ये ब्रह्मणस्त्यागः कण्ठकमले विष्णोस्त्यागः

तालुकमले रुद्रत्यागः भ्रूमध्ये महेश्वरत्यागः ब्रह्मरन्ध्रे

सदाशिवत्यागः इत्यवसेयः । (उद्घातेन) ऊर्ध्वं घातः

p. 162)

उद्घातः उदानवृत्त्या? वायोर्द्वादशान्तं यावत् प्रेरणं तेन ।

तथा श्रीमत्सर्वज्ञानोत्तरे

सन्निरोधे कृते सम्यमूर्ध्वं वायुः प्रवर्तते ।

स उद्घात इति ख्यातस्स्वेच्छया तु कनीयसः ॥

इति । तथा श्रीमन्मतङ्गे

ऊर्ध्वमाघातधर्मित्वात् साटोपाद्ग्रन्थिभेदनात् ।

उद्घाटनाच्च ग्रन्थीनामुद्घातः परिभाष्यते ॥

इति । वक्ष्यति च पूरकपूर्वं सुषुम्नायां यावद्द्वादशान्तं
प्राणवायुं प्रेरयित्वा प्रतिनिवर्त्य? दक्षिणनाड्या
विरेचयेत्दित्युद्घातपञ्चकेन इति । स्यादभ्यादानमुद्घातः
इत्यमरः । आत्ममन्त्रोद्धारः प्रदर्शितः
श्रीमत्सोमशंभुचरणैः

हङ्कारन्तारकाकार जीवं हृदयसंपुटम् ।
पूरकाहृतचैतन्यं हूंशिखोपरि विन्यसेत् ॥

इति । (भोग्यकर्मोपभोगार्थम्) भोग्यकर्म तावत्
वर्तमानदेहारंभकं दीक्षायामक्षपितं प्रारब्धकर्म
तस्य भोगार्थम् । अत्र पुनरप्यादानाय

p. 163)

न तु स्वेच्छोत्क्रान्ति वदपुनरावृत्तये इत्याकूतम् । तथा
श्रीमत्कामिके

योजनं देशिकः कुर्याद्रक्षार्थं भोग्यकर्मणः ।
अधिकारवशाद्भूयो देहित्वं प्रतिपद्यते ॥

इति । (द्वादशान्ते) द्वादशान्तपद्मस्थे इत्यर्थः । तथा

श्रीमत्सुप्रभेदे

संहारमुद्रयाऽत्मानं शिखाग्रे द्वादशाङ्गुले ।
पद्मस्थे योजयेद्विद्वान् इति (संयोजयेत्) रश्मिमात्रावियोगेन
प्रवेशयेत् ॥
ननु आत्मनोऽपि व्यापकत्वेन गमनासंभवात्
पुर्यष्टकद्वारेणात्र गमनमभ्युपगम्यते सूक्ष्मदेहस्यापि
शोध्यत्वेन एकाकिनमिति विशेषणेन हेयतयोक्तत्वाच्च कथमसा

* पा गृह ॥

वात्मा तद्विरहितो द्वादशान्तं यावन्नेय इत्याशंक्याह (एवम्) ।
(एवम्) पूर्वोक्तप्रकारेण ।

p. 164)

(बीजवृत्त्या) बीजविग्रहमित्युक्तत्वेन मन्त्रबीजवृत्त्या नादात्मनेति
यावत् । नादस्य हि पुर्यष्टक विरहेऽप्यविनाभावः । एतदुक्तं
भवति शिवशक्त्यधिष्ठितया आत्मनः क्रियाशक्त्या सूक्ष्मदेहो
नीयते । यदुक्तं श्रीमत्समानतन्त्रे शक्त्याऽनुनीयते जीवः इति ।
तत्त्यागे तु मन्त्रबीजवृत्त्या विन्दुभूतस्सन्नधिष्ठात्र्या
शिवशक्त्या सह शिवपदे प्रवेशमात्मनोऽनुसन्दध्यात् ।

ततस्तत्र प्रवेशो भवतीति। तथा श्रीरामनाथपद्धत्यां
बिन्दुर्नादात्मना प्राप्य शिवे शक्त्या लयं गतः इति। (लीनः)
व्याप्तिरूपेण। तत्तुल्यतां गतः। यच्छूयते लयस्तत्तुल्ययोग्यता इति।
ततः किं कुर्यादित्याकांक्षायां सूक्ष्मदेहं शोधयेदित्याह
(सूक्ष्मदेहविशुद्धये) इति।

द्वयोरप्यध्वनोरेवं क्रमप्रसवयोगिनोः।
विलयः प्रातिलोम्येन शक्तितत्वं द्वयावधिः॥

p. 165)

इति श्रीमन्मृगेन्द्रश्रुतेः तत्वानां सृष्टिक्रमवैपरीत्येन लयो
विधेय इत्याह (प्रतिलोम्येन) इति। कारणे हि कार्यस्य लयः नत्वन्यत्र
इति मनसि निधाय स्वकारणलयक्रममाह (स्वेषु) इति। स्वेषु स्वेषु
कारणेषु) स्वस्वोपादानेषु इत्यर्थः। (तत्वानि)
पृथिव्यादिषट्त्रिंशत्तत्वानि। (बिन्दुपर्यन्तम्) कुण्डलिनीपर्यन्तम्।
(लयम्) उपसंहारम्। (नयेत्) प्रापयेत्। अत्र यत एव यस्य
प्रसवस्तस्यैव तत्रान्तर्भाव इति तात्पर्यम्।
तत् कथमित्याह (तद्यथा) इति। (तत्) तत्वलयनम्। (यथा) यथा
स्पष्टं तथोच्यते। (गन्धे) गन्धतन्मात्रे। (पृथिवीम्) पृथिवीतत्वम्
। लयं नयेदिति पूर्वेणान्वयः। एवं सर्वत्र योजनीयम्।
अनन्यादिभूतपञ्चकं

p. 166)

गन्धादिपञ्चतन्मात्रेभ्यः सञ्जातं ततः स्वकारणेषु तेषां

लयः। तथा श्रीमन्मृगेन्द्रे मात्रेभ्यो भूतपञ्चकम् इति।

(एतास्तन्मात्राः) पूर्वोदीरितगन्धादय इत्यर्थः। तथा तत्रैव

शब्दस्स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।

गुणावशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः॥

इति। (तामसाहंकारे) भूतादिसंज्ञके आहंकारिकतृतीयस्कन्धे

इत्यर्थः। कस्मात् तन्मात्राणि सञ्जातानि।

(वाक्पाणिपादपायूपस्थाख्यानि) वाक्य पाणिश्च पादश्च पा-

* मूले पृथिवीमित्यादिद्वितीयान्तपाठमभिप्रेत्येदम्॥

(६६) युश्च उपस्थश्च वाक्पाणिपादपायूपस्थाः। एते इति आख्या

संज्ञा येषां तानि तथोक्तानि कर्मेन्द्रियाणीत्यर्थः।

(राजसाहंकारे) वैकारिकाख्ये

p. 167)

आहंकारिकद्वितीयस्कन्धे। एतस्मात् वागादीनि समुत्पन्नानि।

(श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि) इति । ज्ञानेन्द्रियाणीत्यर्थः ।

कर्मेन्द्रियन्तु वाग्वादि मनोनेत्रादि धीन्द्रियम् इत्यमरः ।

(सात्विकाहंकारे) तैजसापरपर्याये आहंकारिकप्रथमस्कन्धे ।

अमुष्मात् श्रोत्रादीनि मनश्च समुदितानि । तथा श्रीमत्पौष्करे

स च त्रिविध उद्दिष्टः प्रथमस्तत्र तैजसः ।

वैकारिको द्वितीयस्स्यात् तथा भूतादिकः परः ॥

सत्वेनोत्कृष्टभागो यस्स तैजस इहोच्यते ।

वैकृतो रजसोत्कृष्टो भूतादिस्तमसाऽधिकः ॥

तैजसादप्यहंकारान्मनो बुद्धीन्द्रियाणि च ।

पञ्च कर्मेन्द्रियाणि स्युरहंकारात्तु वैकृतात् ॥

अहंकारातु भूतादेर्जाता तन्मात्रसङ्गतिः ।

इति । (स च) अहंकारः । बुद्धितत्वात् अहंकारः संभूतः ।

p. 168)

तथा बुद्धितत्वादहंकारो जातस्सोपि त्रिधा भवेत् इति । (सा) बुद्धिः ।

गुणेभ्यो बुद्धिः सञ्जाता । तथा श्रीमत्तत्वप्रकाशे भवति

गुणत्रयतो धीः इति । प्रकृतेराविर्भूतं गुणतत्वम् । तथा

श्रीमच्चिन्त्ये अनेकगुणसंयुक्तप्रकृतेस्तु गुणत्रयम् इति । (सा)

प्रकृतिः । कलातत्वात् प्रकृतिरागविद्यातत्वानि संभवन्ति । तथा

श्रीमद्रौरवे कलातत्वाद्रागविद्ये द्वे तत्वे संवभूवतुः ।

अव्यक्तञ्च इति । (पुंस्तत्वम्) पुरुषतत्वम् । तथा श्रीमत्पौष्करे

शृणुध्वमथ पुंस्तत्वं यथावन्मुनिपुङ्गवाः ।

पञ्चकञ्चुकसंयुक्तः प्रकृतिं भोक्तुमुद्यतः ॥

अविद्यादिसमायुक्तः पुरुषः परिकीर्तितः ।

इति । अत्र कलादिपञ्चतत्वोपबृंहितोऽणुः पुंस्तत्वनिर्देशं याति ।

न तु परमार्थतरतस्य तत्वत्वम् ।

p. 169)

यत आत्मनो नित्यत्वं तत उत्पत्त्यभावान्मायायां लय

इत्युपचारत इति तात्पर्यम् । कालनियतिकलाः मायातत्वात् प्रादुरासन् ।

तथा श्रीमच्चिन्त्ये

अनन्तशक्तिरूपाया मायातः कालसंभवः ।

पुनश्च माया नियतिं जनयामास वै तदा ॥

सैव माया पुनश्चैव कलामजनयत् क्रमात् इति। मायायाः
परमकारणत्वेन नित्यत्वात् कुतश्चिदुत्पत्तिलयौ न विद्येते। तथा
श्रीमत्सूक्ष्मस्वायम्भुवे मायातत्वं
जगद्बीजमविनाश्यव्ययात्मकम्। इति। उक्तमर्थमुपसंहरति (एवम्)
इति। (विभाज्य) इति। अत्र तत्वानीति शेषः। ततः किमित्याकांक्षायां
सूक्ष्मदेहस्थतत्वप्रेरकशुद्धतत्वलयं विदधीतेत्याह
(शुद्धविद्यातत्वम्) इति। (तत्) ईश्वरतत्वम्। (तत्) सदाशिवतत्वम्।
(तच्च) शक्तितत्वम्।

p. 170)

(तदपि) शिवतत्वञ्च। विन्दोः शिवतत्वं तस्माच्छक्तितत्वं तस्मात्
सदाशिवतत्वं एतस्मादीश्वरतत्वं अमुष्मात् शुद्धविद्यातत्वं
प्रादुरभूत्। तदुक्तं श्रीमज्ज्ञानसिद्धौ

शिवेच्छया कुटिलोत्पन्नं नादतत्वं प्रधानकम्।
नादमध्योदितो बिन्दुश्शिवशक्त्यर्थनामकः॥

इत्यादि। (अक्षुब्धरूपे) अक्षुब्धं निर्विकारं रूपं यस्य सः
अक्षुब्धरूपः अस्मिन् शान्त्यतीतकलाभागलक्षण इत्यर्थः।
(बिन्दौ) कुण्डलिन्याम्। अत्र बिन्दुः परमोपादानत्वात् कात्स्न्र्येन न
विक्रियते किन्तु घृतकीटन्यायेन एकदेशेन। तथा च

सविकारनिर्विकारयोर्मध्ये निर्विकारापरपर्यायः

योऽक्षुब्धभागः तल्लक्षणे बिन्दौ तत्वलय इति तात्पर्यम्। तथा

श्रीमत्पौष्करे

प्रकृतित्वादयं बिन्दुः क्षोभ्यते नाखिलात्मना।

p. 171)

तत्र योऽक्षुब्धभागोऽस्य शान्यतीतकला तु सा॥

लयादिभेदः प्रागुक्तो यदुपाधौ शिवस्य तु।

स बिन्दुरिति मन्तव्यस्सैव कुण्डलिनी मता॥

इति॥ पृथिव्यादितत्वलयप्रकारः श्रीमद्गुरुभिः

पद्यरूपेणाभिहितः

गन्धे भूस्सलिलं रसे हुतवहो रूपे मरुत् स्पर्शने,

शब्दे स्यात् खमहङ्कृतौ पुनरिमास्तन्मात्रकास्तामसे।

कर्माक्षाणि च राजसे सह मनो बुद्धीन्द्रियैस्सात्विके,

बुद्धौ सा च गुणेषु सा? गुणगणोऽव्यक्ते लयं गच्छति॥

तद्रागविद्ये च कलां प्रयान्ति पुंस्त्वञ्च कालो नियतिः कला च।

मायां सुविद्येशमसौ सदेशं स शक्तिमेषा शिवमेष बिन्दुम् ॥

इति ।

p. 172)

अत्र शब्दस्पर्शौ त्यजेद्ब्राह्मे इत्यादिकारिका क्वचित् कैश्चित्
प्रक्षिप्तेत्युपेक्षिता ॥
इत्थं सूक्ष्मदेहशुद्धिविधिमभिधाय
स्थूलशरीरशोधनविधानमभिधत्ते (ततः) इति ।
स्थूलदेहस्तावत् जातिकुलाद्यभिमानास्पदं पृथिव्यप्तेजो
वाय्वाकाशानां समवायः साधारणासाधारणरूपं
भुवनजं भूतशरीरमित्युच्यते (तदुक्तं?

शरीरं त्रिविधं प्रोक्तं स्थूलं लिङ्गं परं स्मृतम् ।
स्थूलं भूतशरीरञ्च लिङ्गं पुर्यष्टकं भवेत् ॥
परं बिन्दुसमुत्पन्नं त्रिविधं समुदाहृतम् ।

इति । (विशोधयेत्) विशेषेण शुद्धिं विदधीत । तत्र च
स्थूलसूक्ष्मदेहस्थानां तत्वानां विषनिवृत्त्यर्थं
गरुडभावनावत् बन्धकत्वनिवृत्त्यर्थं विलयभावनैव शुद्धिः
न तु साक्षादुपसंहारः प्रत्यक्षविरोधात् श्रुति विरोधाच्च ।

p. 173)

तस्मात् बाह्यदेहस्थानि पृथिव्यादीनि पञ्चभूतानीतस्देव वस्त्विति ध्यायेत्। तेष्वात्मभावनां न कुर्यादिति तात्पर्यम्। यदुक्तं श्रीमत्स्वायम्भुवे

अथात्मनो वधं मन्त्री न कुर्यात् फलवाञ्छया।
न च दुःखसमुत्पत्तौ कामतो देहमुत्सृजेत्॥

इति। स्मृतावपि

असुर्या नाम ये लोका अन्धेन तमसाऽवृताः।
तास्ते प्रेत्याभिगच्छन्ति ये चैवात्महनो जनाः।

इति। तथा श्रीमत्सर्वज्ञानोत्तरे इतरद्वस्तु इत्येवं पञ्चभूतानि निर्देशेत् इति। तत् कथमित्याकांक्षायां स्थूलदेहस्य भौतिकत्वात् प्रातिलोम्येन पृथिवीतत्वं तद्वर्णस्वभावचिह्नादिकं विभाव्य शोधयेदित्याह (पार्थिवम्) इति। (पीतम्) स्वर्णवर्णम्। अनेन वर्णो निर्णीतः। (कठिनम्) कर्कशम्।

p. 174)

अमुना स्वभावः प्रदर्शितः। (वज्रलाञ्छितम्) कुलिशांकितम्।
एतेन चिह्नमुदीरितम्। (ह्लाम्) इति। हाकारः हृदयबीजं लकारः
पृथिवीबीजम्। तथा धारणानां लवरयहकाराश्चेति कीर्त्तिताः इति।
अत्र लकारं हृदयबीजयुक्तं पार्थिवमण्डले मन्त्रत्वेन
प्रयोजयेदित्यवसेयम्। तथा श्रीमत्सर्वज्ञानोत्तरे
लकारासनमारूढं हृद्बीजं मध्यतस्स्थितम्। इति।
तेन मन्त्रः कथितः। (अधिनायकेन) अधिष्ठात्रा। नायको नेतरि
श्रेष्ठे हारमध्यमणावपि इति विश्वः। (सद्योजातेन)
सद्योजाताख्येन। अनेन देवस्समाख्यातः। (कारणेश्वरेण)
कारणेश्वरसंज्ञेन। तथा श्रीमन्मन्त्रवार्तिके

कमलजकेशवरुद्रमहेश्वराह्य परश्शिवः।
एते कारणेश्वरसंज्ञाः स्वस्वाध्वव्यापिनः स्व मन्त्रस्थाः इति।

p. 175)

अनेन कारणेश्वरो निगदितः। (निवृत्तिकलारूपम्)
निवृत्तिकलाधिष्ठितम्। एवमाख्यातं श्रीमता
सोमशंभुपद्धतिव्याख्याकारेण। अस्मात् कला भाषिता।
(चतुरश्रम्) चतुष्कोणम्। अमुष्मान्मण्डलमभिहितम्। तथा
श्रीमज्ज्ञानरत्नावल्याम्।

भूताति तत्वगर्भाणि पञ्चचिह्नयुतानि च ।

स्वभावदेवसंस्थानकलामण्डलकारणैः ।

वर्णमन्त्रगुणस्थान प्रमाणादियुतानि च ।

इति । एवं प्रतिभूतमूह्यम् । ननु पृथिव्यादि भूतानि

शरीरैकदेशव्यापकत्वेन ध्येयानि किमित्याशंवय

पादादारभ्य मूर्द्धान्तं सञ्चिन्त्य चतुरश्रकम् इति श्रुतेः

बाह्यशरीरव्यापकत्वेनावस्थानाच्च तानि चात्र

सर्वशरीरव्यापकत्वेन ध्येयानि न तु दीक्षायामिव

जान्वादिव्याप्त्या इत्याह (पादादारभ्य) इति । तदनन्तरं किं

कुर्यादित्याशंक्याह (ओं हाम्) इति । विवृत्त्यादिकलामन्त्रोद्धारोपि

p. 176)

निर्दिष्टः श्रीरामनाथपद्धत्यां

यद्भूतं यत्कलारूपं तस्य बीजेन संयुतम् ।

नाम तस्याश्चतुर्थ्यन्तं सजात्यस्त्रान्तिमं वदन् ॥

इति । (उद्घातपञ्चकेन) उद्घातानामूर्ध्वरेचकाकाराणां

पञ्चकेन । पृथिव्याः पञ्चगुणनाशनाय पञ्चोद्घाताः

प्रोत्ततः । प्रत्युद्घातं पूरकाद्यास्त्रयः प्राणायामा

अर्थसिद्धा एव । यदुक्तं श्रीमत्त्रयोदशशतिके

एवं पञ्चदश प्रोक्ताः प्राणायामास्तु भूगताः ।

वारुणस्य दश द्वे च इत्यादि ।

(गन्धस्सरूपस्पर्शशब्दगुणान्) गन्धश्च सुरभ्यसुरभूरूपः

रससश्च कह?म्लादिः रूपञ्च पीतादि स्पर्शश्च अशीतोष्णरूपः

शब्दश्च खटखटादिः गन्धरसरूप स्पर्शशब्दाः ते इति गुणाः

तथोक्ताः तान् ।

अत्र गन्धगुणः रसगुणः इत्यायवधेयम् ।

(स्वविरुद्धवागुणा?) स्वरूपाः पृथिव्याः विरुद्धः शत्रुः स

चासौ वायुश्च तेन । सयमाभिमानः?

भूमिपवनयोर्जलानलयोश्च

p. 177)

एषा चतुर्णां बाध्यबाधकभावेन परस्परम?वस्थितेः शत्रुता

। भूमिजलयोः पवनानलयोश्चान्योन्यं पोषकत्वान्मित्रत्वम् ।

जलपवनयोः क्षित्यग्न्योश्च परस्परं न शत्रुभाव इति

मध्यस्थत्वमेषाम् । आकाशस्य तु

वायुवारिशिखिक्षितीनामवकाशदायित्वेन मित्रत्वमिति ।

तथा श्रीमन्मृगेन्द्रे

खं समस्तेषु भूतेषु वारिवायू शिखिक्षिती ।
वार्यग्नी भूमिपवनौ वारिक्ष्मे अनलानिलौ ॥

मध्यस्थासति मित्राणि इति । (अभिभूताम्) आत्तगन्धाम् ।
आत्तगन्धोऽभिभूतस्स्यात् इत्यमरः । (तदाकाराम्) वायुमयीम् ।
कठिनादिस्वभावं विहायं पवनस्वभावाभिभूतां
भावयेदिति भावः ॥
एवं पृथिवी भूतशुद्धिमुदाहृत्य
जलभूतशुद्धिक्रममाचष्टे (तदनु) इति । जलस्य स्वभावः
द्रवस्वरूपः । तथा श्रीरामनाथपद्धत्यां जलभूतं द्रवं
सौम्यम् इति ।

p. 178)

अर्द्धचन्द्रं द्रवं सौम्यम् इति क्वचित् पाठः । (ह्रीम्) इति । ह्रीमिति
शिरोबीजं वकारः वरुणबीजम् । अत्र आप्यबीजं वकारं
शिरोमन्त्रेण युक्तमाप्यमण्डले मन्त्रत्वेन प्रयोजयेत् इति बोध्यम् ।
तथा श्रीमत्सर्वज्ञानोत्तरे वकारासनमध्यस्थं
शिरोबीजमधोमुखम् इति । (पूर्ववद्विभाव्य) इति । पादादारभ्य
मूर्द्धान्तं विचिन्त्येत्यर्थः । एवं प्रतिभूतमवधेयम् ।
(पूर्वोक्तवत्) इति । अत्र ह्रीं ह्रीं ह्रीं ह्रीं प्रतिष्ठाकलायै हः

हुंफट् इति पूरकपूर्वमित्यादिपुरोदीरितमनुसन्धेयम्।
(रसादिगुणचतुष्टयम्) इति। अत्र रसः मधुरः। रूपस्पर्शशब्दाः
आदिशब्दार्थः। तत्र रूपं शुक्लं स्पर्शः शीतः शब्दः
झलझलशब्दः। अत्र गन्धैकगुणह्रासादुद्धातह्रास
इत्यवधेयम्। एवमुत्तरत्राप्यूह्यम्। (तदाकारम्) अनलमयम्।

p. 179)

द्रवादिस्वभावं व्यपोह्य ज्वलनस्वभावाभिभूतं चिन्तयेत्॥
जलभूतशोधनमुपवर्ण्य अग्निभूतशुद्धिमभिधत्ते (ततः) इति।
अग्नेः स्वभावो दाहात्मकः। (हूम्) इति। हूंकारः शिखामन्त्रः
रेफोऽग्निबीजम्। शिखया युक्तमग्निबीजं आग्नेय मण्डले
मन्त्रत्वेन प्रयोजयेत्। तथा श्रीमत्सर्वज्ञानोत्तरे
रकारासनमारूढं शिखाख्यं बीजमुत्तमम् इति। (रूपादि गुण
त्रयम्) इति। अत्र रूपगुणः भास्वररूपः। आदिशब्दात्
स्पर्शशब्दावुच्यते। स्पर्श उष्णः। शब्दः धमधमशब्दः।
(तदाकारम्) जलात्मकम्। दाहादिस्वभावं विमुच्य
जलस्वभावाभिभूतं चिन्तयेत्॥
वह्निभूतशुद्धिं व्याहृत्य वायुभूतशुद्धिं ब्रूते
(पश्चात्) इति। वायोः स्वभावश्चलनरूपः। (ह्यैम्) इति। हैकारः
कवचमन्त्रः। यकारो वायुबीजम्।

p. 180)

वायुबीजं कवचबीजेन युक्तं कृत्वा वायव्यमण्डले मन्त्रत्वेन
नियोजयेत्। तथा श्रीमत्सर्वज्ञानोत्तरे यकारासनसंविष्टं
कवचं वायुविग्रहम् इति। (स्पर्शशब्दगुणद्वयम्) इति। अत्र
स्पर्शगुणः अशीतानुष्णरूपः। शब्दगुणः शकशकरूपः।
(तदाकारम्) मेदिनीमयम्। नलनादिस्वभावं विसृज्य
अवनिस्वभावाभिभूतं भावयेत्॥
वायुभूतशुद्धिमुपवर्ण्य नभोभूतशुद्धिमुपदिशति
(तदनु) इति। नभोमण्डलं तावत् वर्तुलाकारम्। तथा व्योमाकारं
सुवृत्तञ्च इति। (व्योमाकारम्) लौकिकानां व्योमत्वेन
प्रसिद्धावकाशाकारम्। (शून्यम्) मूर्तद्रव्या भावात्मक
शून्याकारं न तु वस्तुरूपम्। (बिन्दुशक्त्या) कुटिलाशक्त्या।
एवमाख्यातं श्रीमता सोमशम्भुपद्धतिव्याख्याकारेण।

p. 181)

आकाशस्य स्वभावः शुषिरात्मकः। यदाह
श्रीमद्वालज्ञानरत्नावलीकारः
कठिनद्रवोष्णचलनावकाशस्वभावानि इति। (हौम्) इति।
औकारयुक्तं हकारं नामसमण्डले मन्त्रतया नियोजयेत्।
तथा श्रीमत्सर्वज्ञानोत्तरे औकारासनसविष्टं हकारं
नाभसं विभुम् इति। ननु पृथिव्यादिवाय्वन्तानां चतुर्णां

भूतानां हृदयादिमन्त्रचतुष्कबीजयुक्ताः

लकारादियकारान्तवर्णाः बीजानीत्युक्तं कथमत्राकाशस्य

अस्त्रं त्यक्त्वा केवलं हौमिति नभोबीजेनेत्युक्तम् ? सत्यं नभसः

शान्यतीताकलामयत्वात् तथोक्तमत्रेति तात्पर्यम्। तत् सर्वमुत्तरत्र

निर्वाणदीक्षाविधौ शान्त्यतीतकलाशोधने स्पष्टीकरिष्यामः।

(सदाशिवेन) इति। सदा नित्यं शिवः सदाशिवः स्वशक्तिरूपया

सर्वमङ्गलया

p. 182)

शबलितस्वरूपत्वादपरिच्छिन्नकल्याणघन इत्यर्थः।

तथोक्त

सदाशिवत्वं यः प्राप्तश्शिवस्साक्षादुपाधिना।

सदाऽस्यापि भवेच्छक्तिस्तया हीनो निरस्तकः॥

इति। (शब्दगुणम्) इति। अत्र शब्दः प्रतिश्रुतिशब्दः न तु वर्णात्मकः

। (अनित्यत्वाशुद्धत्वादिस्वरूपम्) इति। अत्र

अभूत्वाकारणजन्यत्वमेवानित्यत्वम्। तदुक्तं

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं सावयवं

परतन्त्रं व्यक्तं विपरीतमव्यक्तम् इति। आदिपदेन अव्यापकत्वादि

सूच्यते।

(नित्यत्वाव्यापकत्वशुद्धत्वादियुक्तपरमाकाशाभिभूतस्वरूप

म्) नित्यत्वञ्च कालानवच्छिन्नत्वं आद्यन्तरहितत्वमित्यर्थः ।

व्यापकत्वं च देशानवच्छिन्नत्वं सर्वगतत्वमित्यर्थः ।

यदाहुः

अनवच्छिन्न सद्भावं वस्तु यद्देशकालतः ।

तन्नित्यं विभु चेच्छन्ति आत्मनो विभुनित्यता ॥

p. 183)

इति । शुद्धत्वञ्च सितत्वं नित्यत्वव्यापकत्वसुद्धत्वानि तानि आदीनि

येषां तानि तथोदितानि । शान्तत्वादिरादिशब्दार्थः । तैर्युक्तम् ।

तच्च तत् परमाकाशञ्च विन्द्वाख्यं परमव्योम । तथा चोक्तं

श्रीमन्निश्वासकारिकायां

निर्गुणं साञ्जनातीतं ग्रहनक्षत्रवर्जितम् ।

शुद्धस्फटिकसंकाशं परं व्योम विचिन्तयेत् ॥

इति । श्रीमद्रत्नत्रये च

किञ्चातिशायिकं प्राहुस्तमंबरमनश्वरम् ।

शिवा नामं समैश्वर्यभाजां भोगापवर्गयोः ॥

ज्योतिर्गणानामाकाशमिव भूतादिकारणम् ।

इति । न तु भूताकाशमेव नित्यत्वादिधर्मकं ध्यायेत् तस्य
तन्मात्रकार्यत्वेन श्रुतेः । यच्छ्रूयते मात्रेभ्यो भूतपञ्चकम्
इति । तथा भूतेन तेन अभिभूतं स्वरूपं यस्य तत् तथोक्तम् ॥

p. 184)

इत्थं पृथिव्यादिभूतशुद्धिमुदीर्य, ततः परं किं
विधेयमित्याकांक्षायां गुणक्षयवशात् क्षीणशक्तिकस्य
भूतसमुदायात्मकशरीरस्य दहनाप्लावने विदधीतेत्याह (ततः)
इति । (ततः) तथाभावनानन्तरम् । (आरब्धशरीरगतभूतदोषान्)
आरब्धशरीरं फलितकर्मवर्तमानकलेबरं तद्गतानि च
समापन्नानि भूतादिनि मेदिन्यादीनि तेषां दोषाः,
पितृमातृभौतिकशरीरस्थशुक्लशोणिताख्यमलपरिणतिरूपदोषाः
तान् । तथा समुदीरितं श्रीमच्छिवतन्त्ररहस्यसारे

मातापितृमलोद्भूते देहे स्थातुं न युज्यते ।
तस्मान्मन्त्रमयः कायः क्रियते प्रतिवासरम् ॥

इति । (आप्लावयेत्) वौषडन्तमूलेन
शिखान्तस्थाधोमुखपद्मेत्यादिवक्ष्यमाणवदमृतधाराभिरब्

हिषेचयेत् इत्यर्थः ॥

p. 185)

ननु एवं भूतशुद्धिं विधातुमशक्तानां कथमित्याशंक्य
तद्विधिं प्रकारान्तरेण सञ्चष्टे (यद्वा) इति । (यद्वा) एवं नो चेत् ।
देहस्य वटतरुरूपत्वं वर्णयति (पृथिव्यादि) इति ।
(p.rthivyaadibhuutabiijam) पृथिवी आदिर्येषां तानि पृथिव्यादीनि तानि
च तानि भूतानि च तान्येव बीजमंकुरकारणं यस्य स तथोक्तः
तम् । आदिपदेन अप्तेजोवाय्वाकाशानां प्रकाशः क्रियते ।
स्थूलशरीरापेक्षया चेदमुक्तं अतोऽत्र
भूतपरिणामशुक्लशोणितबीजमिति तात्पर्यार्थः ।
(ब्रह्मविष्णुभ्यामुद्भिन्नांकुरम्) ब्रह्मणः सृष्टिकर्तृत्वम्
विष्णोः पालकर्तृत्वं तत उभाभ्यामुद्भिन्नः उत्पादितः अङ्कुरः
यस्य स तथोक्तः तम् । (रागद्वेषधर्माधर्ममूलम्) रागश्च
इच्छा द्वेषश्च विरोधः धर्मश्च ज्योतिष्टोमादिः अधर्मश्च
ब्रह्म हत्त्यादिः ।

p. 186)

तौ च आम्नायसिद्धौ प्रागनुष्ठितौ बुद्धौ संस्काररूपतया
गुणत्वेनोच्यते । अत्र च लोकान् प्रकाशांस्तज्जातीयेषु भोग्येषु धत्ते
धारणं करोतीति धर्मः । तद्विपर्ययसाधनादधर्मः । नासौ

लोकान् धत्ते नापि च प्रीतिम्। किन्तु अलोकानसात्विकान् राजसांश्च
तज्जातीयेषु भोग्येषु धत्ते अप्रीतिञ्च दुःखमोहात्मिकां धत्ते इति
अधर्मः। एवं धर्माधर्मशब्दार्थः। तथा
श्रीमत्सूक्ष्मस्वायम्भुवे

धत्ते लोकानिमान् सर्वान् प्रीति च पुरुषे पराम्।
धर्मस्तेनोच्यते तज्ज्ञैस्धर्मस्तद्विपर्ययात्॥

इति। मोहश्च अनित्या शुचिदुःखानात्मसु
नित्यशुचिसुखात्मप्रतिपत्तिरूपश्चित्तमलः
रागद्वेषधर्माधर्ममोहाः त एव मूलं यस्य स तथोक्तः तम्।
पूर्वजन्मार्जितपुण्यपापानुकूल्येन
ब्राह्मणादिदेहमिन्द्रियपाटनं नियतायुषं नियत भोगं
धरतीति धर्माधर्मयोर्मूलत्वम्।

p. 187)

रागद्वेषमोहानां कर्मार्जनहेतुत्वात् तद्द्वारा मूलत्वमुक्तम्।
(विद्याविद्याधिपतिपालितम्) विद्याश्च सप्तकोटिमहामन्त्राः
विद्याधिपतयश्च अनन्ताद्यष्टमन्त्र महेश्वराः विद्या
विद्याधिपतयः। तथा श्रीमद्रत्नत्रये तत्र विद्याभुजः पूर्वे
मन्त्रा विद्याश्च नामतः इति। तैः पालितः परिपोषितः तम्।

(कलादितत्वसारम्) कला आदिर्येषां तानि कलादीनि तानिं च तानि तत्वानि च तथोदितानि तान्येव सारः स्थिरांशः यस्य स तथोक्तः तम्। सारो बले स्थिरांशे च इत्यमरः। आदिपदेन प्रकृत्यादि गृह्यते।

(तन्मात्रेन्द्रिय शाखोपशाखम्) तन्मात्राणि च शब्दादि तन्मात्राणि। पूर्वं व्याख्यातमेतत्। इन्द्रियाणि च ज्ञानेन्द्रियकर्मेन्द्रियाणि तान्येव शाखा च महाशाखा उपशाखा च कल्पशाखा एता यस्य स तथोक्तः तम्।

p. 188)

(विषयालोचनपल्लवम्) विषयाः शब्दादयः रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी इत्यमरः। तेषामालोचनानि ग्रहणरूपव्यापाराः। तथा श्रीमत्पौष्करे आलोचनत्वं व्यापारश्चक्षुरादेश्च केवलः इति। विषयालोचनानि तान्येव पल्लवाः किसलयानि यस्य स तथोक्तः तम्। अत्र विषयालोचनानां गमागमत्वदर्शनात् पल्लवत्वेन रूपकमुदितम्।

(भावप्रपञ्चकुसुमम्) भावाः धर्मादयोऽष्टौ बुद्धि गुणाः। तथा श्रीमन्मृगेन्द्रे

भावा बुद्धिगुणा धर्मज्ञानवैराग्य भूतयः।
सात्विका व्यत्ययेनैते रागमुत्सृज्य तामसाः॥

इति । तेषां प्रपञ्चानि निकुरुम्बाणि शतत्रयमिति यावत् ।
तथा निर्दिष्टं भगवता रामकण्ठेन धर्मो
दशभिर्भेदैर्ज्ञानमशीत्या शतेन वैराग्यम् ।

p. 189)

ऐश्वर्यं चतुष्षट्या दशभिरधर्मस्तदर्द्धतोऽज्ञानम् ।
अवैराग्यञ्च दशभिरनैश्वर्य भिन्नमेकविंशत्या ।
भावप्रत्ययभेदश्शतत्रयेणायम् इति । तान्येव कुसुमानि यस्य स
तथोक्तः तम् । अत्र भावाः कालान्तरे फलरूपा भविष्यन्तीति
प्रसूनतया समाम्नाताः । (बुध्यध्यनसायसंकल्पफलम्)
बुद्धिः बुद्धितत्वं तस्या अध्यवसायश्च एतद्रजतमेव न शुक्तिरिति
निश्चयरूपो व्यापारः । संकल्पो नाम
एककोटिसहचरितोऽनेकधर्मानुसन्धानात्मको मनसो व्यापारः ।
तथा श्रीमत्पौष्करे विषयाध्यवसायात्मा बुद्धिरेवैष केवलः इति
। श्रीमत्तत्वप्रकाशे इच्छारूपं हि मनो व्यापारस्तस्य भवति
संकल्पः इति । तावेव फलं यस्य स तथोक्तः तम् । फलं फले
धने बीजे निष्पत्तौ भोगलाभयोः इति विश्वः । अत्र
बुद्ध्यवसितमर्थं

p. 190)

पुरुषश्चेतयते इति वचनेन बुद्धौ प्रतिबिम्बिताः मनोऽवधानिताः

अर्था एव फलरूपतया वर्णिताः। (पुरुषविहङ्गोपभोग्यम्)
पुरुषः भोक्तृस्वरूप आत्मा स एव विहङ्गः पक्षी तेन उपभोग्यम्
उपभोज्यम्। अत्र पुरुषस्य विहङ्गत्वं वासभोग
वियोगदर्शनादुक्तम्। (भोग्यभोक्तृत्वरसम्) भोग्यं च
भोगविषयं शरीरं यदाह पूर्वं पुरुषविहङ्गोपभोग्यम् इति।
भोक्ता च भोगक्रियाकर्ता आत्मा, भोग्यभोक्तारौ तयोर्भावः
भोग्यभोक्तृत्वं तदेव रसः स्वादो यस्य स तथोक्तः तम्।
रसो गन्धे रसे स्वादे शृङ्गाराध्ये ध्वनौ जले इति माधवः।
भोग्यभोक्तृत्वसंबद्धरस इत्यर्थः।
(ऊर्द्ध्वमूलमधश्शास्त्वम्) इति। एवं दहनस्य भोग्यतया
देहस्य तत्समानत्वाद्वर्णितम्। देहस्य करबीजवत्
सूक्ष्मोपचयार्थसाम्याद्वटतरुरूपत्वमभिहितम्।

p. 191)

एवं तटतरुरूपविचिन्तनानन्तरकरणीयान्याह (प्रथम) इति।
(प्रथमपूरकार्द्धेन) इति। अत्र पूरकस्तावत् द्वादशमात्रा
प्रमाणः तदर्द्धं मात्राषट्कम्। इत्थं कुंभकरेचकयोरपि
प्रमाणं योजनीयम्। तथा श्रीमज्ज्ञानरत्नावल्यां

जानुमण्डलमावर्त्य मात्रा स्याच्छोटिका क्रमात्।
ताभिर्द्वादश मात्राभिः पूरकः कुंभकस्तथा॥

रेचकश्चैवमाख्यातः प्राणायामः कनीयसः ।

इति । (स्तब्धम्) निश्चलम् । पृथिवीधारणायाः सतंभन
कार्यकर्तृत्वेनोक्तत्वात् । अत्र ओं ह्लां निवृत्तिकलायै हः हुं फट् इति
पूरकपूर्वार्द्धेन पार्थिव्या धारणया
गन्धादिपञ्चकक्षयाय पञ्चवारं मनसा उच्चरन्
पल्लवकुसुमफलशून्यं निश्चलम् च देहन्यग्रोधपादपं
चिन्तयेत् इत्यवसेयम् ।

p. 192)

(स्निग्धम्) छायावृक्षम् । स्निग्धन्तु मसृणे सान्द्रे छायावृक्षे
नमेरुणि इति विश्वः । तदनन्तरं किं कुर्यादित्याह (ततः) इति ।
(बन्धकरूपम्) सूक्ष्मस्थूलशरीररूपमित्यर्थः । (शून्यम्)
बन्धकत्वाद्वयावृत्तं असत्कल्पमिति यावत् । अत्रावसरे द्वादशान्ते
ग्राह्य भूतैश्शून्यत्वादनालंबनं
खचिन्मात्रनिष्ठमेवात्मस्वरूपं भवति न तु
मूर्च्छाद्यवस्थास्विव निरुद्धमेवेति श्रीमता
सार्द्धत्रिशतिवृत्तिकृता द्वादशान्ते निरालम्बं विज्ञानं केवलं
स्थितम् इत्येतत्सूत्रवृत्तौ समुपदिष्टम् ॥
इत्थं समुत्सारितनिरवशेषदोषस्य वपुषः
सुधाप्लावनविधिमाह (वौषडन्त) इति । (वौषडन्तमूलेन)

मूलाधारादारभ्य हकारौ

काराद्युन्मनान्तमात्मानुसन्धानपूर्वोच्चारितवौषडन्तमूलेन्

एत्यर्थः ।

p. 193)

(शिखान्तस्थाधोमुखपद्मास्त्रवदमृतधाराभिः)

शिखान्तस्थाधोमुखपद्मं तावत् सकलवस्तूनामोतप्रोतरूपेण

सर्वाधारत्वेन स्थितः परमेश्वर शक्तेर्नित्याधिष्ठेयरूपः

परमामृतरूपो द्वादशान्तस्थः परबिन्दुः । तथा

प्रक्रियान्तस्थममृतं स्त्रवन्तं चिन्तयेत् सदा ।

प्रणवं श्वेतकमलं योगपीठमधोमुखम् ॥

चिन्तयेदमृतं तस्मिन् सुषुम्नाभिन्नमस्तकम् ।

इति । तस्मात् स्त्रवन्त्यः प्रसरत्न्यः ताश्च ताः अमृतधाराश्च

तथोदिताः ताभिः । (सकलनाडीमुखं प्रविष्टाभिः)

हृतसप्ततिसहस्त्रनाडीद्वारं प्रविशन्तीभिः । ततः किमित्याशंक्य

द्वादशान्तोपारूढस्य आत्मनो हृदि विन्यासाय

प्रथममासनकल्पनप्रकारमाह (हृदये) इति ।

हृदयस्वरूपमुक्तं श्रीमद्वसिष्ठेन

मनो निर्याति विषयान्यस्मिन्नेव प्रलीयते ।

p. 194)

हृदयन्तद्विजानीयान्मनसस्स्थितिकारणम् ॥

इति । (अकारादिमात्रात्रययुक्तेन) अकारः आदिः यासां ताः
अकारादयः ताश्च ताः मात्राश्च तासां त्रयम् ।
उकारमकारावादिशब्दार्थः । अत्र ओमित्यनेन
अकारोकारमकारमात्रात्रयमिलितेन
नालपत्रकर्णिकालक्षणमात्मासनं हृदयपुण्डरीकं
संभवतीति तात्पर्यार्थः । अशरीरो ह्यधिष्ठाता नात्मा
मुक्तात्मवद्भवेत् इति श्रुतेः दग्धबन्धनकलेवरस्य निष्कलस्य
आत्मन उत्तरत्र क्रिया नोपपद्यते, न हि शरीरादिविरहिण्यवबोधः
करणं वा युक्तिमदिति मनसि निधाय,
मन्त्रमयपुर्यष्टकशरीरावतरणक्रममाह । (तत्कर्णिकायाम्) इति
। पुर्यष्टकं पुनः दृक्क्रियाशक्तिमयम् । तथा श्रीमन्मृगेन्द्रे

निर्दहेत् पाशवीं मूर्तिं सदाशिवपदस्पृशा ।

p. 195)

तद्भस्म वायुना शक्तिनापनीया वलोकयेत् ॥

दिनकृन्मण्डलाकारं वृक्रिया मण्डलञ्चितः ।

तदेव वपुरस्यैतदव्यक्तांगमितीष्यते ॥

इति । (चतुष्कलेन) चतस्रः कलाः अकारादिबिन्द्वन्ता निजांशाः यस्य स चतुष्कलः तेन । कलांशमात्रे शिल्पादौ इति नानार्थरत्नमाला । ततः प्रोक्ततत्वलयक्रमेण निर्मलस्यात्मनो हृदि पुनर्विन्यासमाह (तस्मिन्) इति । (तस्मिन्) पुर्यष्टके । (बीजरूपम्) शिवबीजात्मकम् । (शिवमयम्) शिवीभूतम् । तथा श्रीमत्सर्वज्ञानोत्तरे

ततश्चाकर्षयेज्जीवं शिवीभूतं निरामयम् ।

पूरकेण शिखान्तस्थं शिवबीजमयं परम् ॥

इति । तं निरामयम् । पूरकेण शिखान्तस्थं शिवबीजमयं परम् ॥

इति । (पंचकलेन)

p. 196)

पञ्च कलाः अकारादिनादान्ताः यस्य स पञ्चकलः तेन ।

(वौषडन्तशक्तिमन्त्रोच्चारेण)

चतुर्थ्यन्तशक्तिशब्दयुक्तमूलमन्त्रोच्चारेण । ओं ह्रौं शक्तये वौषट् इति यावत् । एव मुक्तं श्रीमता

सोमशम्भुपद्धतिव्याख्याकारेण । अत्र तावत्

निष्कलशक्तिक्षोभात् स्रुतबहुलामृतमयस्य सलिलस्य ।
मध्ये प्लवन् स हंसः पुनरागच्छस्ततो ध्येयः ॥

इति श्रुतेः आत्मनः शरीराद्विश्लेषपूर्वं संस्थापितत्वात्
तदर्थं पुनरप्यमृताप्लावनं करणीयमित्यभिप्रायः ।

अन्तर्यागः ॥

क्रि (२७) तदनु पूर्ववदङ्गन्यासं विधाय,
हृन्नाभिबिन्दुस्थानानि पूजाहोमसमाधीनां स्थानानि
संकल्प्य, वक्ष्यमाणक्रमेण
भावोपनीतपुष्पाद्यैरन्तर्हृत्पद्मे शिवं सर्वोपचारैर्मनसा

p. 197)

संपूज्य, नाभिकुण्डे स्वतस्सिद्धेऽग्नौ

ज्ञानानलं न्यसेत्तत्र सूर्यायुतसमप्रभम् ।
हृत्पुण्डरीकमध्यात्तु सौषुम्नेन पथाऽनलम् ॥
द्वादशान्तपदे योज्य तत्तेजःपुंजपिञ्जरम् ।
तेन विन्यस्तमात्रेण सर्वकर्मार्हको भवेत् ॥

इत्युक्तवत् ज्ञानानलं विन्यस्य, शिवं संपूज्य, पूरकाकृष्टेन बिन्दुप्रस्रुतामृतरूपेणाज्येन होमञ्च कृत्वा, अन्तः पूजितदेवाय समर्प्य, पूजां समाप्य, बिन्दौ सर्वतोमुखं स्फुरत्तारकाकारमीश्वरं ध्यात्वा, बहिः पूजयामीति प्रार्थ्य, लब्धानुज्ञः ॥ (२७)

(प्र) अथ शिवीकरणविधिमुदीर्य सूक्ष्मदस्थूलदेहद्वयस्य मन्त्रमयशक्तिविद्यादेहत्वसिद्धयर्थमङ्गन्यासं कुर्यादित्याह (तदनु) इत्यादिना (विधाय) इत्यनेन ॥

p. 198)

अथ

ज्योतिर्लिङ्गं हृदिस्थं यत्तदेवाभ्यर्च्यते बहिः ।
यतस्तस्मात् पुरा कुर्यादन्तर्यागमिहोच्यते ॥

इति वचनेन प्रथममन्तर्यजनविधिमाह (हृन्नाभि) इत्यादिना (लब्धानुज्ञः) इत्यन्तेन ।

हृदयेऽर्चाविधानन्तु नाभौ होमं प्रकल्पयेत् ।
ललाटे चेश्वरं ध्यायेद्वरदं सर्वतोमुखम् ॥

इति श्रीमत्कालोत्तरश्रुतेः हृदयादेः पूजाद्यवकाशत्वं

संकल्पयेदित्याह(हृत्) इति ।

कथमन्तरर्चयेदिव्याकांक्षायामाह (वक्ष्यमाणक्रमेण) इति ।

अत एवाऽत्र बाह्यार्चनमेव प्रकृतिभूतं सर्वैरङ्गैः

परिपूर्णत्वादिति तात्पर्यम् । कैर्यजेदित्याशंकायां

हृत्पद्मो पूजयेद्विद्वान् यथोक्तन्तु यथाक्रमम् ।

गन्धाद्यैरुपचारैस्तु मनसा कल्प्य पूजयेत् ॥

इति श्रीमत्सुप्रभेदवचनेन मनः कल्पितैः कुसुमगन्धादिभिः

संपूजयेदित्याह (भाव) इति । (हृत्पद्मे) इति ।

p. 199)

अत्र हृत्स्वरूपमुक्तं श्रीमद्वसिष्ठेन मनो निर्याति

विषयान्यस्मिन्नेव प्रलीयते । हृदयन्तद्विजानी

यान्मनसस्थितिकारणम् ॥ इति । तत्र पद्मं हृत्पद्मम् ।

तल्लक्षणमुक्तं श्रीमन्निश्वासकारिकायां

कदलीपुष्पसंकाशं हृदयं सर्वदेहिनाम् ।

तस्य मध्ये स्थितं पद्ममष्टपत्रं सकर्णिकम् ॥

वितस्तिमात्रं हृदयं कमलं चतुरङ्गुलम् ।

अष्टाङ्गुलप्रमाणन्तन्नाभेरूर्ध्वं व्यवस्थितम् ॥

पद्मनालं नवद्वारं समन्तात् कण्ट?कान्वितम् ।

अङ्गुष्ठपर्वतुल्याऽत्र कर्णिका सा सकेसरा ॥

कर्णिकायां भवेत् सूर्यस्तस्य मध्ये तु चन्द्रमाः ।

चन्द्रमध्ये भवेद्वह्निस्तस्य मध्ये महेश्वरः ॥

सदाशिवो महेशस्य तस्यापि परतश्शिवः ।

इति । (संपूज्य) इति । अत्र हृदयकमले अर्घ्यपात्रद्वयं कृत्वा

कन्दनालपत्रकर्णिकासु आधारशक्त्यादिशक्तिपर्यन्तशिवासनं

p. 200)

विन्यस्य मूर्त्तिद्वयपरावाहनस्थापनादिजपसमर्पणान्तं कर्म

कुर्यादित्युक्तं श्रीमता बालज्ञानरत्नावलीकारेण ॥

अन्तर्हवनविधानमाह (नाभि) इति । (स्वतस्सिद्धे)

निसर्गसमुत्पन्ने । एतद्विशेषणं कुण्डानलयोरपि संबन्धनीयम् ।

एतेन कुण्डाग्निसंस्कारयोरकरणीयत्वं दर्शयति ।

एवमुदीरितं श्रीमता सोमशंभुपद्धतिव्याख्याकारेण ।

तथा च श्रीमच्चिन्त्ये पूर्वमेवाग्निसिद्धत्वाद्विनाचाग्निमुखं

तथा इति । नाभिकुण्डगताग्नौ ज्ञानपावकविन्यासप्रकारं

स्पष्टीकरोति (ज्ञानानलम्) इति । वह्निबीजं सुषुम्ना वर्त्मना

हृत्बिन्दुगतज्ञानानलाभ्यां संयोज्य,

द्वादशान्तपदस्थशिव*?शब्दिना? सह एकीकृत्य अनन्तरं

नाभिगतं ज्वलने विन्यसेदित्य च तात्पर्यम्। तथा चाह

p. 201)

भगवान् ज्ञानरत्नावलीकारः।

नाभिकुण्डे स्वयं भूते त्रिमेखले निजभूताग्निं प्रज्वाल्य

क्रव्याकांशं परित्यज्य निरीक्षणादिभिस्संशोध्य वह्निबीजं

समुद्दीपितं रेचकेन

हृदयभ्रूमध्यगतज्ञानवह्निभ्यामेकीकृत्य द्वादशान्तं

नीत्वा पूरकेणं तं शिववह्निं नाभिगतं कृत्वा इति। (शिवं

संपूज्य) इति। अत्र अग्निं हृत्पद्मे आसनमूर्तिमूलमन्त्रैरर्चयेत्।

तथा श्रीमज्ज्ञानरत्नावल्यां आसनं मूर्त्तिमावाह्य त्रयम्

तत्र

* पा पद्म॥

६ – सकृत् स्मरेत् इति। (होमञ्च कृत्वा) इति। अत्र यथाशक्ति मूलेन

ब्रह्माङ्गैश्च द्वादशांशतो हुत्वेत्यर्थः। (समर्प्य) इति।

अत्र होमफलमिति शेषः। ततः किमित्याशंक्य अन्तर्यागं

समापयेदित्याह (पूजाम्) इति। अत्र अष्टभिः पुष्पैरभ्यर्च्य

p. 202)

पराङ्मुखार्घ्यं दत्वा पूजासमापनं विदधीत।

तथा श्रीरामनाथपद्धत्यां हुत्वा वह्नि निरुध्याथ

ब्रह्मादींश्च हृदिस्थितम्। शिवमिष्ट्वाऽष्टपुष्प्याऽथ

दत्वाऽर्घ्यं च पराङ्मुखम् निरुध्य इति॥

समाधिविधिमुपदिशति (बिन्दौ) इति। (सर्वतोमुखम्)

सर्वविषयज्ञानक्रियाशक्तियुक्तम्। (ईश्वरम्) निष्कलशिवम्।

यदाह श्रीमत्सोमशंभुपद्धतिव्याख्याकारः।

हृत्पद्मे शिवानले चार्चितं सकलरूपं तं महेश्वरं

पूर्वोक्तंमन्त्रात्मकावयवविभागरहितं निष्कलशिवं

बिन्द्वधिष्ठानात् बिन्दुरूपं चिन्तयेत् इति। एवं

भूतशुद्ध्यन्तर्यजनहवनसमाधिभिरात्मशुद्धिस्संजातेत्यवद्

हेयम्। तथा श्रीमत्कारणे

उत्सृज्य प्राकृतं भावं शिवोऽहमिति भावयेत्।

हृदये यजनं कुर्याद्धोमं नाभौ प्रकल्पयेत्॥

p. 203)

तथेश्वरन्तु भ्रूमध्ये ध्यायेत् सर्वगतं प्रभुम्।

आत्मशुद्धिरियं प्रोक्ता स्थानशुद्धिं ततश्शृणु॥

इति ॥

स्थानशुद्धिः ॥

क्रि (२७) स्थानशुद्धिमाचरेत्। अस्त्रेण तालत्रयं दत्वा,
छोटिकाभिस्तत्स्थानाद्विघ्नानुच्चाट्य अस्त्रेण परितो
ज्वलदग्निवर्णप्रा?कारं, कवचेन दक्षिणतर्जनीभ्रमणेन
परिखात्रयञ्च संचिन्त्य धेनुमुद्रया ओम् ह्रां ह्रौं शक्तये
नमः इति शक्तिजालमूर्ध्वाधो विभाव्य, सर्वत्र कृतरक्षां
भावयेत्। इति स्थानशुद्धिं विधाय ॥
(प्र) अथ इत्थं आत्मशुद्धिमभिधाय अधुना द्वितीयां
स्थानशुद्धिमतिदिशति (स्थान) इत्यादिना (भावयेत्) इत्यन्तेन।
कथन्तदाचरेदित्याह (अस्त्रेण) इति। छोटिकालक्षणमुक्तं प्राक्।
(परिखात्रयम्) खेयत्रयम्। खेयन्तु परिखां इत्युमरः।
(ऊर्ध्वाधो विभाव्य) इति।

p. 204)

अत्र शक्तया पूजास्थानमोतं प्रोतञ्च भावयेदिति तात्पर्यार्थः।
अनेन पूजामण्टपस्य

–

* पा दशांशतः ॥

(७३) मायेयत्वनिवृत्त्या बैन्दवत्वमापादितमिति समाख्यातं
श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण ॥

शिवार्घ्यकरणम् ॥

(क्रि) (२९) ततः स्वर्णादिनिर्मितमर्घ्यपात्रमस्त्रो प्रक्षाल्य,
बिन्दुप्रसृतामृतधारामयेन, शुद्धाम्बुना
वौषडन्तहृदयेनापूर्य, गन्धपुष्पदूर्वाक्षतादि विक्षिप्य,
तस्मिन्नासनमूर्त्तिब्रह्मपञ्चकविद्यादेह नेत्रमूलाङ्गैः
पुनर्मूलेन च संपूज्य, संहितयाऽविमन्त्र्य, अस्त्रेण संरक्ष्य,
कवचेनावकुण्ठ्य, धेनुमुद्रया वौषडन्तमूलेन प्ररोचयेत् ॥
ततः तज्जलेन आत्मानमस्त्रेण संप्रोक्ष्य ॥ (२
(प्र) अथ शिवार्घ्यकरणं वक्ति (ततः) इत्यादिना (प्ररेचयेत्)
इत्यन्तेन ।

p. 205)

(स्वर्णादि) इति । आदिपदेन रजतादिकं गृह्यते । तथा

सौवर्णं राजतं ताम्रं भौमं वा वारिपूरितम् ।

शिवार्घ्यपात्रमङ्गांकं वृत्तं व्रणविवर्जितम् ॥

इति ॥ अथवा पात्रमेकन्तु पाद्यमाचमनार्घ्यकम् इति

श्रीमत्सूक्ष्मश्रुतेः शिवाभिधानं पूजान्ते पाद्ये

चाचमनीयके इति श्रीमन्मृगेन्द्रश्रुतेश्च

पाद्याचमनार्घ्याणां एकमेव पात्रं, न तु तेषां पृथक्

पृथमिति मनसि निधायाह (अर्घ्यपात्रम्) इति । (अक्षतादि) इति ।

आदिपदेन क्षीरादि निगद्यते । तदुक्तं

आपः क्षीरं कुशाग्राणि तण्डुलास्सुमनास्तिलाः ।

अर्घ्योऽष्टांग इति प्रोक्तो यवैस्सिद्धार्थकैस्सहा ॥

इति । यद्यष्टाङ्गाभावः तर्हि शिवार्घ्यं केवलं जलेन विदधीत ।

तथा अष्टाङ्गं कारयेद्यत्वात्तदभावेऽम्बुपूरितम् इति ।

(संहितयाऽभिमन्त्रय) इति ।

p. 206)

अत्र ब्रह्मभिरङ्गैश्चाभिमन्त्रयेत् । तदुक्तं

शिवसनेन तन्मूर्त्या ब्रह्मभिर्विदया दृशा ।

मूलेनांगैर्विना नेत्रं पुनर्मूलेन चार्चयेत् ॥

ब्रह्माङ्गैरभिमन्त्र्याथ इति । (प्ररोचयेत्) इति ।

अत्र बिन्दुस्थानात्

कराङ्गुलिदशकाभिमुखनाडीदशकस्त्रवदमृतवत्तया

धेनुमुद्रया वौषट्कारेणास्य परमामृतरूपत्वमापाद्यत इति

तात्पर्यम्

अथ तदनन्तरकरणीयान्याह (ततः) इत्यादिना (संप्रोक्ष्य)

इत्यन्तेन । (तज्जलेन) शिवार्घ्यजलेन । (आत्मानम्) स्वशिर इत्यर्थः ॥

द्रव्यशुद्धिः ॥

(७०) (क्रि) (३०) पुष्पादिपूजोपकरणद्रव्यजातमस्त्रेण संप्रोक्ष्य,

कवचेनाभ्युक्ष्य, हृदाऽभिमन्त्र्य, कवचेनाऽवकुण्ठ्य,

धेनुमुद्रयाऽमृतीकृत्य, अर्घ्यजलबिन्दून् स्नानतोयभाण्डेषु

सपुष्पं निक्षिप्य, अमृतीकुर्यात् ।

p. 207)

इति द्रव्यशुद्धिं विधाय, (३०) (प्र) अथ स्थानशुद्धिं व्याहृत्य

तृतीयां द्रव्यशुद्धिमभिधत्ते (पुष्पादि) इत्यादिना (विधाय)

इत्यन्तेन । ननु एवं कृतात्मस्थानद्रव्यमन्त्रलिङ्गशुद्धिः इति

स्थानशुद्धेरनन्तरं द्रव्यशुद्धयुद्धेशस् अभिधास्यमानत्वात्
यथोद्देशन्तत्तल्लक्षणस्य तत्तत्समनन्तरं वक्तुमर्हत्वेन
कथमत्र तन्मध्ये शिवार्घ्यकरणविधिरुदितः इति चेत्। सत्यं
द्रव्यशुद्धेस्तावत् शिवार्घ्यजलप्रोक्षणपूर्वकत्वात्
तद्विधेस्तत्पश्चाद्भावित्वमित्यदोषः। (अभ्युक्ष्य?) इति।
अधोमुखपताकाकारेण हस्ततलेन संस्पृश्येत्यर्थः।

परिपूतेन तोयेन पूर्णान् कृत्वा लघूत्घटान्।
घटिकोर्ध्वन्तु संस्थाप्य पत्रेणार्घ्यजले क्रमात्॥

इति श्रीमत्किरणश्रुतेः स्नानतोयकुम्भेषु सपुष्पार्घ्यजलकणान्
पृथक् पृथक् पातयेदित्याह (अर्घ्यजलबिन्दून्) इति।
(स्नानतोयभाण्डेषु) इति

p. 208)

गड्डुकांश्चतुरसंस्कारसंस्कृतानित्युक्ततोयभाजनेष्वित्यर्थः।
भाण्डन्तु भाजने इति नानार्थरत्न माला। नन्वत्र द्रव्यशुद्धया
किं साध्यते, कुसुम जलादिद्रव्याणां स्वत एव शुद्धित्वादिति चेन्न
अशुद्धभुतनोत्पन्नमायेयद्रव्यजातस्याशिवतया
शिवभोगानर्हत्वात्। न च व्यापकं शिवसंबन्धाच्छिवत्वं
तस्येति वाच्यम्। शिवस्य पुष्करण पर्णवन्निर्लेपतया

द्रव्यसंपृक्तत्वाभावात्। ततः पुष्पादिपूजोपकरणद्रव्याणां

मन्त्रप्रोक्षणाभ्युक्षणाभिमन्त्रणावकुण्ठनादिना

शाक्तत्वापादनार्थं द्रव्यशोधनं विदधीत। तथा

मायेयरूपसन्त्या मादात्तशक्तिस्वरूपतः।

शिवभोग्यं भवेद्द्रव्यं सा क्रियाद्रव्यशोधनम्॥

इति॥

आत्मपूजा॥

(क्रि) (३२) स्वासने ओम् हां शिवासनाय नमः इति पुष्पं दत्वा।

हृदि मूर्त्तिं विन्यस्य चन्दनेन ललाटे

p. 209)

* पा मूर्द्धमन्त्रेण मूर्ध्नि पुष्पं

विन्यस्य इति अधितिलकं कृत्वा, मूलेन शिरसि पुष्पं दद्यात्।

इत्थमात्मपूजां विधाय, पूजाऽविरुद्धमौनमास्थाय। (३२)

(प्र) अथ सूर्योपस्थानेत्याद्युक्तात्माधिकरणशिवार्चनमाह

(स्वासने) इत्यादिना (विधाय) इत्यन्तेन।

अथ पूजकस्तदानीं कथंभूतो भवेदित्याशंक्य पूजा

विरोधविरहं वाचयमो भूयादित्याह (पूजा) इत्यादिना (आस्थाय)

इत्यन्तेन। मौनं तावत् शिवसपर्यानुचितानभिभाषणम्।

तथा मौनन्तु शिवपूजायां तदयोग्याप्रशंसनम्॥

मन्त्रशुद्धिः॥

(क्रि) (३२) मन्त्रान् ह्रस्वदीर्घप्लुतक्रमेण

ओङ्कारादिनमोन्तानुच्चार्य, मन्त्रशुद्धिं कुर्यात्॥ (३२)

(प्र) अथ द्रव्यशुद्धिमुपवर्ण्य चतुर्थीं मन्त्राशुद्धिमाचष्टे

(मन्त्रान्)

p. 210)

इत्यादिना (कुर्यात्) इत्यन्तेन (मन्त्रान्) मन्यन्ते एभिरिति मन्त्राः।

यद्वामननत्राणधर्मयोगिनो मन्त्राः तान्। तथा

मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः।

मननत्राणधर्मित्वान्मन्त्र इत्यभिधीयते॥

इति यद्यपि वात्त्यनिष्ठो मन्त्रशब्दस्तथाप्य भेदोपचारादिह

वाचकेषु च वर्तते। ते पुनर्ब्रह्माङ्गमूलाः। एतेषामुद्धारो

यथा षण्डाक्षररहितेषु षोडशाक्षरेषु ह्रस्वा

नवमसप्तमपञ्चमतृतीय प्रथमस्वराः सान्तसहिताः पञ्चं

ईशानादिपञ्चब्रह्म बीजानि क्रमादुच्यन्ते। तस्मिन्

षोडशस्वरवर्गे फु

द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशस्वराः षट् सान्तयुक्ता

हृदयाद्यङ्गबीजान्युदीर्यन्ते। तथा समीरितं श्रीमत्कारणे

षोडशस्वरसंघे तु नपुंसकविवर्जिते।

द्वादशस्वरसङ्घेन नादाख्यार्णसमन्वितम्॥

p. 211)

व्योमाग्निभूतवर्णाश्च सप्तमन्नवमन्तथा।

बिन्दुनादसमायुक्तं ब्रह्मपञ्चकमुच्यते॥

सद्यं वाममघोरं च तत्पुरुषेशानका द्विजाः।

ब्रह्माण्यनुक्रमेणैव नमस्कारान्तकाणि तु॥

द्वितीयेन चतुर्थेन षष्ठेनैवाष्टमेन च।

दशद्वादशवर्णाभ्यां षडङ्गानि विधीयते॥

हृदयं च शिरश्चैव शिखा कवचमेव च।

नेत्रमस्त्रं षडङ्गानि कीर्तितानि क्रमेण तु॥

हृदादिनेत्रपर्यन्ता बिन्दुयुक्ताः प्रकीर्तिताः।

अस्त्रं विसर्गपर्यन्तं जातिषट्कसमन्वितम्॥

प्रणवञ्चादितः कृत्वा मन्त्रोच्चारमनन्तरम् ।

अभिधानं चतुर्थ्यन्तं नमस्कारान्त संयुतम् ॥

ब्रह्माङ्गानामथोच्चारस्सर्वकार्येषु पूजिताः ।

इति । सदाशिवभट्टारकस्य मूलमन्त्रोद्धारः

कः पाठः ॥ * पा ओम् हां हं हां शिवमूर्तये नमः इति

अधिकः पाठः ॥

p. 212)

प्रदर्शितः श्रीमत्क्रियाकरणमण्डनपद्धत्यां

सान्तं षष्ठं सजंभारि बिन्दुनादसमन्वितम् ।

संप्रदानशिरोमन्त्रा हृद्भुवा नीतियोजितः ॥

इति (ह्रस्वदीर्घप्लुतक्रमेण) ह्रस्वं च विन्द्वन्तोच्चारः दीर्घं च

ब्रह्मरन्ध्रान्तोच्चारः प्लुतञ्च द्वादशान्तपर्यन्तोच्चारः

ह्रस्वदीर्घप्लुतानि तेषां क्रमः तेन । अत्र ब्रह्मणां

ह्रस्वक्रमः अङ्गानां दीर्घक्रमः मूलमन्त्रस्य प्लुतक्रमः ।

तथा श्रीमत्सार्द्धत्रिशतिकायां ब्रह्माणि ह्रस्वान्युक्तानि

दीर्घाण्यङ्गानि षण्मुख इति । तथाऽन्यत्र मूलं प्लुतं

शिखान्तस्थम् इति ॥

ननु ब्रह्मबीजमध्ये ईशानतत्पुरुषबीजयोरोकारैकारयोः

कथं ह्रस्वत्वं सन्ध्यक्षराणां ह्रस्वा न सन्ति हीति। सत्यं

केषाञ्चिन्मतमेतत्। यदाहुः शिक्षाकाराः छन्दोगानां

सात्यमुग्रिराणायनीया ह्रस्वगोकारमैकारञ्च पठन्ति इति।

एवमुक्तं श्रीमत्सार्द्ध त्रिशतिवृत्तिकारेण।

p. 213)

तदुक्तं बिन्दुनादशिखाप्रान्तं मन्त्रमुच्चार्य शोधयेत् इति।

तथा च ह्रस्वं बिन्दुगतं दीर्घं ब्रह्मरन्ध्रगतं प्लुतम्।

द्वादशान्तपदे योज्य प्रासादं मन्त्रशुद्धये ॥ इति। (ओंकारादि

नमोन्तान्) इति। अत्र ब्रह्माङ्गमूलमन्त्रान्

प्रणवादिनमस्कारांतानुच्चरेत्। तथा

श्रीमत्सन्तानसंहितायां

ओंकारं पूर्वमुच्चार्य नमस्कारान्तमेव च।

ब्रह्माङ्गानि च प्रासादं शिवबीजं तथैव च ॥

इति। अङ्गानां न गोऽन्तत्वं प्राक् सकलीकरणविधौ प्रदर्शितं च।

मन्त्रशुद्धिर्नाम

मायीयशब्दव्यङ्ग्यत्वजनितस्पर्शलक्षणदोषस्य

परतत्वसमाश्रयतः क्षपणम्। तदुक्तं

मन्त्रशुद्धिर्भवेदैवं परतत्त्वसमाश्रयात् इति। तथा च

दन्ताधरोष्ठसञ्चारे मन्त्रस्याशौ च निर्हणात्।

नादान्तोचारणे नैव मन्त्रशुद्धिरुदाहृता॥

इति। अत्र च ब्रह्माङ्गानि शाक्तानि न त्वाणवानि।

p. 214)

यदाह श्रीमन्मतङ्गवृत्तिकारः शिवाङ्गब्रह्मणां

शिवमूर्तित्वे सति शक्तिरुपत्वेनोक्तत्वात् वस्तुतः

७३- सदाशिवपद एव स्थितिः इति। तथा ज्ञानशक्तिमयो

मन्त्रशिवेनाधिष्ठितस्सदा इति॥

लिङ्गशुद्धिः॥

(क्रि) (३३) तदनु पूर्वरचितां पूजां गायत्र्या संपूज्य,

सामान्यार्घ्येण सहृदा स्वाहान्तमूलेन सद्यादिक्रमेण

पञ्चशिरस्सु नर्घ्यं धूपं दीपञ्च दत्वा, पूजोपरि हस्तं

निधाय, सद्यादिब्रह्मपञ्चकमावर्त्य, लिङ्गात्

पूजामस्त्रमन्त्रेणापनीय, शुद्धपात्रे चण्डार्थमैशान्यां
हृदयेन विन्यस्य, अस्त्रेण लिङ्गपिण्डिके प्रक्षाल्य
सामान्यार्घ्यजलेनास्त्रेणाभिषिच्य, चललिङ्गे अष्टपुष्पिकया
आसनमूर्तिमूलमन्त्रैर्वाऽभ्यर्च्य, अर्घ्यधूपादि दत्वा, अस्त्रेण
पूजामपनीय,

p. 215)

शुद्धोदकेन संस्नाप्य, पञ्चामृतादि संभवे तेनापि
जलधूपाष्टपुष्पिकान्तरितेनाशून्य मस्तकं मूलेनाभिषिच्य,
यवादिचूर्णेन विरूक्ष्य, सम्यक् शुद्धिं कृत्वा, मूलेन
पञ्चवारं ब्रह्मभिरङ्गैः स्वाहान्तव्योमव्याप्यादिना ना
सहस्त्रधारया च सुगन्धिशीतलजलेन यथेष्टमभिषिच्य,
गन्धोदकेन स्थापितशिवकलशेनापि संस्नाप्य,
पश्चाद्धृदयेनार्घ्यजलेनाभिषिच्य, वर्मणा शुक्लवस्त्रेणोन्मृज्य
। पीठे समारोपयेत्॥ एवं कृतात्मस्थान द्रव्य मन्त्रलिङ्गशुद्धिः
शिवं पूजयेत्॥ (३३) (प्रभा) अथ मन्त्रशुद्धिमुदाहृत्य
पञ्चमीं लिङ्गशुद्धिमभिधत्ते (तदनु) इत्यादिना (समारोपयेत्)
इत्यन्तेन। तथा

प्राङ्मुखस्सकलैर्द्रव्यैरभिषिञ्चेद्यथाविधि।
पीठमारोपयेत् पश्चादुदगास्यस्समर्चयेत्॥

च कल लिङ्गे तु पूर्वास्यस्स्थि

ई पा स्नानवेद्युपरि वस्त्रं निधाय, सडुत्थासनं संपूज्य,
ओन्नमो देवदेवेश सर्वलोकैक नायक।

p. 216)

उत्तिष्ठं स्नानकर्मार्थमात्मरक्षार्थमेव च ॥

इति विज्ञाप्य, शिवलिङ्गं समादाय, स्नानवेद्युपरि न्यस्य
इत्यधिकः पाठः ॥

* पा अस्त्रेण पुष्पं क्षिप्त्वा, शिवमन्त्रमनुस्मरन्। इत्यधिकः
पाठः ॥

(६८) त्वा - पूजयेत्। इति लिङ्गमूर्द्धगतां पूजां पूर्वकाल
प्रकल्पिताम्। गायत्र्या पूजयित्वा इति श्रीमत्कामिकवचनं हृदि
निधाय प्राक्कालकृतां लिङ्गोत्तमाङ्गसङ्गतामर्चां गायत्र्या
यजेदित्याह (पूर्वरचिताम्) इति। यदि चललिङ्गं तदा
पेटकमुद्घाटय लिङ्गं हस्ताभ्यां संगृह्य, वस्त्रं विसृज्य
स्नानवेद्युपरि विन्यस्य गायत्र्याऽर्चयेत्। (आवर्त्य) इति।

कनिष्ठाद्यङ्गुलीभिः सद्यादिशिरस्स्पर्शनक्रमेण विन्यस्येत्यर्थः

। तथा श्रीमदंशुमति वक्त्रन्यासार्घ्यमेवं च निर्माल्यस्य

विसर्जनम् इति । अत्र च एवं नैष्ठिकः । भौतिकस्तु ईशानादिक्रमेण

पञ्चशिरस्स्वर्घ्यमङ्गुष्ठादिभिर्न्यासं च कुर्यात् ।

p. 217)

तद्यथा श्रीमत्सूक्ष्मे

अर्घ्योदकेन संप्रोक्ष्य वक्त्रन्यासं समाचरेत् ।

अङ्गुष्ठादिकनिष्ठान्तं पञ्चब्रह्ममनुं न्यसेत् ॥

इति । लिङ्गशब्देन चात्र लिङ्ग द्वित्रिकरणे इति धात्वर्थगत्या लिङ्गयति

सृष्टिस्थित्यादिभिः कृत्यैः जगत् चित्रीकरोतीति पारमेश्वरं

तेजोऽभिधीयते । तद्व्यक्तिस्थानं तु

शैलादिकमुपचाराल्लिङ्गशब्देनोच्यते । यदाहुर्गुरवः

लिङ्गितं चित्रितं येन जगत् कृत्यैश्च पञ्चभिः ।

तत्तेजश्शाम्भवं लिङ्गं भाक्तं तद्व्यक्तिभूमिकम् ॥

इति । (पूजामादाय) इति । अत्र कनिष्ठानामिकामध्ये पुष्पं

संगृह्य, अङ्गुष्ठतर्जनीभ्यां लिङ्गमस्तकात्

पूजामस्त्रेणावरोप्य, पुष्पं लिङ्गोत्तमाङ्गे विन्यसेत्। तथा

श्रीमदंशुमति

कनिष्ठानामिकामध्ये नवपुष्पं तु संग्रहेत्।

अङ्गुष्ठतर्जनीभ्यां च निर्माल्यञ्च विसर्जयेत्॥

p. 218)

इति।

लिङ्गं प्रक्षाल्य चास्त्रेण शिवास्त्र यत् प्रकीर्त्तितम्।

रुद्ररूपधरा विघ्ना?स्तेन प्रोत्सारितास्तु ते॥

पीठं प्रक्षाल्य पश्चात्

इति श्रीमत्सर्वज्ञानोत्तरश्रुतेः विघ्ननिरसनाय लिङ्गपीठे

शिवास्त्रेणाभिषेचयेदित्याह (अस्त्रेण) इति॥

इत्थं चलाचललिङ्गयोः सामान्येन लिङ्ग शोधनमुदाहृत्य

इष्टलिङ्गे पञ्चामृताद्यभिषेकाय अष्टपुष्पिकार्चनलक्षणं

सामान्यावाहनं करणीयमित्याह (चललिङ्गे) इति। (चललिङ्गे)

बाणादिलिङ्गे। तथा श्रीमत्सुप्रभेदे

स्फाटिकं क्षणिकं शैलं बाणलिङ्गं च लोहजम्।

चललिङ्गम् समाख्यातम् इति । अष्टपुष्पिका लक्षणमग्रे वक्ष्यति ।

अत्र इष्टलिङ्गं गायरीपूजादिकं विना

केवलमष्टपुष्पिकयाऽभ्यर्च्य अभिषेचयेदिति केचिदूविरे ।

तदसमञ्जसं, तत्रापि गायत्री पूजाया विहितत्वात् ।

p. 219)

तथा श्रीरामनाथपद्धत्यां

गायत्र्या प्राकृतामर्चामभ्यर्च्याजादिशम्बरैः ।

सामान्याघ्र्येण दत्वाऽघ्र्यं तथा ब्रह्माणि विन्यसेत् ॥

लिङ्गस्थं माल्यमैशान्यां हृदा चण्डाय निक्षिपेत् ।

अस्त्रेण पिण्डिकां लिङ्गं प्रक्षाल्यास्त्राघ्र्य वारिणा ॥

हृदाभिषेचयेल्लिङ्गमिति लिङ्गविशोधनम् ।

शिवमभ्यर्च्ययेदङ्गैः पीठंमूर्तिशिवादिभः ॥

इति । चललिङ्गे पुनः स्थिरलिङ्गवत्

स्थिरासनपूजादिपूर्वमभिषेचनमनुचितम् । यदाह

श्रीमज्ज्ञानरत्नावलीकारः इष्टलिङ्गपूजायामावाहनादि कृत्वा

पञ्चगव्यादि स्नपनकरणमशक्यम् । यदि पञ्चगव्यस्नपनादि

क्रियते तदानीं निर्माल्यसंकरप्रसङ्गः । अतः

पञ्चगव्यादिविस्तरस्नपनकरणाय लिङ्गशुद्धिसमनन्तरं

अष्टपुष्पिकया आसनमूर्त्तिमूलैर्वा शिवं संपूजयेत् इति ।

p. 220)

तथा चाह भगवान् मृगेन्द्रपद्धतिव्याख्याकारः ।

अन्येत्वस्य चललिङ्गत्वात्

शक्त्यादिशक्तिपर्यन्तानामासनमन्त्राणां पीठ एव

न्यस्यमानत्वात्

समग्रासनपूजाष्टत्रिंशत्कलान्यासादिपूर्वकं

स्थिरलिङ्गतदावाहनादिषु कृतेष्वपि चलनमित्त्युन्ति ।

तन्न युक्तं

पूज्यमानं यदा लिङ्गं हस्तादि स्पर्शतो मनाक् ।

चलितं घोरमन्त्रस्य शतं शेष क्रियां नयेत् ॥

इति ज्ञानरत्नावल्यां मूलवचनत्वेनोक्तत्वात्

समग्रासनपूजायां विसर्जनात् पूर्वं चलनं न योग्यम् ।

किञ्च वायव्येशानकोणयोर्गणपतिं गुरुपूजायाः सर्वासु

संहितासु पद्धतिष्वपि करणीयतया विहितत्वात्, स्नपनसमये

निर्माल्यशुद्धिकाले पूजितयोस्तयोर्गणपति गुर्वोः पूजामध्ये

विसर्जनस्याश्रुतत्वात्, स्थण्डिलार्चितदेवानां विसर्जनात्,

p. 221)

पूर्वं चलने प्रायश्चित्तस्य श्रुतत्वात्, तयोश्चलनमवश्यभावि।
अतः समग्रासनपूजा न कार्येत्यादि तत एवावधार्यम्।
तथाऽन्यत्र

सासना मूर्तिमूलांगा नेत्रहीनाऽष्ट पुष्पिका।
एतदावाहनं संभोस्स्नानकालोचितं विदुः॥
अलमेतावदात्मार्थे

इति। (अर्घ्यधूपादि) इति। अत्र अर्घ्यं विशेषार्घ्यम्। तथा
श्रीरामनाथपद्धत्यां शिवमभ्यर्चयेदङ्गैः
पीठमूर्तिशिवादिभिः। विशेषाऽर्घ्येण दत्वाऽर्घ्यम् इति।
तैलादिद्रव्याभिषेकविधिमाह (पञ्चामृतादिसंभवे) इति।
अत्र पञ्चामृतन्तावत् द्विविधं रसंफलपञ्चामृतभेदेन।
तत्र रसपञ्चामृतं गन्धोदकमिश्रितानि क्षीरदधिघृत
शर्करामधूनि। यद्येतानि कदलीपनसाम्रफलमिश्रितानि तर्हि
फलपञ्चामृतं भवति। तथा मधु

p. 222)

पयदधिसर्पिश्शर्करा मध्यमादीन्
शरपदशिवकोष्ठैर्विन्यसेद्ब्रह्ममन्त्रैः।

कुडवयुगलयुग्मप्रस्थपादन्तु पञ्चामृतमिह

शिवमन्त्रैस्स्नापयेत्। त्रीणि काले॥ इति। तथा श्रीचिन्त्यविश्व सादाख्ये

मध्ये दुग्धं दधि प्राचि दक्षिणे घृतमेव च।

उत्तरे मधु संयोज्यं शर्करा पश्चिमे भवेत्॥

कदलीपनसाम्रञ्च गन्धोदकन्तथैव च।

अग्न्यादीशान पर्यन्तं स्थापयेत्तु विशेषतः॥

इति।

पञ्चमृतं ततस्स्नाप्यप्रतिप्रस्थं विशेषतः।

इति। तैलादिरादिशब्दार्थः। तथा श्रीमत्कारणे

प्रथमं गन्धतैलं च द्वितीयं पञ्चगव्यकम्।

त्रयं पञ्चामृतञ्चैव घृतस्नानं चतुर्थकम्॥

पञ्चमं पयसा स्नानं दधिस्नानन्तु षष्ठकम्।

सप्तमं मधुना स्नानं इक्षु स्नानमथाष्टमम्॥

नवमं फलसारं च नालिकेरोदकं दशम्।

एकादशं गन्धतोयं द्वादशं स्नपनं भवेत्॥
शंखाभिषेकशुद्धान्नं धूपं दीपं विशेषतः।

इति। (तेनापि) पंचामृतादिनापि। (जलधूपाष्टपुष्पिकान्तरितेन)
जलधूपाष्टपुष्पिकाभिः अन्तरितं अन्तरं कृतं मध्ये
कृतमित्यर्थः। अत्र पूर्वं तैलमभ्यज्य अष्टपुष्पादि दत्वा
जलेनाभिषिच्य तदनुद्रव्यान्तरेणाभिषेचयेत्। एवं प्रतिद्रव्यं
कुर्यादिति बोद्धव्यम्। तथा श्रीमच्चिन्त्यविश्वसादाख्ये

मध्ये मध्ये च धूपञ्च दीपं चैव प्रदापयेत्।
जलप्रदानं पुष्पं च तथैवार्घ्यं निवेदयेत्॥

इति। (अशून्यमस्तकम्) शून्यःपुष्परहितः मस्तकः मूर्द्धा यस्य
तत् शून्यमस्तकं तत् न भवतीति तथोक्तम्। तथा श्रीमत्करणे
न शून्यमस्तकं लिङ्गं पुष्पैः कुर्यात् कदाच इति।

p. 224)

(विरूक्ष्य) उद्वर्त्य। तथा महास्नानं ततः कार्यं
गन्धतैलामृतादिभिः। उद्वर्त्य यवचूर्णेनं इति। (गन्धोदकेन) इति।
गन्धाश्चन्दनकुंकुमादिगन्धद्रव्याणि। गन्धशब्दोऽयं
पुंसि बहुत्वे च।

गन्धस्तु सौरभे मृत्योर्गन्धके गर्वलेशयोः ।

स एव द्रव्यवचने बहुत्वे पुंसि च स्मृतः इत्यभिधानात् ।

तैर्युक्तमुदकं गन्धोदकमिति मध्यपदलोपिसमासः तेन ।

(संमृज्य) इति । कवचेन समामृश्येत्यर्थः । तथावर्मणा

वाससाऽमृज्य इति । इत्थं लिङ्गशुद्धिमुदीर्य

उक्तमर्थमुपसंहरन् आत्मादिपञ्चशुद्धिं कृत्वैव

शिवमर्चयेदिति नियमयति (एवम्) इत्यादिना (पूजयेत्) इत्यन्तेन ॥

गणेशकमलागुरुपंक्तिपूजा ॥

(क्रि) (३४) त्र पीठस्य वायव्यां दिशि दक्षिणाभिमुखस्थितं

p. 225)

गणपतिं पूर्वोक्तवत् ध्यात्वा, ओं हां गणपतये नमः इति

संपूज्य, उत्तरे दक्षिणाभिमुखस्थितां प्रियं पूर्वोक्तरूपां

शिवशक्तिमेव संस्मृत्य, ओं हां महालक्ष्म्यै नमः इति

संपूज्य, ईशाने

सदाशिवमनन्तञ्च श्रीकण्ठञ्च तथाऽम्बिकाम् ।

स्कन्दं विष्णुञ्च ब्रह्माणं गुरून् सप्त स्मरन् यजेत् ॥

ओं हां सदा शिवादिगुरुभ्यो नमः इति गुरुनभ्यर्च्य,
सामान्याघ्र्यं दत्वा, गन्धपुष्पधूपदीपादिभिरिष्ट्वा,

गणेश कमले स्वामिपादुके मां जगद्गुरुम् ।
यजन्तमनुजानीत यथा संपन्नकारकम् ।

इति विज्ञाप्य देवं संपूजयामीति प्रार्थ्य, लब्धानुज्ञः ॥ (३४)
(प्र) अविघ्नार्थन्तु यजनं गणेन्द्रस्य पुरा भवेत् इति
श्रीमत्पौष्करवचनेन पूर्वं गणपतिपूजां

p. 226)

लक्ष्मीगुरुपंक्तिसपर्याञ्च वक्ति (तत्र) इत्यादिना (लब्धानुज्ञः)
इत्यन्तेन । सदाशिवादि गुरुसप्तकस्य एकरूपतया ध्यानं
समीरितं तत्रभगवता मृगेन्द्रपद्धतिव्याख्याकारेण

ईशानकोणे जटामकुटयुक्तं सितपाण्डराङ्गं योगपट्टान्वितं
धृतयज्ञोपवीतं नाभिस्थलोपरि कृतयोगमुद्रं द्विभुजं
सौम्येक्षणं ध्यायन गुरुपंक्तिं पूजयेत् इति ।
गणपत्यादेः शिवार्चनं प्रति विज्ञापनप्रकारं
श्रीमन्मृगेन्द्रवचनेन समावष्टे (गणेश) इति ।

हे गणेश हे कमले हे स्वामिपादुके इति एकैकामन्त्रणात्मिका

संबुद्धिः। (यजन्तम्) जगद्गुरुयजनोद्यतम्

(यथासंपन्नकारकम्) यथाशक्त्युपहृतोपकरणम्॥

शिवासनपूजाविधिः॥

(क्रि) ३५- शिवं यजेत्। ततो देवस्य पीठाधोभागे मध्यतः

p. 227)

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम्।

मौलौ बीजांकुराकारां वरदामभयप्रदाम्॥

पाशांकुशधरां शक्तिं क्रियामाधाररूपिणीम्।

इति ध्यात्वा, ओं हां आधारशक्तये नमः इति संपूज्य,

ब्रह्मशिलोपरि

पृथ्वीकन्दं कलान्तैकनालकं भावकण्टकम्।

क्षुब्धमायामहापद्ममनेकदलसंकुलम्॥

इति ध्यात्वा, ओं हां अनन्तासनाय नमः इत्यभ्यर्च्य,

तन्मध्यगमनन्तेशं शुद्धं व्याप्त्या स्थितं त्वधः ।
ध्यात्वा ब्रह्मशिलामध्ये यजेच्छुभ्रं शिवासने ॥

इति ध्यात्वा, ओं हां अनन्ताय नमः इति संपूज्य,
तत्सामर्थ्यरूपान्

विचित्रकेसरिप्रख्यानन्योन्यं पृष्ठदर्शिनः ।
कृतत्रेतादिरूपेण शिवस्यासनपादुकान् ॥

p. 228)

सितकाश्मीरतालालीश्चारुसिंहाकृतीन् स्मरन् ।
आग्नेयादीशपर्यन्तकोणेषु च यथाक्रमम् ॥

ओं हां धर्माय नमः, ओं हां ज्ञानाय नमः, ओं
हां वैराग्याय नमः, ओं हां ऐश्वर्याय नमः इत्यभ्यर्च्य,

कृष्णश्वेतं पूर्वभागे श्वेतरक्तञ्च दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ।
चत्वारि गान्तकाण्येवमननन्तेशबलानि तु ।

यद्वा गात्रकान् स्फटिकप्रख्यां स्त्रग्यक्षान् सिद्धाशिरोधृतान

स्तब्धबाहुशिरोग्रीवान् पादुकासंक्तमस्तकान्

अग्रगात्रकपादस्थमस्तकान्नररूपिणः ॥

ध्यायन् बुद्धिगुणा धर्ममुखाधिष्ठायकान् यजेत् ।

ओं हां अधर्माय नमः, ओं हां अज्ञानाय नमः, ओं

हां अवैराग्याय नमः, ओं हां अनैश्वर्याय नमः इत्यभ्यर्च्य,

पीठस्योर्ध्वे मेखला यामधोरक्तवर्णमधश्तुदनं नमः

p. 229)

तदूर्ध्वे पाण्डरवर्णमूर्ध्वंच्छदनं शुद्धविद्याधो

भागान्तं ईशाने ओं हां ऊध्वर्च्छदनाय नमः इति संपूज्य,

तन्मध्ये

मणिक्य सदृशं कन्दं नालं नीलसमप्रभम् ।

अंकुरन्तु प्रवालाभं दलं रजतसप्रभम् ।

केसरं हेमवर्णाभमग्रे मुक्तावलीयुतम् ।

ओं हां कन्दाय नमः ओं हां बीजाय नमः ओं हां

अंकुराय नमः ओं हां नालाय नमः खल्वपत्रे ओं हां

दलेभ्यो नमः इति विद्येश्वराष्टकरूपाणि दलानि

सञ्चिन्त्याभ्यर्च्य, तन्मूलपीठोपरि ओं हां केसरेभ्यो नमः

पीठोन्नतभागे मध्ये

तप्तचामीकरच्छायां पञ्चाशद्बीजगर्भिताम् ।
केसराणाञ्चतुष्षष्ट्या कर्णिकां पूजयेत्ततः ॥

p. 230)

ॐ हां कर्णिकायै नमः ओम् हां बीजेभ्यो नमः इत्येवं
समुदितरूपं पद्मं विभाव्य ओं हां पद्माय नमः इति
पूजयेत् । यद्वा समुदितरूपं पद्मं कर्णिकाञ्च यजेत् ।
ततः पूर्वादीशान्तकेसरेषु
विद्येश्वराधिष्ठात्रीश्शिवशक्तीर्वामाद्या अष्टौ ।
शक्तिलिङ्गमूले कर्णिकायां शिवशक्तिमेव मनोन्मनीञ्च

उद्यद्दिनकराभासास्त्रिनेत्राश्च चतुर्भुजाः ।
जटामकुटखण्डेन्दुमण्डिता धृतचामराः ॥
वरदाभयहस्ताश्च शिवासक्तकराम्बुजाः ।
गोक्षीरधवलां शक्तिं कर्णिकायां मनोन्मनीम् ॥

इति ध्यात्वा, ओं हां वामायै नमः ओं हां ज्येष्ठायै नमः
ओं हां रौद्र्यै नमः ओं हां काल्यै नमः ओं हां
कलविकरण्यै नमः ओं हां बलविकरण्यै नमः ओं हां

बलप्रमथिन्यै नमः ओं हां

p. 332)

सर्वभूतदमन्यैः नमः कर्णिकेशाने ओं हां मनोन्मन्यै
नमः इति संपूज्य, दलाग्रवृत्ते ओं हां सूर्यमण्डलाय नमः
इति पीतभास्वररूपं तदधिपतिं

ब्रह्मा चतुर्मुखः पीतश्चतुर्दोर्दण्डमण्डितः ।
स्रुग्दण्डाक्षकुशोपेतस्सूर्यमण्डलमध्यगः ॥

इति ध्यात्वा, ओं हां सूर्यमण्डलाधिपतये ब्रह्मणे नमः
इत्यभ्यर्च्य केसराग्रवृत्ते ओं हां सोममण्डलाय नमः इति
श्वेतरूपं तदधिपतिं- विष्णुर्चतुर्भुजो माली
शंखचक्रगदाब्जधृक् ।

* पा ओं हां कण्टकेभ्यो नमः इत्यधिकः पाठः ।
* पा शक्तिः ॥

९०- नीलांबुदप्रतीकाशस्सोममण्डल (संस्थितः) मध्यगः ।
इति ध्यात्वा, ओं हां सोममण्डलाधिपतये विष्णवे नमः
इत्यभ्यर्च्य, कर्णिकाग्रे ओं हां अग्निमण्डलाय नमः इति

रक्तरूपं तदधिपतिञ्च

p. 232)

अग्निमध्यस्थितं रुद्रं नीलकण्ठं त्रिलोचनम्

व्याख्यामुद्रानलज्ञानं शूलहस्तं चतुर्भुजम्॥

सर्वालंकारिणं नागराजयज्ञोपवीतिनम्।

इति ध्यायन् ओं हां अग्निमण्डलाधिपतये रुद्राय नमः इतीष्ट्वा,

कर्णिकामध्ये कुटिलात्मिकं क्षीरोदनिभां शक्तिं विचिन्त्य ओं

हां शक्तिमणुलाय नमः तदधिष्ठायकमीश्वरञ्च

शाक्तेश्च मण्डलासीनं व्यालयज्ञोपवीतिनम्।

चन्द्रार्द्धशेखरं त्र्यक्षं शुद्धस्फटिकनिर्मलम्॥

खड्गत्रिशूल बाणाक्षमालाभय करात्वितम्।

कमण्डंलुधरं देवं वरारविन्दधारिणम्॥

दक्षवामक्रमात् सिंहगजचर्मपरिच्छदम्।

इत्थं विभाव्य, ओं हां शक्तिमण्डलाधिपतये ईश्वराय नमः

इति संपूज्य, तदुपरि क्षित्यादिकुटिलाप्रान्तव्याप्तिकमासनमेवं

विभाज्य ओं हां शिवासनाय नमः इति संपूज्य। (३५)

p. 233)

(प्र) अथ तदुपरि किं कुर्यादित्याशंक्य शिवासनपूजाविधिमाह

(शिवम्) इत्यादिना (संपूज्य) इत्यन्तेन। (तत्र

प्रथममाधारशक्तियजनविधानमाह (देवस्य) इति।

तद्ध्यानमाह (अधः) इति। (अधः) शुद्धाशुद्धसकल

जगतामधः प्रदेशे। (कूर्मशिलासीनाम्) कूर्मशिला

आधारभूतशिला तस्यामासीना समुपविष्टा ताम्। तथा

श्रीमत्सर्वज्ञानोत्तरे ततश्शिलां प्रतिष्ठाप्य तस्या मध्ये

यथाविधि। तत्र शक्तिं न्यसेद्विद्वानंकुराकारसन्निभाम्॥ इति।

(क्षीरोदसितविग्रहाम्) क्षीरमुद्रकं यत्र क्षीरोदः दुग्धसागरः

स इव सितं विग्रहं यस्याः सा तथोक्ता ताम्। (बीजांकुसकाराम्)

बीजांकुराणामाकार इवाकारो यस्यास्सा तथोक्ता ताम्

p. 234)

कुटिलात्मिकामिति यावत् तस्या एवांकुरोपमानश्रवणात्।

तथा हि श्रूयते श्रीमत्कालोत्तरे

चन्द्राग्नि रविसंयुक्ता ह्याद्या कुण्डलिनी तु या।

हृत्प्रदेशे तु सा ज्ञेया ह्यंकुसकारवत् स्थिता॥

इति। अस्या ह्यशुद्धानां जगदंकुराणामाधारतया

शुद्धानामुपादानतया च समस्तजगदधिष्ठानात्

तदाकारत्वोपमानमुपपन्नम्। सुगममन्यत्। सेयमाधारशक्तिः

शिवशक्त्यधिष्ठाता कुटिलेति व्यपदिष्टा तत्रभवता

सोमशंभुपद्धतिव्याख्याकारेण। नतु

किमर्थमाधारशक्तिन्यासः प्राग्विहितः ? उच्यते आधारशक्तेः

सर्वाधारत्वेन प्राक् पूजनम्।

धर्मादीनाञ्चानन्तसामर्थ्यरूपत्वान्निराश्रयाणामवस्थित्यस्

अंभवात् शक्तिमतोऽनन्तस्य तदासनस्य च

सहस्रदलमायापद्मात्मकस्य न्यासोऽर्थ सिद्धव।

p. 235)

यदुक्तं श्रीमत्समानतन्त्रे

बीजांकुरं पुरा शक्त्या पश्चादानन्तमासनम्।

अनन्तञ्च ततः कुर्यात्

इत्यादि। अनन्तेश्वरपूजामाह (ब्रह्म) इति। (ब्रह्मशिलोपरि)

आधारशिलोद्ध्र्वम्। ननु पूर्वं कूर्मशिलासीनामित्यत्र

आधारशिलासीनामिति, ब्रह्म शिलोपरीत्यत्रापि आधारशिलोर्ध्वमिति च

कथमुभयत्र एकार्थतया व्याख्यातम् ? सत्यं आधारशिला तावत्

द्विविधा कूर्मब्रह्मशिलाभेदात्। तत्र ब्रह्मशिला तु कूर्मशिलोपरि

ब्रह्मपदस्था आधारशिला। तथा श्रीमत्सुप्रभेदे

आदौ कूर्मशिलां न्यस्त्वा ब्रह्मभागान्वितां दृढाम्।
न्यसेत् ब्रह्मशिलां मूर्ध्नि नन्द्यावर्तशिलात्विताम्॥

इति। तदुक्तं श्रीमज्ज्ञानरत्नावल्यां पूर्वं कूर्मशिलायान्तु
ध्यात्वा शक्ति निवेशयेत्। ब्रह्माख्यायामनन्तञ्च इति।

p. 236)

तथा श्रीमत्कालोत्तरे

नपुंसकात्मना कुर्याद्ब्रह्म कूर्म शिलान्ततः।

इति। तथा श्रीमत्सर्वज्ञानोत्तरे ब्रह्ममध्ये शिलां न्यस्य इति।
अनन्तासन पद्मध्यानमाह (पृथ्वी) इति। (कलान्तैकनालकम्)
जलादिकलान्तैकोनत्रिंशत्तत्वैकनालम्। (भावकण्टकम्।
भावाः धर्मादयो बुद्धिधर्माः। एतेषां स्वरूपं
पूर्वमुदीरितम्। तत एव कण्टकाः नालगतास्तीक्ष्णाग्रावयवाः
यस्य तत् तथोक्तम्। वेणौ द्रुमांगे रोमाञ्चे क्षुद्राशत्रौ च
कण्टकः इति वैजयन्ती। (अनेकदलसंकुलम्) मायाया
अनेकश्रोवोसुक्तत्वात् सहस्त्रवर्णपरिपूर्णमित्यर्थः।

(क्षुब्धमायामहापदाम्) इति । अत्र

पृथिव्यादिकलान्तत्रिंशक्तत्वात्मकं

अशुद्धमायाक्षुब्धभागलक्षणमनन्तासनपद्मं

शुद्धाध्वापेक्षया मायीयस्य

p. 237)

किञ्चिज्ञत्वादिहेतुत्वान्मोहत्वाच्च मुकुलाकारमिति बोध्यम् । तथा

समभिहितं श्रीमत्सोमशंभुचरणैः कुन्देन्दुधवलोद्दण्ड

पाथोजमुकुलाकृतिम् । यजेद्ब्रह्मशिलारूढं ३२-

शिवस्यानन्तमासनम् ॥ अनन्तस्य ध्यानमाह (तन्मध्यगम्) इति ।

(शुद्धम्) श्वेतम् । (अधः) शुद्धविद्याधोभागे । (व्याप्त्या)

निखिलाशुद्धयाध्वद्धाध्वव्यापकत्वेन । तथा श्रीमत्किरणे

शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः इति ।

अत्र अनन्तो विद्येशानां प्रथमः नत्वनन्ताख्यो नागराजः ।

तस्योर्वीतत्वान्तमेव व्याप्तिर्न तूर्ध्वम् । तथा

श्रीमत्पञ्चावरणस्तवे गुरुभिरुपदिष्टं

प्रपञ्चव्याप्तितो ब्रह्मशिलास्थं मन्त्रनायकम् ।

मायापद्मासनं श्वेतमनन्तं प्रणमाम्यहम् ॥

इति । यद्यपि वक्ष्यमाण विद्यापद्मदलत्वेन विद्येश्वराणां स्थितिः

।

p. 238)

अर्थसिद्धा। यदुक्तं च श्रीमत्किरणे विद्येश्वरदलाक्रान्तम् इति।

तथाप्यनन्तस्यात्र प्रपञ्चव्याप्त्या च स्थितिरुक्तेत्यविरोधः।

एवं निर्णीतं श्रीमत्सार्द्धं त्रिशतिवृत्तिकृता।

सिंहासनाधारभूतधर्मादिपादचतुष्टय सपर्यामाह (तत्) इति।

(तत्सामर्थ्यरूपान्) तस्य अनन्तस्य सामर्थ्यरूपाः

बुद्धिगुणधर्माद्यधिष्ठायकशक्तिलक्षणाः तान्।

तदुक्तं श्रीमत्पराख्ये तस्य भा विदिशां पादा गात्रकाणि

दिशां मताः इति। तस्येति अनन्तस्य भाः तेजसः

विदिशामधिष्ठायकाः शक्तयः पादाः दिशामधिष्ठायकाः

गात्रकाणि इति तद्वृत्तौ कथितम्। तेषां ध्यानमाह(विचित्र) इति।

(विचित्रकेसरिप्रख्यान्) आश्चर्यकरसिंहकल्पान्। (पृष्ठदर्शिनः)

पृष्ठस्य दर्शयितारः न तु द्रष्टारः। (कृतेत्रेतादिरूपेण) इति।

अत्र धर्मादयः

p. 239)

कृतत्रेताद्वापरकलियुगरूपत्वमापन्नास्सन्तः शिवासनपादतां

भजन्तीति अवसेयम्। तथा श्रीमत्किरणे चतुर्युगमहापादम् इति।

(सितकाश्मीरतालादीन्) सितश्च श्वेतः काश्मीरश्च रक्तः तालश्च

पीतः तालपदेनात्र हरितालमुच्यते । कलिः कृष्णः
सितकाश्मीरतालादयः तान् । शेषं सुगमम् । धर्मादीनां
सर्वातिशायिवीर्यत्वात् सिंहरूपत्वमिति निरूपितं श्रीमता
मृगेन्द्रवृत्तिकृता ॥
अत्र अनन्त सामर्थ्यरूपाणां धर्मादिशब्द वाच्यत्वे
निमित्तमुक्तं तत्र भगवता रामकण्ठेन श्रीमत्कालोत्तरवृत्तौ
धर्मादयस्त्वनन्तसामर्थ्यविशेषाः यैः सर्वं धत्ते जानानि न
केनचिदनुरज्यते सर्वेश्वरश्च भवति इति । न तु बुद्धिधर्मा इति
मौर्ख्याद्वयाख्येयम् । तेषामत्र प्रगमासंभवात् ।

p. 240)

न चेह पशवः पाशाश्चेज्यन्त इति ।
मात्रकभूताधर्माद्यर्चनमाह (कृष्णश्वेतम्) इति ।
अधर्मादीनां कृष्णश्वेतादिवर्णद्वयवत्वमत्र

* पा अत्र ॥

९३- धर्मादिकान्तिसंक्रान्त्या सञ्जातमित्यवसेयम् । तथा
श्रीमज्ज्ञानरत्नावल्यां

अधर्मश्च तथाऽज्ञानमवैराग्यं शिखिध्वज ।

अनैश्वर्यमिति प्रोक्तं गात्रकाणां चतुष्टयम् ॥

धर्मादिवर्णसंमिश्रम्

इति । शेषं सुगमम् ॥

एतेषामेव ध्यानान्तरमाह (यद्वा) इति । स्पष्टः श्लोकार्थः ।

तदनु शिवासनपर्यंकस्य चरण

भूतधर्मादिस्तद्गात्रकरूपाधर्मादिश्च सपर्यामुदीर्य तस्य

विचो?लरुपाधश्छदनोर्ध्वच्छदनपूजनमतिदिशति (पीठस्य) इति ।

(अधश्छदनम्)

p. 241)

अधस्तत्वानि आच्छादयतीति तथोक्तम् । (तदूर्ध्वे)

ऊर्ध्वमेखलोपरिभागे । पद्मावयवभूतकन्दादिपूजामाह

(तन्मध्ये) इति । तेषां ध्यानमाह (माणिक्य) इति । स्पष्टः

श्लोकार्थः । अत्र

एवन्तत्वानि भावाश्च करणानि नपूंषि च ।

शुद्धाशुद्धाध्वनोर्विप्रा व्याख्यातानि समासतः ॥

इति श्रीमन्मृगेन्द्रश्रुतेः शुद्धविद्यामयपृथिवीतत्वरूपं

ब्रह्माणं कन्दत्वेन ध्यायेत् । शुद्धविद्यामयाः

पञ्चाशत्भावप्रत्ययाः बीजत्वेन ध्येयाः। शुद्धविद्यामयी
शुद्धिरंकुरत्वेन ध्येया। तन्मयं कलातत्वान्तं वस्तु नालत्वेन
ध्येयम्। एवमभिहितं श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण।
(खल्वपत्रे) पीठोर्ध्वनिम्नभागे। तथा

पीठोर्ध्वभागनिम्नन्तु खल्वपत्रं प्रतीयते।
तत्राब्जं तत्क्रमादूर्ध्वं दलकेसरकर्णिकाः॥

इति। दलानि किं रुपाणीत्याशंक्याह (विद्येश्वराष्टकरूपाणि) इति।

p. 242)

अत्र अष्टानां विद्येश्वराणां शुद्धाध्वनि भोगार्थं
मुख्यतया प्रतिसर्गं सृज्यत्वेनावस्थितेरुक्तत्वात्
तदावासभूतानां पुराणानां प्रागादिष्वष्टासु दिसु
नवस्थानश्रुतेश्च तदुपाधीन्यष्टौ दलानि
ध्येयानीत्येवमाम्नातं तेनैव। (तन्मूलपीठोपरि) तस्य
खल्वपत्रस्य मूलपीठं मूलपिण्डिका तस्या उपरि।
कर्णिकाध्यानमाह (तप्तं) इति। (तप्तचामीकरच्छायाम्)
तप्तचामीकरं द्रुतकनकं तस्य छायेव छाया यस्याः सा
तथोक्ता। छाया सूर्य प्रिया कान्तिः प्रतिबिम्बमनातपः इत्यमरः।
(पञ्चाशद्बीजगर्भिताम्) इति। अत्र पञ्चाशद्बीजानि

पञ्चाशद्वर्णा एवेत्युक्तं श्रीमत्पौष्करे। तथा हि
पञ्चाशद्बीजानि कर्णिकायां ककारादिमकारान्तानि
पञ्चविंशतिः अकारादि विसर्गान्तानि षोडश
यकारादिक्षकारान्तानि न वेति।

p. 243)

(केसराणां चतुष्षष्ट्या इति। अत्र मकार रहिताः
ककारादिपञ्चवर्गाः अन्तस्थाः ऊष्माणश्च
आद्यक्षरादिक्रमेण प्रत्येकमकारबिन्दुयुक्ता द्विरुच्चारिता एव
केशराणाञ्चतुष्षष्टिरित्युक्तं श्रीमत्पौष्करे। कर्णिका तु
समस्तवाचककारणभूतपञ्चाशदक्षरनिचिता
परमाकाशरूपा परमकुण्डलिन्येव ध्येया। पद्मन्तावत्
परमेश्वरस्य नित्याधिष्ठेय बिन्दुतत्वमयं ध्येयमित्युदितं
श्रीमन्मृगेन्द्रपद्धति व्याख्याकारेण। एतत् प्रफुल्ल भावनीयम्।
यदाह श्रीमत्सोमशंभुपद्धतिव्याख्याकारः उत्फुल्लत्वं
सितत्वञ्चास्य शुद्धविद्यामयत्वमेव द्योतयति। यतः तस्य
सर्वज्ञत्वादिहेतुत्वेन विकासकत्वं शुद्धत्वञ्च इति।
वामादिशक्तिपूजाविधिमाह (ततः) इति।
ननु शिवासनसपर्याविधौ कथं
वामादिशक्तिपूजावर्णनमित्याशंक्य

p. 244)

पद्मदलाकाराणां मन्त्रमहेश्वराणामधिष्ठानभेदभिन्ना

या वामादि शिवशक्तयः ता एवात्र पूजनीया वान्या इत्याह

(विद्येश्वराधिष्ठातृशिवशक्तीः) इति। तासां ध्यानमाह

(उद्यद्दिनकराभासाः) इति। मनोन्मन्या ध्यानमाह

(गोक्षीरधवलाम्) इति। अत्र वामादिशक्तीनां रक्तत्वमैश्वर्य

रक्तानामनन्तादीमधिष्ठानात्। मनोन्मन्यास्तु

अनन्ताद्यधिष्ठान सहित्यात् शुक्लत्वमिति समीरितं

श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण।

सूर्यादिबिम्बसपर्याविधिमाह (दलाग्रवृत्ते) इति। एतानि मण्डलानि

न लोकसिद्धानि भुवर्लोकचारिणी। अपि तु

ज्ञानक्रियेच्छाशक्तीनामाविर्भावाधिकरण भूतानि

आत्मतत्वविद्यातत्वशिवतत्व वाच्यानि बिन्दुविकारिणि।

तेषां लोकसिद्धानां ब्रह्माण्डान्तर्गतत्वेन

p. 245)

दिव्यसिंहासने प्रगमासंभवात्। तदधिपतयश्च न लोकसिद्धाः

। किन्तु तदधिष्ठातृशक्तिविशेषा इत्युक्तं गुरुभिः

श्रीमन्मृगेन्द्रवृत्ति दीपिकायाम्। यद्वक्ष्यति

अरुणाभं स्मरेन्नेत्रं दृक्क्रियेच्छात्मकं विभोः।

त्रितत्वरूपवह्न्यादिमण्डल त्रितयाश्रयम् ॥

इति । यद्वा इच्छाज्ञानक्रियाशक्तयः सूर्यसोमाग्निमण्डलानि ।
तदधिपाः ईश्वरसदाशिवशिखाख्याः
अधिकारभोगलयावस्थशिवभेदा एव । तदुक्तं
शिवतन्त्ररहस्यसारे

ईश्वरो ह्यात्मतत्वन्तु विद्यातत्वं सदाशिवः ।
शिवतत्वं परं शुद्धमप्रमेयमनौपमम् ॥

इति । परतत्वाभिव्यक्तिपदभूतशक्तिमण्डलपूजामाह
(कर्णिकामध्ये) इति । शिवासनपूजामाह (तदुपरि) इति । (तदुपरि)
शक्तिमण्डलोर्ध्वम् । (क्षित्यादिकुटिलाप्रान्तव्याप्तिकम्) क्षितिः

p. 246)

क्षितिशब्देन कुटिलारूपा आधारशक्तिर्विवक्षिता ।
९५- सा आदिर्यस्याः सा क्षित्यादिः कुटिलाप्रान्ता कुटिला
शक्तिमण्डलं प्रान्ते यस्याः सा कुटिलाप्रान्ता क्षित्यादिश्चासौ
कुटिलाप्रान्ता च क्षित्यादिकुटिलाप्रान्ता तथाविधा व्याप्तिः यस्य तत्
तथोक्तम् ॥
अत्र प्रोक्तनयेन आधारशक्तेः शक्तिमण्डलस्य च

कुटिलाशक्त्यात्मकत्व निरूपणात् इदं
शक्त्यादिशक्तिपर्यन्तासनमित्युच्यते । ननु कुटिलाशब्देन
परमेश्वरस्य नित्याधिष्ठेया महामाया कथ्यते
तदन्तव्याप्तिकत्वमत्र शिवासनस्य कथमुपवर्णितम्
क्षित्यादिशुद्धविद्यान्ततत्वव्यापकमासनम् इति श्रुतेः इति चेत् ।
सत्यं क्षित्यादिशुद्धविद्यान्तासनं वुभुक्षुविषयम् ।
क्षित्यादिमहामायान्तव्याप्तिकमासनं त्वत्र
मुमुक्षुविषयातयोक्तमित्यवधातव्यम् ।

p. 247)

यदाह श्रीमत्सोमशंभुपद्धतिव्याख्याकारः
क्षित्यादिशुद्धविद्यान्ततत्वव्यापकमासनम् इत्यत्र शुद्धविद्या
कुटिलाशक्तिः परा वागीश्वरी विद्या मायाऽविद्या परा स्मृता इति
श्रुतेः ।
शक्त्यादिशक्तिपर्यन्तमासनम् इति प्रतिष्ठायां वक्ष्यमाणत्वात्
पीठमेवंविधं कल्प्यमशेषाध्वविनिर्मितम् इति श्रुतेश्च ।
शक्तितत्वस्य पर्यायान्तरे सत्यपि शुद्धविद्यान्तिमतत्वनामधेय
शुद्धविद्यातत्व ग्रहणं बुभुक्षुविषये शिवासनस्य
तज्ज्ञापनमिति केचित् । अस्यां पद्धत्यां सकृत्
बुभुक्षुमुमुक्षुविषयभेदेन कर्मणां
विधानादुभयमप्याचार्यानुमतमेवं इति ।

अत्र मूर्त्यादिमन्त्राणां लिङ्गे पूजा आधाररूपाणां पीठे इति
स्थितम्। तथोक्तं श्रीमद्रत्नत्रये पीठमन्त्रान् न्यसेत् पीठे
मूर्त्यादीन् लिङ्गविग्रहे इति।

p. 248)

ननु प्रतिष्ठासमये आधारशक्त्यादि सर्वमन्त्राणां न्यासः
कृतः पुनः प्रत्यहं किमिति क्रियते। सत्यं तदा
न्यस्तमन्त्राणामेव यजनं प्रीत्यर्थं प्रत्यहं कर्तव्यम्।
नो चेत् पराङ्मुखा भवन्ति। तदुक्तं श्रीमज्ज्ञानरत्नावल्यां

मन्त्राणां यजनं कार्यम् नित्यं सन्निधिहेतवे।
अन्यथा न प्रयच्छन्ति सिद्धिं विघ्नं प्रकुर्वते॥
बहुदैवसिकी पूजा यदि नष्टा तदा गुह।
पराङ्मुखास्ततो मन्त्रा व्रजन्ति स्थानमात्मनः॥

इति॥

शिवमूर्तिनिवेशनम्॥

(क्रि) (३६) ओं हां हं हां शिवमूर्तये नमः इति मूर्तिं
तेजोरूपां दण्डाकारामविभक्तावयवां

शिवतत्वात्मकपरबिन्दुव्याप्तिकां विभाव्य, लिङ्गवेष्टने निवेशयेत्

॥

९६ (प्र) अथ शिवासनपूजाविधिमभिधाय

शिवावाहनस्याधिकरणापेक्षत्वात्

p. 249)

शिवमूर्तिनिवेशनविधिमाह (ओं) इत्यादिना (निवेशयेत्) इत्यन्तेन।

शिवमूर्तिमन्त्रोद्धारः प्रदर्शितः श्रीमज्ज्ञानरत्नावल्यां

हृत्संपुटस्त्वजातो वै मूर्तिमन्त्र ददाहृतः इति (अविभक्तावयवाम्)

इति। व्यक्तावयवत्वं विद्यादेहस्य आगमेषूक्तत्वात्।

उभयात्मिकामित्यर्थः। (शिवतत्वात्मकपरबिन्दुव्याप्तिकाम्)

शिवतत्वमात्मा स्वरूपं यस्य स शिवतत्वात्मकः स चासौ

परबिन्दुः शिवतत्वापरपर्यायं परबिन्दुतत्वमित्यर्थः। तस्य

व्याप्तिः व्यापकत्वं यस्याः सा तथोक्ता ताम्।

अत एवोक्तरीत्या सदाशिवादिशब्दवाच्येषु तत्वत्रयेषु शिवतत्वमेव

मुमुक्षुभिः शिवमूर्त्युपाधितया भावनीयमिति गुरवः।

तथा च श्रीमज्ज्ञानरत्नावल्यां

शक्त्यादिशक्तिपर्यन्तमासनं परमेष्ठिनः।

p. 250)

शिवतत्वस्थिता शक्तिर्मूर्तिर्ज्ञानात्मिकाऽनघा ॥

इति ॥ ननु मूर्तिमीश्वरतत्वाख्यां लिङ्गनाहेतु विन्यसेत् इति वचनेन
ईश्वरतत्वमेव शिवमूर्त्युपाधित्वेन ध्येयं कथमत्र
शिवतत्वमित्युक्तम् । सत्यं ईश्वरतत्वमयमूर्तिध्यानं
बुभुक्षुविषयं, अत्र तु मुमुक्षुविषयतयोक्तमित्यविरोधः ।
तथा श्रीमच्छिवतन्त्ररहस्यसारे
साधकस्येशतत्वाख्यपदापादकम् इति । तथा चाह
आक्षेपसमाधानपूर्वं श्रीमज्ज्ञानरत्नावलीकारः ननु
कथमीशसदाशिवशक्तितत्वात्मिका मूर्तिरिति ।
सत्यं सिद्धान्तस्तावत् त्रिविधाः ऊर्ध्ववक्त्रोद्भवा इत्यपि
पदार्थग्रन्था बीजग्रन्था मिश्रग्रन्था इति । तत्र पदार्थग्रन्थेषु
साधिकारपदान्येवोपास्यानि । बीजग्रन्थेषु
सर्वातीतविरधिकारपदमेवोपासनीयम् ।
उभयमप्युपासनीयमिति मिश्रग्रन्थेषु प्रतिपादितमस्ति ।

p. 251)

ततस्तत्र तत्र श्रोत्भेदादयं भेद इत्यदोषः इति । मूर्तिश्च
ज्ञानक्रियात्मिका स्वशक्तिरेव । सा च
कृत्यभेदनिबन्धनपञ्चब्रह्मात्मिका । शिवस्य निर्मलत्वेन

बैन्दवादिदेहायोगात्। तथा चोपदेशः आसनं कारणान्तन्तु
मूर्तिं शक्तिस्वरूपिणीम् इति। इच्छाशक्तिमयीं मूर्तिं कारणस्य
तु इति च श्रीमन्मोहशूरोत्तरे। मूर्तिरस्योपचारेण
पञ्चमन्त्रमयीशिवा इति श्रीमन्मतङ्गे। अलं
प्रसक्तानुप्रसक्तप्रसङ्गेन॥

(९७)अष्टत्रिंशत्कलान्यासः॥

(क्रि) (३७) अस्यां मूर्तौ मूर्द्धमुखहृद्गुह्यपादादिषु
सर्वाङ्गेषु ओं हां ईशानमूर्धाय नमः ओम् हें
तत्पुरुषवक्त्राय नमः ओं हुं अघोरहृदयाय नमः

p. 252)

ओं हिं वामदेवगुह्याय नमः ओं हं सद्योजातमूर्तये नमः
इत्यष्टत्रिंशत्कलाभेदेन विभाव्य विन्यसेत्। तद्यथा

ईशानमूर्धा पुंवक्त्रोऽघोरहृद्वामगुह्यकः।
सर्वाङ्गसिद्धये सद्यः कलाभेदेन कल्पयेत्॥
शशिन्येवोर्ध्वमूर्धास्यात्पूर्वमूर्धाऽङ्गदाभवेत्।
इष्टा च दक्षमुर्धा स्यात् सौम्यमूर्धा मरीचिका॥
ज्वालिनी पश्चिमो मुर्धा अव्यक्ताख्योर्ध्वमाननम्।

शान्तिस्स्यात् पूर्ववदनं विद्या स्याद्दक्षिणाननम् ॥

प्रतिष्ठा चोत्तरास्यं स्यान्निवृत्तिः पश्चिमाननम् ।

तमा भवेत्तु हृदयं मोहाख्या च गलं भवेत् ॥

दया च दक्षिणांसस्यान्निष्ठा वामांस एव च ।

मृत्युर्नामिश्च मायाख्या जरश्च भवेद्भया ॥

पृष्ठं स्याच्च जरा वक्षो रजा गुह्यञ्च साधनम् ।

रक्षारतिस्स्याद्दक्षोरुः पाल्या वामोरुरेव च ॥

p. 253)

कामाख्या दक्षजानुस्स्याज्जानुरसयमनीतरः ।

क्रिया च दक्षजंघा स्याद्बुद्धिस्स्याद्वामजंघिका ॥

कार्या स्याद्दक्षिणस्फिक्क धात्री वामस्फिगेव च ।

कटिर्भवेद्भामणी च दक्षपार्श्वश्च मोहिनी ॥

भवाख्या वामपार्श्वस्स्यात् सिद्धिस्स्याद्दक्षिणः पदः ।

ऋद्धिस्स्याद्वामपादश्च द्युतिस्स्याद्दक्षिणः करः ।

लक्ष्मी स्याद्वामहस्तश्च मेधावै नासिका भवेत् ।

कान्तिर्भवेच्छिरश्चैव दक्षबाहुस्स्वधा भवेत् ॥

धृतिस्स्याद्वामबाहुश्च एवं स्याच्छाक्तविग्रहः ।

ततः शक्तिनानेन सकलो विज्ञेयो विष्कलश्शिवः ॥ (३७)

(प्र) अथ

मूलाद्यसंभवाच्छाक्तं वपुर्नैतादृशं प्रभोः ।

तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः ॥

ईशतत्पुरुषाघोर वामजैर्मस्तकादिकम् ।

इति श्रीमन्मृगेन्द्र श्रुतेः शाक्तशिवमूर्तेः शरीरत्वसिद्धये

ईशानादीनि ब्रह्माणि निजावान्तराष्टत्रिंशत्

कलाभेदभावनापुरस्सरं

p. 254)

मूर्द्धमुखादिस्थानेषु दण्डभंग्या विन्यसेदित्याह (अस्याम्)

इत्यादिना (विन्यसेत्) इत्यन्तेन । (अष्टत्रिंशत्कलाभेदेन)

अष्टत्रिंशत्कलाः शशिन्यादयः तासां भेदः विभागः तेन ।

तद्यथा

ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः ।

अघोरस्य कलाश्चाष्टौ वामदेवास्त्रयोदश ॥

सद्योजातकलाश्चाष्टावष्टत्रिंशत्कला स्मृता ॥

इति । एवं न्यासेन शिवः कीदृशश्चिन्तनीय इत्याकांक्षायामाह

(ततः) इति । (शक्तिन) शशिन्याद्यष्टत्रिंशत्कलासमूहेन । (सकलः)

सह कलाभिः पञ्चमन्त्रावान्तरभेदरूपाभिः वर्तते इति सकलः।

तथा श्रीमन्मतङ्गे पञ्चमन्त्रतनुर्देवस्सकलः परिपठ्यते इति।

अत्र एतत् सकलत्वं सकलशक्तिप्रसरात्मकम्। यद्योगादीश्वरोपि सकल इत्युच्यते।

p. 255)

न तु पुरुषवन्मायीयकलादिशरीरयोगादीति

सकलशब्दवाच्यत्वेनाप्यत्र न पुरुषत्वं तथाभूतस्य

सकलस्यासिद्धत्वादिति भावः। तथा च श्रीमत्किरणे

सकलोऽपि पुंमान्नैव मायावयववर्जनात्।

निर्मलत्वाच्छिवस्यात्र न कल्प्यास्त्वसिताः कलाः॥

मन्त्रात्मकाः कलास्तस्य ते च मन्त्राश्शिवात्मकाः।

इति। एतस्मिन्नन्तरे ईशानमूर्द्धेत्याद्याः काश्चनकारिकाः क्वचित् कैश्चिल्लिखिताः। प्रतिष्ठायां ईशानस्सर्वविद्यानां शशिन्यै नमः इति सशक्तिन्यासस्यैव वक्ष्यमाणत्वात्, इष्टलिङ्गस्यापि तस्यैव शिवागमेषु विहितत्वाच्च विशक्तिन्यासप्रकाशनमसङ्गतम्॥

विद्यादेहन्यासः॥

(क्रि) (३७) क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासन स्थितम्।

p. 256)

शुद्धस्फटिकसंकाशं द्वात्रिंशल्लक्षणान्वितम्॥

पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम्।

दृक्क्रियेच्छा विशालाक्षं ज्ञानचन्द्रकलान्वितम्॥

धवलेशानवदनं पीततत्पुरुषाननम्।

कृष्णाघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम्॥

सुश्वेतपश्चिमास्यैक सद्योजातं समूर्तिकम्।

नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम्॥

शक्त्यसीशूलखड्वाङ्ग वरव्यग्रकराम्बुजम्।

दक्षिणेऽतोऽथ वामस्थैर्डमरुं बीजपूरकम्॥

नागाक्षसूत्रं नीलाब्जं विभ्राणं पञ्चभिः करैः।

यद्वा

दक्षिणे परशुं खड्गं शूलं वज्रञ्च पावकम्॥

वामभागेऽभयं घण्टां नागं पाशं तथाऽङ्कुशम्।

अथवा

खड्गखेटधनुर्बाण खट्वाङ्गं नृकपालकम् ।

p. 257)

कुण्डिकामक्षमालाञ्च वरञ्चाभयमेव च ।

आयुधैर्हस्तबृन्दानि बिभ्राणं परमेश्वरम् ॥

संचिन्त्य मूर्तेरुपरि शक्तिमात्रविजृंभणम् ।

लिङ्गाकारोपमर्देन भावने लिङ्गतां त्यजेत् ॥

ओं हां हौं विद्यादेहाय नमः इति

ब्रह्मरन्ध्रान्तव्यापकं प्रासादमुच्चार्य,

शिवतत्वान्तव्याप्तिकं सौदामिनी निभं स्त्रगञ्चलावाविर्भूतं

ध्यात्वा, लिङ्गारोहे विद्यादेहं समुदितरूपं विन्यस्य ॥

ओं हौं नेत्रेभ्यो नमः इति नेत्रं सर्वज्ञताबीजं

मुखपञ्चकनेत्रेषु विन्यस्य ॥ (३७)

(प्र) अथ व्यक्तस्य सदाशिवस्य विद्यादेहस्य न्यासविधिमाह

(क्षित्यादि) इत्यादिना (विन्यस्य) इत्यन्तेन । (क्षित्यादिकुटिलाप्रान्त) इति ।

एतत् क्षित्यादिकुटिलाप्रान्त व्याप्तिकमासनमित्यत्र प्राग्व्याख्यातम् ।

(द्वात्रिंशल्लक्षणान्वितम्) इति ।

p. 258)

एतत्

पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम्।
सप्तरक्तं त्रिगंभीरं द्विविस्तीर्णं प्रशस्यते॥

इत्यादिसामुद्रिकालक्षणमेवेत्यवधार्यम्। (पद्मासनस्थम्)
बद्धपद्मासनस्थितम्। तथा श्रीमत्क्रियाकाण्डक्रमावल्यां
द्वात्रिंशल्लक्षणोपेतं बद्धपद्मासनस्थितम् इति। (त्रिलोचनम्) इति।
लोच्यन्ते विचार्यन्ते व्याकरणैर्मीमांसादिभिश्च
शब्दतोऽर्थतश्चेति लोचनशब्देन वेदाः प्रतिपाद्यन्ते। त्रयो लोचना
वेदाः कर्म प्रतिपादनद्वारा साक्षाच्च प्रतिपादकत्वेन यस्य स
तथोक्तः। तदुक्तं सर्वैर्वेदैः प्रतीतो यः इति। अथवा त्रीणि लोचनानि
तमोपहररूपाणि नयनानि यस्य स तथोक्तः तम्।
(ज्ञानचन्द्रकलान्वितम्) इति।

p. 259)

अत्र प्रकाशकत्वादाह्लादकत्वाच्च ज्ञानशक्तिरेव
चन्द्रकलात्वेनोच्यते। एवमुदितं श्रीमन्मृगेन्द्र वृत्तिदीपिकायाम्।
सुगममन्यत्॥
(२००) ननु शुद्धस्फटिकसंकाशमित्युक्तत्वात् सादाशिवो देह
आपादमस्तकं सतैकवर्णः तत् कथं तत्पुरुषादिमुखानां

तद्वर्णविरहेण पीतादिवर्णभेदवर्णनमिति चेत्। सत्यं

तत्पुरुषाघोरवामदेवसद्योजातानां चतुर्णामपि मुखानां

क्रमेण शक्रय?मकुबेरवरुणोपरागात्

पीतकृष्णरक्तहिमवर्णानां व्यवस्थितिरित्यदोषः।

तथा श्रीमत्पराख्ये

आकाशमूर्ध्वतश्शुक्लमतश्श्वेतं तु विन्यसेत्।

प्राग्दिश्यमपरं पीतमिन्द्रच्छायापरिष्कृतम्॥

p. 260)

अघोरं दक्षिणे देशे कृष्णमन्तकरुक् स्थितम्।

वामञ्चोत्तरतो रक्तं कुबेरकिरणारुणम्॥

सद्यं पश्चिमदिग्भागे विमलं वरुणच्छविम्।

इति। विद्यादेहे तत्पुरुषादिमुखानां स्थानं प्रदर्शितं

श्रीमज्ज्ञानरत्नावल्यां

प्राचि तत्पुरुषं विद्याद्धृदयोपरि शोभनम्।

अघोरं दक्षिणस्कन्धे वामस्कन्धे तु गुह्यकम्।

सद्योजातं प्रतीच्यान्तु पृष्ठग्रीवोपरि स्थितम्।

इति । (शक्त्यसिशूलखट्वाङ्गवरव्यग्रकरांबुजम्) इति । अत्र
खड्वांगं तावत् खट्यते काम्यते कामिभिरिति खट्वा पर्यंकः
तस्या अङ्गं खट्वांगं योगोपकरणविशेषः ।
खट्वाङ्गस्य योगोपकरणविशेषत्वमुक्तं पुष्पदन्तेन महोक्षः
खट्वांगम् इत्यादिश्लोके । वरः अधोमुखपताका । व्यग्रशब्दः
व्यापृतपर्यायः ।
वग्रो व्यापृत आकुले इति नानार्थरत्नमाला । (डमरुम्)

p. 261)

तुट्याख्यक्षुद्रकुन्दुभिम् । (बीजपूरकम्) मातुलुंगफलम् ।
शेषं सुगमम् । आयुधानि पक्षान्तरेण वक्ति (यद्वा) इति । (खड्गम्)
इति । खण्डति भिनत्तीति खड्गः निस्त्रिंशः । भूयः
प्रकारान्तरमाह (अथवा) इति । (नृकपालकम्) इति । कं पालयतीति
कपालं मूर्द्धास्ति । तच्चात्र चतुर्मुखस्य पञ्चमशिरः करोटिः ।
तच्च कपालमीश्वरेण लीलयोपात्तं न तु ब्रह्महननान्निमित्तात् ।
तस्य ब्रह्मणो जीवतोऽद्यापि अपरिमितपुष्टत्वेन वर्तमानत्वात् ।
ईश्वरस्यापि सर्वसंहर्त्तृत्वस्य समुचितत्वेन प्रत्यवायाभावाच्च ।
अयमर्थो मन्त्रशास्त्रे बिभ्रद्दण्डं त्रिशूलं वरदमसु शिरः
खड्गमीशानप्रात्रम् इति श्लोके दर्शितः । (आयुधैः) आयुध्य
वध्यन्ते छिद्यन्ते एभिः पाशजालानीत्यायुधानि तैः ।

p. 262)

एवमुक्तं श्रीमज्ज्ञानरत्नावल्याम्। अत्र युक्तानीति शेषः॥

ननु शूलादीन्यायुधानि हिंसकानि किम्? न किन्तु

ज्ञानशक्त्यादि रूपाणि। तथा श्रीमच्चतुर्विंशतिसहस्रे

बोधरूपा पराशक्तिस्सादाख्यमभयं स्मृतम्।

इच्छाज्ञानक्रियारूपं त्रिशूलं संव्यवस्थितम्॥

ता एव परिणामेन खट्वाङ्गमपि सांगिनम्।

बीजानां विवृतिस्तेषां पूरणाद्बीजपूरकम्॥

मायाडमरुरूपेण सैव दीर्घा द्विजिह्विका।

इन्दीवरं मनः प्रोक्तमिन्द्रियाण्यक्षमालिका॥

इति। लिङ्गभावं विहाय उक्तवत्

पञ्चवक्त्रत्रिपञ्चदृग्दशभुजाद्याकारं परमेश्वरं

भावयेदित्याह (लिङ्गाकारोपमर्देन) इति। (शिवतत्वान्तव्याप्तिकम्)

शिवतत्वं मूर्त्युपाधित्वेन चिन्तितं परबिन्दुतत्वं तस्य अन्तः

ज्ञानक्रिया

p. 263)

शक्तिरूपा मूर्तिः तद्व्याप्तिर्यस्य स तथोक्तः तम्। (सौदामिनी

निभम्) विद्युत्प्रतिमम्। तटित् सौदामिनी विद्युत् इत्यमरः। (लिङ्गारोहे)

लिङ्गदैर्घ्ये। दैर्घ्यमायाम आरोहः इत्यमरः। (विद्यादेहम्) इति।
अत्र विद्यादेहो नाम पञ्चकृत्याधिष्ठात्री शक्तिः। तथा
श्रीमन्मृगेन्द्रे तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः
इति। विद्यादेहस्य चललिङ्गे पूर्वाभिमुखत्वं विद्यात्। तथा
श्रीमल्लक्ष्मीकेशवसंवादे

नित्ये नैमित्तिके माम्ये सर्वाधिकरणस्सदा।
शिवः पूर्वाननो लक्ष्मीः प्रत्यक्पृष्ठः कलातनुः॥

इति॥

अथ नेत्रं दत्वा तदावाह्यो देवदेवस्सदा शिवः इति
श्रीमत्समानतन्त्रे वचनादावाहनात् पूर्वं नेत्रन्यासं वक्ति
(ओं) इत्यादिना (विन्यस्य)

p. 264)

इत्यन्तेन। (सर्वज्ञताबीजम्) दृक्क्रियेच्छात्मिका या शक्तिः
सर्वज्ञताया बीजं कारणं तन्नेत्रमित्युच्यते। तथा
श्रीमत्पौष्करे सर्वज्ञताया बीजं यत् ततस्तेन निरीक्षणम् इति।
अनेनैवेह नेत्रमन्त्रमगत्वेनेति कथितम्। तथा किल
श्रीमत्सार्द्धत्रिशत्यां नेत्रमन्त्रः

पुनरंगमन्त्रानन्तभविन पृथक्तया कथितः

ब्रह्माणि च शिवं साङ्गं नेत्रं पाशुपतञ्च यत् ।
समासात्कथितस्सर्वो मन्त्रोद्धारस्स्वयं शुभः ॥

इति ।

शिवावाहनक्रमः ॥

(क्रि) (३९) पुष्पैरञ्जलिमापूर्य, मूलमन्त्रं मेधादिकलोपेतं
प्रचण्डमार्ताण्डोपमं ब्रह्मादिकारणत्यागक्रमेण
लयान्तमुच्चरन् सर्वकर्तारन्निष्कलं विभुं ज्ञानानन्दमयं
स्वरूपप्रकाशं सञ्चिन्त्य, तन्मयीभूतः सृष्टिक्रमेण
द्वादशान्तात्पतङ्गपिङ्गाभं

p. 265)

ललाटेऽवतार्य, चन्द्रकोटिसदृशं
निर्यत्सुधापिण्डपाण्डुरितदिङ्मण्डलं ध्यात्वा,
प्राणप्रवाहवर्त्मना विनिर्गत्य, अञ्जलिगतं विचिन्त्य,
लक्ष्यमूर्तावावाहिन्या हृदयेनावाह्य (३९)
(प्र) अथ विद्यादेहन्यासविधिमुपन्यस्य

शिवावाहनक्रममाह (पुष्पैः) इत्यादिना (आवाह्य) इत्यन्तेन ।
(अञ्जलिम्) पाणिपुटम् । (मेधादिकलोपेतम्) मेधा औकारकला ।
तथा श्रीमन्मन्त्रनिघण्टौ

औकारो दर्शनान्तश्च चोल्का मुख्या परस्तथा ।
अन्वाहार्यश्चरो मेधा हृषीकेशो जनार्दनः ॥

इति । सा आदिर्यासान्ताः मेधादयः ताश्च ताः कलाश्च मात्राः
ताभिः उपेतः तम् । आदिपदेन ऊकारादिकलाः प्रकाश्यन्ते ।
तदुक्तं अकारश्च उकारश्च मकारोबिन्दुरेव च इत्यादि ।

p. 266)

(प्रचण्डमार्ताण्डोपमम्) प्रचण्डः दुर्द्धर्षः ।
स्यात् कोदण्डं प्रचण्डस्तु ना श्वेतकर वीरके ।
त्रिषु प्रगल्भदुर्द्धर्षे

इति नानार्थरत्नमाला । स चासौ मार्ताण्डः सूर्यः तेन उपमा
यस्य स तथोक्तः तम् । (ब्रह्मादिकारणत्यागक्रमेण)
ब्रह्मादिवाचकाकारादिकलास्थानहृदयादित्यागपरिपाट्येत्यर्थः
। (लयान्तम्) लयः मूलमन्त्रलयः तस्यान्तः
द्वादशान्तपर्यन्तमित्यर्थः । (विभुम्) व्यापकम्

(ज्ञानानन्दमयम्) इति। अत्र आनन्दशब्द परिपूर्तिवाचकः।
ज्ञानशब्दस्तु तस्य जडरूपतानिरासपरः। (स्वप्रकाशम्)
स्वसंविद्रूपम्)। अत्र स्वपरप्रकाशमिति पाठो न साधुः
परप्रकाशस्य मूर्तित्वेनोक्तत्वात्। तथा
श्रीमत्क्रियाकाण्डक्रमावल्यां

p. 267)

निष्कलं स्वप्रकाशं च संचिन्त्य परमं शिवम् इति।
(तन्मयीभूतः) सोऽहंभाव नया अद्वैतस्वरूपीभूत इत्यर्थः।
(पतङ्गपिङ्गाभम्) पतङ्गः सूर्यः पतङ्गः पक्षिसूर्ययोः
इत्यमरः। स इव पिङ्गा आभा यस्य स तथोक्तः तम् (ललाटे)
बिन्दुस्थाने। (निर्यत्सुधापिण्डपाण्डुरितदिङ्मण्डलम्)
निर्गच्छदमृतपिण्डधवलि तदिङ्मण्डलम्।
(प्राणप्रवाहवर्त्मना) दक्षिणनासापुटेनेत्यर्थः।
(लक्ष्यमूर्तौ) पूजालक्ष्यार्थं समुदितरूपविद्यादेहे इत्यर्थः।
तदुक्तं साधकस्य तु लक्ष्यार्थं तस्य रूपमिदं स्मृतम् इति।
(आवाहिन्या) इति। एतल्लक्षणमुक्तं श्रीमद्भोज देवेन
हस्ताभ्यामञ्जलिं कृत्वा अनामिकापर्वाङ्गुष्ठसंयोजनेन
आवाहिनी इति॥
अत्र ऋजुकायः पुष्पैरञ्जलिमापूर्य, हृत्प्रदेशे निधाय,

p. 268)

पूरकं विभाव्य, कुंभकभावनया (२०३)

मूलाधारान्नाभ्यन्तव्याप्तप्राणजीवबीजहकारं

नाभ्यादिहृदयान्तव्याप्तौकारेण संयोज्य, हौकारं

हृदयादिकण्ठान्तव्याप्त ऊकारेण संयोज्य, हौकार ऊकारौ

कण्ठादितालुरन्ध्रव्याप्तमकारेण संयोज्य, हौंकारस्योपरि

भ्रूमध्यगतबिन्दुं ललाटगतार्द्धचन्द्रकलया,

अर्द्धचन्द्रकलां तावदुपरिगतनिरोधिकलया, निरोधिकलां

तावदूर्ध्वगतनादेन, नादञ्च तदुपरि

ब्रह्मरन्ध्रान्तव्याप्तनादान्तेन संयोज्य, ब्रह्मरन्ध्रादुपरि

शक्तिमेकांगुलव्याप्तां तदुपरि व्यापिनीं त्र्यङ्गुलव्याप्ताम्,

तदुपरि समनाञ्चतुरङ्गुल व्याप्तां, तदुपर्युन्मनामपि

चतुरङ्गुलव्याप्तां संचिन्त्य, प्रासादान्ते द्वादशान्तो परि

पञ्चाक्षरेण वाच्यवाचकादभिन्नं परमशिवं

p. 269)

संचिन्त्य, पुष्पाञ्जलिं द्वादशान्तपर्यन्तं नीत्वा,

सृष्टिमार्गेण भ्रूमध्यान्तमवरोप्य, चन्द्रकोटिसदृशं शिवं

रेचकभावनया हृदयस्थितपुष्पाञ्जलिगतं विभाव्य,

हृदयमन्त्रेण पुष्पाञ्जलिं लिङ्गमूर्ध्नि विन्यस्य, सदाशिवस्य

ब्रह्मरन्ध्रमार्गेण हृदंबुजप्रविष्टत्वं भावयेदिति

आवाहनक्रमोऽनुसन्धेयः।

ननु अत्र आवाह्यते अनेनेति आवाहनम्।

यद्यावाह्यते भगवान् तदां विसर्जनञ्च भवति। तर्हि

सर्वगतत्वं विहन्यते। नैवं व्यापकस्यैव शिवस्य

भक्तिमात्रेणाभिव्यक्तीकरणमिहावाहनमुच्यते। तदुक्तं

सर्वत्र व्यापिनं शान्तं देवदेवं सदाशिवम्।

अभिमुखीकरणं यच्च तदावाहनमुच्यते॥

पूजापरिसमाप्तौ तु विमुखं तद्विसर्जनम्।

इति। ननु सर्वगतस्य सर्वत्र सन्निहितत्वादिकमपि विरुद्धम्।

p. 270)

नैवं अत्र तथाविधसन्निधानेन प्रयोजनाभावात् इह

पूज्यपूजकभावानुविद्धसाधकश्रद्धानुरूपमनुग्राह्या

नुग्राहकसंअबन्धलक्षणसन्निधानमेवावाहनं तच्च

वाच्यवाचकयोरभेदाद्वाचकस्य मन्त्रस्य

विशेषविन्यासाद्वाच्यस्यापि शिवस्य विशिष्टा सन्निधिर्भवतीति न

विरुद्ध्यते। तथा

आमूलाग्र स्थितस्याग्नेरभिव्यक्तिर्यथा तरौ।

तद्वदेकत्र चि?द्वयक्तिर्व्यापकस्य न बाध्यते ॥

इति । तथा च श्रीमन्निश्वासे

न चैवावाह्यते कैश्चित् कैश्चिन्न च निवेश्यते ।
निरुद्ध्यते न देवेशि सन्निधीक्रियते न च ॥
व्यापकं मन्त्ररूपेण चिन्तयेत् परमं शिवम् ।
तदावाहनमित्युक्तं क्षमस्वेति विसर्जनम् ॥

इति ।

p. 271)
स्थापनादिविधिः ॥

(क्रि) (४०) स्थापन्या संस्थाप्य, सन्निधान्या सन्निधाप्य,
निष्ठुरया निरोध्य, स्वागतन्ते महादेवेति विज्ञाप्य, वत्स
स्वागतमिति देवेनोक्तं विभाव्य,

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम् ।
तावत् संप्रीतिभावेन लिङ्गेऽस्मिन् सन्निद्धीभव ॥

इति विज्ञाप्य, स्वागताघ्र्यं दत्वा,

कालकर्णिकलिंगनमस्कारमुद्रां दत्वा ॥

(प्र) अथ स्थापनादिविधि (स्थापन्या) इत्यादिना (दत्वा)

इत्यन्तेनाह । स्थापन्यादिलक्षणमुक्तं श्रीमद्भोजदेवेन

इयमेवाधोमुखी स्थापनी इयमेवेति आवाहिन्येवेत्यर्थः ।

संलग्नमुष्ट्युच्छितांगुष्ठौ करौ सन्निधानी । तावेव

गर्भाङ्गुठौ सन्निरोधः इति । भगवानपारकरुणानी

p. 272)

भोधिस्त्रानुग्रहार्थमास्ते इति भावः स्थापनं मनसो निश्चलता ।

अथ सन्निधिरनुग्राह्यानुग्राहकलक्षणसंबन्धः

प्रसादाभिमुखीभावः । अथ भगवान्मयि सततमनुग्रहपरो

भवेदिति प्रार्थना निरोधः इति श्रीमञ्ज्ञानरत्नावल्यां उक्तम् ।

(स्वागतम्) सुष्ठु शोभनं आगतं आगमनम् । (वत्स) हे सुत इति

संबुद्धिः । वत्सरे कुटजे वत्सस्सुतादौ कर्णिकेष्वपि इति

नानार्थरत्नमाला । स्वागताघ्र्यदानमन्त्रं वक्ति (स्वामिन्) इति ।

श्लोकार्थः स्पष्टः ॥

अङ्गन्यासविधिः ॥

(क्रि) (४२) हृदयादिकरान्तस्थानेषु हृदयाद्यङ्गानि विन्यस्य,

मूलेनैकत्वं विधाय, अस्त्रेण संरक्ष्य, कवचेनावकुण्ठ्य,

अमृतमुद्रां दत्वा,

p. 273)

वौषडन्तमूलेन महामुद्रया परमीकृत्य

पञ्चमुखीमुद्रामाबद्ध्य ॥ (४२)

(प्र)अथ आवाहनादिक्रममुदीर्य हृदयाद्यङ्गन्यासविधिमाह

(हृदयादि) इत्यादिना (आबद्ध्य) इत्यन्तेन । (हृदयादिकरान्तस्थानेषु)

हृदयशिरश्शिखास्तनान्तरहस्ततलेषु पञ्चसु स्थानेष्वित्यर्थः ।

(एकत्वम्) अङ्गाङ्गिनोरपृथग्भावम् । तथोक्तं

श्रीमत्सोमशंभुचरणैः

सकलीकरणं कृत्वा मन्त्रैष्षड्भिरथैकताम् ।

अङ्गानामङ्गिना सार्द्धं विदध्यादेकतामिति ।

तथा च श्रीमत्कामिकतन्त्रसारे अङ्गाङ्गिनोरभिन्नत्व

प्रतिपत्तिर्विभिन्नयोः इति । (परमीकृत्य) प्ररोच्येत्यर्थः । तथा

प्रकृतेः परमीभाव संपत्त्यर्थमनन्तरम् ।

परमान्तिकमुच्चार्य प्रासादं पूर्ववन्न्यसेत् ॥

p. 274)

प्ररोच्च च यथा न्यायं मुद्रया प्रागुपात्तया ।

इति । पञ्चमुखीमुद्रालक्षणमुक्तं श्रीमत्किरणे

कृत्वाऽन्योन्यगतांगुल्योः पृष्ठतो हस्तयोर्द्वयोः ।
तिर्यक्स्थकन्यसौ कृत्वा ह्यङ्गुष्ठाभ्यां समाक्रमेत् ।
देशिको मध्यमे रुद्धेऽनामिकेचोच्छ्रितांगुली ।
कृत्वा पञ्चमुखीं मुद्रां मुद्रेयं शंकरस्य तु ॥ इति ।

पाद्यादिविधिः ॥

(क्रि) (४२) सहृदा नमोन्तेन पादयोः पाद्यं स्वधान्तेन
ईशानादिमुखपंचकेष्वाचमनं, स्वाहान्तेन तथैव शिरः
पञ्चकेष्वर्घ्यं दत्वा, वौषडन्तमूलेन दूर्वापुष्पाक्षतादि
च दद्यात् । सहृदा स्वाहान्तमूलेन धूपं
पूर्ववदाचमनार्घ्यौ च दत्वा ॥ (४२)

p. 275)

(प्र) अथ पाद्यादिविधिः (सहृदा) इत्यादि (दत्वा) इत्यन्तम् । (सहृदा) इति
। हृद्बीजपूर्वमूलमन्त्रेणेत्यर्थः । तथा समीरितं
श्रीमत्सोमशंभुचरणैः हृत्पुरस्सरमुच्चार्य पाद्यादीनि

निवेदयेत् इति । (पाद्यम्) इति । अभ्यागतानामेव पादप्रक्षालनाय

प्रतिपादं दीयमानं जलम् । तथा पाद्यं पादतले न्यस्य

प्रतिपादं सकृत् सकृत् इति ॥

अत्र पाद्याचमनार्घ्यपुष्पदानानां प्रयोजनं

नमस्स्वधास्वाहावौषडाख्यानां चतुर्णां जातीनामर्थश्च

प्रदर्श्यते । ननु भगवतः पाद्यादिभिः किं प्रयोजनं

स्वभावशुद्धत्वात्

हेयोपादेयविवेचनेन पदे शैवे धाम्नि स्वस्यार्हत्वा

पादनं पाद्यम् । अत एव हि तत्र नमश्शब्दः प्रयुज्यते ।

p. 276)

नम इति शिवे चित्तं निवेशयति । तेन शिवश्च प्रसादाभिमुखं करोति

॥

चमधातो रदनार्थत्वात् अदनं

आसमन्ताच्छिवरसास्वादनमाचमनं शिवसमरसीभावः ।

अत एवात्र स्वधाशब्दः प्रयुज्यते । स्वधा स्वस्मिन् परमाह्लादनं

धत्ते इति स्वधा धातृप्तिप्रीतिदानाभिवादनेषु इत्यर्थत्वात् ॥

अतः परमुत्तमांगं परां संस्थामर्हतीत्यर्घ्यं

अस्योपादानमात्मनः शिवत्वव्यक्तिसंपादनम् । अत एवात्र

स्वाहाजातिः प्रयुच्यते । स्वस्मिन्नाह्वियन्ते अभिव्यज्यन्ते

सर्वज्ञत्वादिगुणा इति ॥

एवं शिवत्वव्यक्तौ सत्यां यत्

पूर्वहेयोपादेयविवेचनज्ञानं तत् पुष्पमिव पुष्पं

p. 277)

शिवत्वफल निबन्धनस्तस्य समर्पणं नाशफलरूपेण

परिपाकः। अत एवात्र वौषट् जातिः प्रयुज्यते। विपूर्वस्य षच

समवाये इति धातोः वौषडिति निपातनात् सिद्धं यतस्तत एव

शिवसमवायित्वं प्रसूनार्पणमिति ॥

अत्र शिवस्य आवाहनादयः पुष्पदानान्ताः संस्कारा दश

इति बोद्धव्यम्। तथा श्रीमत्सिद्धान्तसारावल्यां

आवाहनस्थापन सन्निधाननिरोधनाकुण्ठन सौधमुद्राः।

पाद्यन्तथा चाचमनार्घ्यपुष्पदानं मतास्संस्कृतयोदशैव ॥

इति ॥

भावनाभिषेकविधिः ॥

(क्रि) (८३) अभ्यंगोद्वर्तननिर्मर्चनादीनि स्नपनांगानि विभाव्य, अर्घ्योदकबिन्दुना संस्नाप्य, पाद्याचमनार्घ्यौ च दत्वा, सूक्ष्मवाससा संमृज्य ॥ (८३)

p. 278)

(प्र) अथ भावनाभिषेकविधिः (अभ्यंग) इत्यादि (संमृज्य) इत्यन्तम्। (अभ्यंगोद्वर्तननिर्मर्चनादीनि) अभ्यंगश्च तैलाभ्यञ्जनं उद्वर्तनञ्च यवचूर्णादिभिरुत्सादनम्। उद्वर्तनोत्सादने द्वे इत्यमरः। निर्मर्चनञ्च हरिद्रोदकादिना अभिषेचनं अभ्यंगोद्वर्तननिर्मर्चनानि तानि आदीनि येषां तानि तथोक्तानि।

मानसस्नपनानन्तरकरणीयविधिः ॥

(क्रि) (४४)

चन्दनाक्षतदूर्वाश्रीपुष्पहेमकौपीनमेखलोपवीतकुण्डलाद्या भरणानि विचित्रवस्त्राणि मनसा भक्त्या निवेद्य, पुष्पाञ्जलित्रयेण ओम् हां हौं आत्मतत्वाधिपतये शिवाय नमः ओं हां हौं विद्यातत्वाधिपतये शिवाय नमः

p. 279)

इत्यभ्यर्च्य, इण्डादिभिः पुष्पदामभिरलंकृत्य अस्त्रेण घण्टा

वादयन् धूपदीपावाचमनार्घ्यौ च दत्वा, मनोरथ मुद्रां

दर्शयेत् ॥

(प्र) अथ मानसस्नपनानन्तरकरणीयमाह (चन्दन)

इत्यादिना (दर्शयेत्) इत्यन्तेन । (मेखला) इति । मीयते कट्याक्षिप्यत इति

मेखला काञ्ची । (इण्डादिभिः) दामवृत्तादिभिः ।

(घण्टांवादयन्) इति । अत्र हन्यते ताज्यत इति घण्टा ।

घण्टाघोषणलक्षणमुक्तं श्रीमत्कालोत्तरे

एकनादस्तु मोक्षाय विरक्तानां प्रशस्यते ।

घण्टाताडनमेवं स्याद्द्विनादो भोगमोक्षदः ॥

जानुनाभेरधो नादः कर्तव्यो न कदाचन ।

नाभेरूर्ध्वन्तु कर्तव्यं घण्टाताडनमुत्तमम् ॥ इति ।

मनोरथ मुद्रालक्षणमुक्तं मुद्रालक्षणे

p. 280)

अथ मनोरथमुद्रा परस्परवेष्टिते कनिष्ठिकाद्वये मध्यमाद्वये

अनामिकाद्वये च कृत्वा तर्जनीद्वये पुरतः प्रसारिते

अन्योन्यसंसक्ताग्रे सति स्वमूलगतांगुष्ठे सति स्वार्थ पोषणी

सदाशिवस्य प्रदर्श्या भवति इति ॥

लयांगपूजाक्रमः ॥

(क्रि) (८५) ततो ब्रह्माङ्गानि लयाङ्गस्थानेषु संपूज्य, काम्यानि विज्ञाप्य ॥ (४५)

(प्र) अथ भोगांगार्चनार्थं लयाङ्गपूजाक्रमं
प्रथममाह (ततः) इत्यादिना (विज्ञाप्य) इत्यन्तेन ।
(लयांगस्थानेषु) शिरोवक्त्रादिलयांगेष्वित्यर्थः ।
यदुक्तं श्रीमन्मृगेन्द्रपद्धत्यां ब्रह्मांगानि लयांगेषु
संपूज्य, प्रार्थ्य शङ्करम् । भोगस्थाने यजेत् इति ॥

p. 281)

एकावरणार्चनविधिः ॥

(क्रि) (८६) आवरणपूजार्थमध्येष्य, लब्धानुज्ञश्शिवं
मूलेनाभ्यर्च्य, तस्य शिरःपञ्चकेभ्यः ईशानमादाय, ओं हों
ईशानमूर्द्धाय नमः इतीशानदले
स्फटिकाभञ्जगद्धेतुन्त्रिणेत्रं चन्द्रमौलिनम् ।
सौम्यं प्रसन्नमीशानन्त्रिशूलाभयपाणिकम् । इति ध्यात्वा
आवाहयेत् । वक्त्रपञ्चकेभ्यो वक्त्रमादाय, ओं हें

तत्पुरुषवक्त्राय नमः इति पूर्वदले

पीतांबरोपवीतञ्च नरं कनकसन्निभम्।
मातुलंगाक्षसूत्रे च दधानञ्चन्द्रमौलिनम्॥

इति ध्यात्वा यजेत्। हृत्प्रदेशादघोरमादाय,
२०७ ओम् हुं अघोरहृदयाय नमः इति दक्षिणदले

p. 282)

त्र्यक्षं मौलीन्दु हृत्सौम्यं कुण्डलालंकृतं ततः।
बभ्रुभ्रूश्मश्रुकेशञ्च दंष्ट्रालुं विकृताननम्॥
कपालमालाभरणं सर्ववृश्चिकभूषणम्।
खट्वांगञ्च कपालञ्च खेटकं पाशमेव च।
वामहस्तचतुष्के तु दक्षहस्तचतुष्टये।
त्रिशूलं परशुं खड्गं दण्डञ्चैवारिमर्दनम्॥
एवन्नवांबुदाभासमघोरं सर्वकामदम्।
इति ध्यात्वा आवाहयेत्॥
वामदेवं गुह्यमण्डलादादाय ओं हिं वामदेवगुह्याय
नमः इत्युत्तरदले

वामं रक्तं सुरक्ताभमाल्यवस्त्रोपवीतिनम्।

तुंगनासारुणोष्णीषं खड्गखेटकपाणिकम् ॥

इति विभाव्य यजेत् ।

पादाद्यंगात् सद्योजातमादाय,

ओं हं सद्योमूर्तये नमः इति पश्चिमदले

p. 283)

सितस्रग्गन्धभूषाढ्यं सितोष्णीषं सितांबरम् सौम्यं

मौलीन्दुसंपन्नं बालाकारन्त्रिलोचनम् सद्योजातं स्मितास्यैकं

वरदाभयपाणिकम् ।

इति विभाव्य यजेत् । यद्वा ईशतत्पुरुषाघोर वामजान् सौम्यलोचनान् ।

सुश्वेतपीत भृंगासृध्हिमांश्चतुराननान् ॥

जटामकुटशोभाढ्यान् सर्पबालेन्दुभूषितान्

वामैर्नागाक्षसूत्रे च नीलाब्जं बीजपूरकम् शूलाभयवरान्

शक्ति सव्यैर्धारयतः करैः ।

इति विचिन्त्यावाहयेत् ॥

नेत्रेभ्यो नेत्रमादाय ओं हौं नेत्रेभ्यो नमः

इतीशानस्योत्तरभागे

अरुणाभं स्मरेन्नेत्रं दृक्क्रियेच्छात्मकं विभोः ।

त्रितत्वरूपवह्न्यादि मण्डलत्रितयाश्रयम् ॥

p. 284)

हृदाद्यङ्गोक्तवदनकरधार्यादिसंयुतम् ।

एकास्य वा त्रिशूला हि हरतं योगशिवोक्तितः ॥

इति विभाव्यावाहयेत् ॥

२०९ सद्भावात्मकहृदयं हृदयादादाय ओम् हां हृदयाय नमः इत्याग्नेयदले सर्वेशित्वलक्षणं शिरश्शिरोदेशादादाय ओं हां शिरसे नमः इतीशानदले । नेत्रस्योत्तरे अनन्याधीनवशित्वरूपशिखां शिखाया आहृत्य ओ । हूं शिखायै नमः इति, नैर्-ऋतदले परैरमेद्यं तेजोरूपं कवचं सर्वांगादादाय ओं हैं कवचाय नमः इति वायव्यदले प्रतापरूपमस्त्रं हस्तेभ्य आहृत्य, पूर्वादिचतुर्दलेषु तत्पुरुषादिभ्यो वामभागे ओं हः अस्त्राय नमः इति

हृदयं चन्द्रसंकाशं शिरश्चामीकरप्रभम् ।

p. 285)

शिखां सिन्दूरवर्णाढ्यां कवचं भृङ्गभास्वरम् ।

पद्मासनस्थानर्द्धेन्दु जटामकुटधारिणः ॥

त्रिलोचनांश्चतुर्बाहून् सर्वाभरणभूषितान् ॥

शिवस्याभिमुखान् शक्तिशूलाभयवरान्वितान् ॥

चतुर्वक्त्रानथास्त्रञ्च दंष्ट्रिणं पिङ्गलद्युतिम् ॥

द्विभुजानेकवक्त्रान्वा वरदानभयप्रदान् ।

शूलाभयधरान्वापि विद्ध्यायेत् साधकोत्तमः ॥

एतान् शिववदावाहनस्थापनसन्निधानसन्निरोधनपाद्या-

चमनार्घ्यपुष्पदानान्तैरष्टभिः संस्कारैस्संस्कृत्य पूजयेत् ।

यद्वा संस्काराष्टकं समुदितमेव सर्वं संस्मृत्य,

अर्घ्यं दद्यात् । ईशानादीनां ब्रह्मणां

धेनुपद्मत्रिशूलमकरस्त्रुमाख्या मुद्राः अंगानाञ्च

नमस्कारमुद्रां दर्शयेत् ॥ (४६)

(प्र) अथ अनावृतो न शोभार्हः इति श्रीमत्पराख्य श्रुतेः

p. 286)

आवरणपूजाभावे शोभाभावात् किमत्रावरणपूजास्ति न वेति

जिज्ञासायां

एकावरणमेतत्तु सर्वकामार्थसाधकम् ।

सर्वतन्त्रेषु सामान्यं सर्वज्ञानेषु चोत्तमम् ॥

इति श्रीत्सार्द्धत्रिशतिकाश्रुतेः

मण्डलप्रकरणवक्ष्यमाणपञ्चावरणपूजाप्रकारो मास्तु

एकावरणार्चनमेव श्रेयस्करमिति मत्वा तदर्त्तनाविधिमाह

(आवरणपूजार्थम्) इत्यादिना (दर्शयेत्) इत्यन्तेन। (शिरः

पञ्चकेभ्य ईशानमादाय) इति। अत्र दीपाद्दीपन?दादानमिति

ज्ञेयम्। तथा श्रीमद्विजये

पञ्चब्रह्मतदंगानि देवस्य परितस्ततः।

वक्त्रेभ्यस्तत्तदंगेभ्यो दीपाद्दीपवदाहरेत्॥

इति। (ईशानमूर्द्धाय) ईशानः उन्नतियुक्तः अनादिस्वभावः स एव

मूर्द्धेन यस्य सोऽयमीशानमुर्द्धा तस्मै।

p. 287)

केचिदीशानं मध्य इत्याहुः। यदुक्तं श्रीमत्किरणे ईशं

स्फटिकवन्मध्ये इति। तदयुक्तं अत्रैव स्थाने विनियोगस्य सिद्धत्वात्।

इह हि पूर्वतः पुरुषादीनि वक्त्रत्रयेत्युक्तम्। तदीशानस्य

मूर्द्धत्वो पलक्षणार्थम्। ततश्च मूर्द्धत्वादेव तस्य शिरः

पूजास्थान एवैशान्यां विनियोगो युक्तः इत्युक्तं

श्रीमत्सार्द्धत्रिशतिवृतिकारेण। ईशानध्यानमाह (स्फटिकाभम्)

इति। स्फुटः श्लोकार्थः। (तत्पुरुषवक्त्राय) तत्पुरुषः

वक्त्रमिवयस्य सोयं तत्पुरुषवक्त्रः तस्मै। तस्य तस्य अमरादेः

या पूः पुरी तनूः तस्यां पुरि यजमानस्वरूपतया

अधिष्ठातृभावेन उषितः तत्पुरुषः। यस्माद्यनक्ति ज्ञानक्रिये
त्रायते जन्मादिस्वभावात् ततस्तत्पुरुषवक्त्रः।

p. 288)

तत्पुरुषध्यानमाह (पीत) इति। (अघोरहृदयाय) हृदयपदेन
तावल्लोकप्रसिद्ध्या सद्भावः परमार्थतः कथ्यते।
अघोरशब्देनापि घोरस्यमलादेः संसारात्मनो रागद्वेषादेः
व्युदासेन शान्तरूपता। ततश्च अघोरं शान्तं हृदयं
स्वभावः यस्यासावघोरहृदयः तस्मै। अघोरध्यानमाह
(त्र्यक्षम्) इति। अश्नुवत इत्यक्षिणी चक्षूंसि त्रीणि अक्षीणि
तमोपहरूपाणि यस्य स त्र्यक्षः। अथवा अश्नुते अश्नाति वा
एतैरर्थानिति अक्षाः व्यवहाराः अक्षो रथांगे सोधारे व्यवहारे
विभीतके इति वैजयन्ती। भुवनत्रये व्यवस्थिताः त्रेः? व्यवहाराः
निर्वाह्यत्वेन यस्य स त्र्यक्षः त

p. 289)

(बभ्रुभ्रूश्मश्रुकेशम्) वभ्रूणि पिङ्गलानि भ्रुवौ च
श्मश्रूणि च मुखरोगाणि केशाश्च शिरोरुहाणि यस्य स तथोक्तः
तम्। विपुले नकुले विष्णौ बभ्रुस्स्यात् पिङ्गले त्रिषु इत्यमरः।
(दंष्ट्रालुम्) दंष्ट्रा अस्यास्तीति दंष्ट्रालुः तम्। स्फुटमन्यत्।
(वामदेवगुह्याय) वामं विलक्षणं गुह्यं अदृष्टं तेजो यस्य

स वामदेवगुह्यः तस्मै । वामदेवध्यानमाह (वामम्) इति ।

(कं?गनासारुणोष्णीषम्) इति । अत्र उष्णीषशब्दस्य शिरोवेष्टनं

किरीटं वेत्यर्थः । पक्षरसहायेप्युष्णीषश्शिरोवेष्टकिरीटयोः

इत्यमरः । अन्यत् सुबोधम् । (सद्योजातमूर्तये) सद्यः

सर्गादिनिर्माणेच्छामात्रेणैव मूर्तित्वं

अधिकारशरीरावयवित्वं जातं संपन्नं यस्य स

सद्योजातमूर्तिः तस्मै ।

p. 290)

सद्योजातध्यानमाह (सितस्त्रक्) इति । स्पष्टः श्लोकार्थः ।

पक्षान्तरेण ब्रह्मणां ध्यानमाह (यद्वा) इति ।

ईशतत्पुरुषेत्यादिध्यानश्लोकार्थः स्पष्टः । (वेत्रेभ्यः)

ईशानादिपञ्चमुखनेत्रेभ्यः । नेत्रध्यानमाह (अरुणाभम्) इति ।

(त्रितत्वरूपवह्न्यादिमण्डलत्रितयाश्रयम्) त्रितत्वरूपाणि

शिवविद्यात्मतत्वत्रयात्मकानि तानि च तानि वह्न्यादिमण्डलानि च

अग्निसोमसूर्यमण्डलानि तेषां त्रितयं तस्य आश्रयः ।

शेषं सुगमम् ॥

तत्वकथनपूर्वं हृदयाद्यङ्गपूजामाह (सद्भाव) इति ।

सद्भावात्मकं अस्तित्वादिकम् । तथा श्रीमत्कामिकतन्त्रसारे

अस्तित्वं हृदयं तस्य इति । संश्चासौ भावश्च सद्भावः

तदात्मकं परमार्थलक्षणमित्यर्थः । (सर्वेशित्वलक्षणम्)

p. 291)

सृष्ट्यादिपञ्चकृत्यैः अष्टविधैश्वर्यरूपमित्यर्थः ।

तथा श्रीमच्छिवतन्त्ररहस्यसारे शिरश्चैश्वर्यमष्टधा इति ।

अत्र ऐश्वर्यस्य

अष्टविधत्वमणिमादिसिद्धिप्रवर्तकत्वादौपचारिकम् ।

न तु तद्रूपतया तस्य शरीरेन्द्रियधर्मत्वेन तद्रहितस्य शिवस्य

तदसंभवात् । तदुक्तं श्रीमन्मतङ्गे

त्रितयं कार्यतत्सिद्धमैश्वर्यमणिमादिकम् ।

प्राप्त्यादयो गुणाः पञ्च ते चोक्ताः (योगिनो) करणात्मकाः ॥

इति । अत एव दृक्क्रियात्मकमैश्वर्यमित्युक्तं श्रीमत्पराख्ये

दृक्क्रियात्मकमैश्वर्यं यस्य तद्वा?तृपूर्वकम् ।

ईश्वरस्सोत्र मन्तव्यः इति । (अनन्याधीनवशित्वरूपशिखाम्)

अन्याधीनं पराधीनं न भवतीत्य नन्याधीनम् ।

तच्च तत् वशित्वञ्च स्वातन्त्र्यं तद्रूपा चासौ शिखा च ताम् ।

p. 292)

अत्र वशित्वापरपर्यायं स्वातन्त्र्यं ईश्वरस्य मुक्तात्मवत्

ईश्वरान्तरव्यापारेण मलापोहनद्वारेण नाभिव्यक्तं किन्तु

अनादिसिद्धस्वातन्त्र्यरूपा या शक्तिः सैव शिखेतितात्पर्यार्थः।

तथा श्रीमत्कामिकतन्त्रसारे शिखा स्वतन्त्रता तस्य इति।

तथा च श्रीशिवतन्त्ररहस्यसारे अनन्याधीनता शंभोर्वश्यता

या शिखापरा इति। (परैः) अन्यैः। (अमेद्यम्) भेदतुमशक्यम्।

(तेजोरूपम्) तेजः स्वदृक्क्रियाशक्तिकिरणः तदात्मकम्। तथा तत्रैव

तेजश्शर्वस्य दुर्भेद्यं वर्गत्वेन विनिर्मितम् इति। (कवचम्) इति। कं

ब्रह्मचित्तं पञ्चयतीति कवचं वर्म। (प्रतापरूपम्)

मलापनयनसामर्थ्यलक्षणम्।

p. 293)

तथा श्रीशिवतन्त्र रहस्यसारे प्रभोः प्रतापः प्रथितश्शस्त्रं

स्यादघनाशकम् इति। इह हि

कर्णिकामध्यस्थितसदाशिवभट्टारकापेक्षयैव ईशानपूर्वादि

दिग्व्यवस्थेति ज्ञेयम्। हृदयाद्यंगानां ध्यानमाह (हृदयम्)

इति। ननु हृदयाद्यङ्गदेवाः स्वस्वदिगभिमुखाः किमित्याशंक्य

नेत्याह (शिवस्याभिमुखान्) इति। अनेन ईशानादयोपि शिवाभिमुखा

इति सूच्यते। तथा श्रीमन्मतङ्गे

स्वामिनस्संमुखा ध्येयाः पूज्याश्चापि यथा क्रमात्॥

इति। श्लोकार्थः स्पष्टः॥

ननु ब्रह्माङ्गानि शिवमिव दशभिस्संस्कारैः संस्कृत्य

समर्चयेत् किमित्याशंक्य

आवाहनादिनैतानि स्वमन्त्रैः क्रमशोऽर्चयेत्।

p. 294)

नावकुण्ठनमेतेषाममृतीकरणं तथा॥

संस्काराष्टकमेवैषां प्रत्येकं विहितं बुधैः।

स्नपनं दीपधूपौ च न पृथक्काङ्गभावतः॥

भोजनन्तु प्रभोः पार्श्वे तेषान्तस्य च कीर्त्तितम्।

इति ब्रह्मशंभुपद्धतिश्रुतेः तेषामष्टसंस्कारा इत्याह (एतान्)

इति। संस्काराष्टककरणाशक्तिविषये कथमित्यत आह (यद्वा) इति।

ततः प्रदर्शयेन्मुद्राः पूरणाय क्रियाविधैः इति

श्रीमन्मृगेन्द्रश्रुतेः शिवार्चनक्रिया परिपूरणाय

ब्रह्मांगानां मुद्राः प्रदर्शयेदित्याह (ईशानादीनाम्) इति।

(धेनुपद्मत्रिशूलमकरस्रुगाख्याः) इति। अत्र

धेनुपद्ममुद्रालक्षणं प्राक् प्रदर्शितम्॥

त्रिशूलादीनां लक्षणमुक्तं मुद्रालक्षणे। यथा अथ

शूलमुद्रा अन्योन्यान्तरितांगुल्योर्हस्तयोः परस्परश्लिष्टोच्छ्रित-

मध्यमाद्वयकनिष्ठाद्वयांगुष्ठद्वयरूपा

p. 295)

तर्जन्यनामाङ्गुलिचतुष्टयानां हस्तऋष्ठविधानात् भवति ।
अघोरनाथस्य प्रियकरी मकरमुद्रापि स्रुङ्मुद्रातत्
निबद्धहस्तद्वयस्य तर्जनीद्वये स्वामिमुख्येन
मकारानुकरणार्थं किञ्चित् किञ्चिते संसक्ताग्रे सति तदग्रं
यावदंगुष्ठद्वये प्रसारिते च सति दंष्ट्राकारे
कनिष्ठिकेऽन्तरिते च सति एषा व्यज्यते ॥ अथ स्रुङ्मुद्रा
परस्परावष्टब्धं कनिष्ठाद्वयं विधाय अनामिकाद्वयं
विपर्ययेण कृत्वा मध्यमाद्वयमप्यन्योन्यसंसक्ताग्रमुपरि
प्रसार्य तर्जनीयुग्मके अंगुष्ठयुग्मके च तत्पृष्ठोपरि श्लिष्टे
सतीत्यसौ ऋज्यते इति ॥
(मुद्राः) इति । करसन्निवेशविशेषा इत्यर्थः । इह देवानां
मोदनादसुराणां द्रावणान्मुद्रा इति ज्ञेयम् ।

p. 296)

तदुक्तं

मुदं करोति देवानां द्रावयत्यसुरांस्तथा ।
मोदनाद्द्रावणाच्चाथ मुद्रेति परिकीर्तिता ॥

इति । नमस्कारमुद्रा लक्षणम् प्राक् दर्शितम् । अत्र शिवस्य
हृदयस्थाने मुद्राः प्रदर्शयेदिति ज्ञेयम् । तथा

स्तनद्वया दधः कृत्वा करमुद्रां न सन्धयेत् ।
मुद्रास्थाने ततश्शंभोर्हृद्देशे तां निदर्शयेत् ॥

इति ॥

पुष्पाञ्जलिविधिः ॥

(क्रि) ४७) तदनन्तरं मूलेन शिवाय पुष्पाञ्जलिं दत्वा,
महामुद्रां दर्शयित्वा, सर्वेषां शिवेन साद्धमैक्यं
भावयेत् ॥ (८७)
(प्र) अथ भोगांगार्थाहृतशक्तिपूरणार्थं
पुष्पांजलिविधिः । (तदनन्तरम्) इत्यादि (भावयेत्) इत्यन्तम् ॥

p. 297)

नैवेद्यादिदानविधिः ॥

(क्रि) (८६) ततो धूपदीपावाचमनाघ्यौं च दत्वा, नैवेद्यं

विविधं पानीयञ्चतुस्संस्कार संशुद्धं स्वाहान्तमूलेन
दत्वा, ब्रह्मांगानां स्वस्वमन्त्रैर्न्दत्वा, अभावे एकस्मिन् पात्रे
निवेद्य, आचमनञ्च निवेद्य,
हस्तोद्वर्तनतांबूलमुखवासमर्घ्यञ्च दत्वा, पुनरभ्यर्च्य,
धूपदीपा चमनार्घ्याद्युपाहृत्य ॥ (८६)

(प्र) अथ नैवेद्यादिदानविधिमाह (ततः) इत्यादिना (उपाहृत्य)
इत्यन्तेन । (विविधम्) पायसमुद्गोदनादिना बहुविधमित्यर्थः ।
विविधस्स्याद्बहुविधो नानारूपः पृथग्विधः इत्यमरः ।
(पानीयम्) इति । एतल्लक्षणमुक्तं सुप्रभेदे
पानीयञ्चाढकार्द्धं वा अर्धार्धकमथापि वा ।
उत्तमादि क्रमेणैव त्रिधाभेदमिहोच्यते ॥ इति ।

p. 298)

तथा श्रीमन्निश्वासोत्तरे

एलाचन्दनचन्द्राढ्यं पानीयमतिशीतलम् ।
पाटल्युत्पलदामाद्यैर्वासितञ्च सुगन्धिभिः ॥

इति । (दत्वा) इति । अत्र शिवस्य नैवेद्यं सपुष्पया
मध्यमानामिकांगुष्ठसमवायात्मिकया मृगी मुद्रया

दद्यात्। तथा श्रीमदंशुमति

मध्यमानामिके चैव अङ्गुष्ठाग्रे नियोजयेत्।
ददाहस्तेर्हविर्दद्यान्मूलमन्त्रं समुच्चरन्॥

इति। ननु ब्रह्मांगानां स्वस्वमन्त्रैर्नैवेद्यनानाशक्तिविषये
कथमित्याशंक्य तदर्थमस्य नैवेद्यं पृथक्पात्रेषु संभवे।
पूतेष्वितरथैकस्मिन् इति श्रीमद्ब्रह्मशंभुपद्धतिश्रुतिं दद्यात्
सपरिवाराय मूलमन्त्रेण शंभवे इति क्रियाकाण्ड
क्रमावलीवचनं च हृदि निधाय ब्रह्मांगानां

p. 299)

शिवस्य च एकपात्रे सपरिवाराय शिवाय निवेदयेदित्याह (अभावे) इति।
(पात्रे) हैमादिस्थालीकायाम्॥
ईशानवक्त्र एव नैवेद्याद्युपचारो देयः न पुनरितरवक्त्रेषु।
तत्पुरुषादीनां स्त्रोतोन्तर प्रवृत्तिहेतुत्वात् ऊर्ध्ववक्त्रस्य
अव्यवधानेनैव सिद्धान्तस्त्रोतसः प्रवृत्तिहेतुत्वाच्च
सिद्धान्तशास्त्रोक्तानुष्ठानविधायिनामीशानवक्त्र एव
नैवेद्याद्युपचारो देयः इत्येवमवधातव्यमत्रा तथा
श्रीमत्सर्वज्ञानोत्तरे

भक्ष्यभोज्यान्नपानादिलेऽयं शोष्यमनेकशः ।
ऊर्ध्ववक्त्रे तु दातव्यं यत्किञ्चिद्विधिचोदितम् ॥

इति । (हस्तोद्वर्तनतांबूलमुखवासम्) हस्तोद्वर्तनं
चन्दनचूर्णादिना उत्सादनम् । तथ श्रीमत्कामिके
हस्तोद्वर्तनसिद्ध्यर्थं चन्दनं हस्तयोर्द्वयोः इति ।
तांबूलञ्च नागवल्लिदलत्रयान्वितमेकं क्रमुकम् ।

p. 300)

तथा श्रीमत्सुप्रभेदे

पूगमेकं प्रतिप्रस्थं द्विगुणं त्रिगुणं तु वा ।
अधमादि क्रमेणैव पत्रं तत्त्रिगुणं भवेत् ॥
शैलचूर्णं सदा देयं तथैव शंखचूर्णकम् ।

इति । मुखवासञ्च मुखं वासयति परिमलं करोतीति मुखवासं
गुलिकीकृतकर्पूरादि द्रव्यमित्यर्थः ॥ तथा श्रीमत्कामिके

एलालवंगकर्पूरजातितक्कोलचूर्णयुक् ।
मध्वीषत्खड्गसंमिश्रं मुखवासमिदं भवेत् ॥

इति । हस्तोद्वर्तनतांबूलमुखवासम् । (धूपदीपाचमनार्घ्याणि)

इति । अत्र धूपं नासापुटे क्रियाशक्तियोगाय दीपं नेत्रत्रये

ज्ञानशक्तियोगाय दद्यादित्यवसेयम् । तथा

श्रीमत्क्रियासारसंग्रहे धूपं नासापुटे चैव दीपं नेत्रेषु

दापयेत् इति । तथा श्रीमत्त्रयोदशशतिके

p. 301)

बिन्दुनादादिभिर्विश्वं यथा व्यापयते क्रिया ।

तथा शक्तिश्च सा शैवी धूपव्याजेन धार्यते ॥

ज्ञानशक्तिस्स्वनिष्ठा या स्वभेदाष्टस्वरूपिणी ।

शिवेन समवेता च सैव दीपेन विद्यते ॥

इति ॥

पवित्रदानविधिः ॥

(क्रि) (८९) दूर्वाक्षतसहितं पुष्पमञ्जलौ गृहीत्वा, ओं हां हौं

सर्वतत्वाधिपतये शिवाय नमः इति पवित्रं दत्वा ॥ (४९)

(२२५) (प्र) अथ पवित्रेण विना पूजा तामसी परिकीर्तिता इति

श्रीमोहशूरोत्तरश्रुतेः प्रत्यहं पवित्रं ददेदित्याह (दूर्वा)

इत्यादिना (दत्वा) इत्यन्तेन ॥

आरात्रिकाराधनविधिः ॥

(क्रि) ५०) आरात्रिकञ्चतुस्संस्कारसंशुद्धं स्वाहान्तेनाद्य?

ऊर्ध्वं वारत्रयं परिभ्राम्यावतार्य,

p. 302)

आचमनार्घ्यौ च दत्वा भस्मदर्पणच्छत्रचामराण्युपाहृत्य,

सितवासतालवृन्ते च दत्वा, अनन्तादिभिः स्तूयमानं सन्तुष्टं

शिवं ध्यात्वा द्वयष्टककलोपेतप्रासादोच्चारेण पुष्पाञ्जलि

त्रयं दत्वा, महामुद्रया प्ररोच्य, पञ्चमुखी दत्वा ॥ (५०)

(प्र) अथ आरात्रिकाराधनविधिः (आरात्रिकम्) इत्यादि (दत्वा)

इत्यन्तम्। भस्मदानविधिरुक्तः श्रीमत्कामिके

सितं पूतं सुगन्धं च भस्मनिर्वालुकं ततः।

अंगुष्ठानामिकाभ्यां तु तिलकं मुखपञ्चके ॥

इति। (द्व्यष्टककलोपेतप्रासादोच्चारेण) इति। अत्र द्व्यष्टककलाः

अकाराद्युन्मनान्ताः षोडशकलाः। तथा

अकारश्चाप्युकारश्च मकारो बिन्दुरेव च।

अर्द्धचन्द्रो निरोधी च नादो नादान्त एव च ॥

शक्तिश्च व्यापिनी चैव समनाचोन्मना तथा ।

p. 303)

व्यापिनी समनान्तस्थे व्योमांगानन्द संज्ञके ।

अनाथानाश्रिताभ्यां च युक्तो द्व्यष्टकलश्शिवः ।

इति । नन्वयं प्रणवोच्चारमन्त्रक्रमः । न तु प्रासादविषयः इति

चेन्मैवम् । अकारहकारयोरभेदविवक्षया । उक्तञ्च

अकारश्च हकारश्च द्वावेतावेकतस्स्थितौ ।

विभक्तिं नैव विन्देते मारुतांबरयोरिव ॥

इति ॥

जपदानविधिः ॥

(क्रि) (५२) हस्ते पुष्पं गृहीत्वा, हृत्संपूजित याक्षमालया

मूलमन्त्रमष्टोत्तरशतञ्जप्त्वा, अस्त्र

कवचहृदयमन्त्रैर्हृदयकवचास्त्रमन्त्रैस्संपुटीकृत्य,

अस्त्ररक्षितं कवचावकुण्ठितं दक्षिणहस्ते गृहीत्वा,

साघ्र्यजलजपमुद्भवमुद्रयाभूमिष्ठजानुः

ओं हां गुह्यातिगुह्यगोप्तात्वं गृहाणास्मत्कृतञ्च

p. 304)

सिद्धिर्भवतु मे येन त्वत्प्रसादात् त्वयि स्थिते ॥ (पम्)

(२२६) ओम् हां यत्किंचित्कर्महेदेवसदासुकृतदुष्कृतम् ।

तन्मे शिवपदस्थस्य भुक्ष्व क्षपय शंकर ॥

ओं हां शिवोदाता शिवोभोक्ता शिवस्सर्वमिदजगत् ।

शिवो यजति सर्वत्र सश्शिवस्सोहमेव तु ॥ इति सहृदा श्लोकत्रयेण जपं

कर्म तथात्मानं क्रमेण शिवस्य वरदहस्ते निवेदयेत् ।

केवलेन हृदा वा निवेद्य, ब्रह्मांगानां दशांशञ्जस्वा

निवेदयेत् ॥ (५२)

(प्र) अथ जपदानविधिमाह (हस्ते) इत्यादिना (निवेदयेत्) इत्यन्तेन ।

(हस्ते) वामकरे । तथा श्रीचिन्त्यविश्वे

वामहस्ते तु कुसुमं निक्षिपेद्दक्षपणिना ।

दक्षहस्ते पटं न्यस्य जपं कुर्याद्विशेषतः ॥

इति । कुसुमसंग्रहणं जपाभिव्यक्तिस्थानाय इत्याकूतमत्र ।

p. 305)

(अक्षमालया) इति । एतल्लक्षणमुक्तं श्रीमज्ज्ञानरत्नावल्यां

सप्तविंशतिभिश्चाक्षैः पञ्चवक्त्रैस्सकण्टकैः ।
मेरुरूर्ध्वमुखः कार्यः प्रत्यक्षं नागपाशके ॥

इति । (जप्त्वा) इति । अत्र अक्षमालां अनामिकायां निधाय अंगुष्ठेन
नक्षनिकरं एकैकशः सृष्टिमार्गेण भुक्तये
मुक्त्यर्थमूर्ध्वमार्गेण कर्षन्
मानसोपांशुभाष्याणामन्यतमेन मेरुमलंघयन् जपेत् ।
तथा श्रीषट्सहस्रे

अंगुष्ठानामिकाभ्यां च जपं कुर्यात्तु मानसम् ।
अष्टोत्तरशतेनैव फलं कोटिगुणं भवेत् ॥
अक्षराक्षरसन्धानं न द्रुतं न विलम्बितम् ।

इति । तथा क्रियाकाण्डक्रमावल्यां मानसोपांशुभाष्याणां
कुर्यादेकतमं जपम् इति । तथा चोक्तं

p. 306)

भूतये सृष्टिमार्गेण कर्षयेदक्ष सूत्रकम् ।
ऊर्ध्वमार्गेण मुक्त्यर्थं कर्षयेतु शनैश्शनैः ॥

मेरुं न लंघयन्मन्त्री लंघयेद्दोष भाग्भवेत्।

इति। (अस्त्रकवचहृदयमन्त्रैः हृदयकवचास्त्रमन्त्रैः
संपुटीकृत्य) इति। अत्र
करस्थितकुसुमोर्ध्वमस्त्रकवचबीजहृदयान्युपर्युपरि विन्यस्य,
तथैव हृदयकवचास्त्रमन्त्रैः संपुटं कर्तव्यमिति तात्पर्यम्।
(उद्भवमुद्रया) इति। एतल्लक्षणमुक्तं मुद्रालक्षणे
अथोद्भवमुद्रा संकोचितकन्यसांगुलिः प्रसारितर्जनी
किञ्चिदाकुञ्चितांगुलिरूपा इति। (भूमिष्ठजानुः)
अवनीस्थितदक्षिणजानुः। तथा श्रीमच्चिन्त्यविश्वसादाख्ये
सव्यजानुं क्षितौ कृत्वा जपं तस्मै निवेदयेत् इति॥

p. 307)

केन मन्त्रेण जपं समर्पयेदिति बुभुत्सायामाह (ओम् हाम्) इत्यादि।
ओमिति मन्त्रदीपनार्थम्। (गुह्यातिगुह्य) एतदामन्त्रणपदम्।
गुह्यञ्चातिगुह्यं च गुह्यातिगुह्ये। तत्र गुह्यशब्देन
रहस्यपर्यायेण पञ्चविंशोऽयं पुरुष इत्यादिश्रुतिसिद्धानि
पुरुषप्राकृतानि वस्तून्युच्यन्ते। एतान्यतीत्य स्थितानि
सिद्धान्तसिद्धानि अतिगुह्यानि। अतिगुह्य शब्देन बिन्दुवैन्दवानि
तत्वानि नानादिवैस्वर्यन्तशब्दरूपाणि मायामायेयानि
कलादिरागान्तानि तत्तत्तत्ववासिनो विद्येश्वराः सर्वे आत्मानश्च

कथ्यन्ते। एते सर्वेपि यस्याधिष्ठेयाः सः गुह्यातिगुह्यः सः (त्वं गोप्ता) सर्वेषामात्मनां रक्षकस्त्वमेव नान्यः। अयमर्थः गुह्यातिगुह्य शिव सर्वेषां गोप्ता त्वं अस्मत्कृतं जपं गृहाण, कारणेत्वयि

p. 308)

रक्षकत्वेन स्थिते सति येन जपेन त्वत्प्रसादात् सिद्धिर्भवति। सिद्धिशब्देनात्र साधकविषये तत्तद्भूमिषु स्थितानि अणिमाद्यैश्वर्याण्युच्यन्ते। मुमुक्षोरपि निवेशितसन्निवेदनेन मुमुक्षूणां प्रतिबन्धनिराकरणाय क्रियन्ते।

* कर्मनिवेदनमन्त्रं पठति (यत् किंचित्) इत्यादि। सुकृतं दुष्कृतं वा यत् किञ्चित् कर्माधिक्रियते तत् द्विविधमपि कर्म हे देव हेशंकर शिवपदस्थस्य शिवपदे शिवरूपे दीक्षया योजितस्य मे भुंक्ष्वं इति मन्त्रस्वरूपस्यार्थः क्षपयेतिपदेन उच्यते। अस्य मन्त्रस्य क्षपणार्थवाचकत्वं प्रथमपदस्य शिखाक्षतत्वात् द्वितीयपदस्य श्रीमत्किरणोक्तप्रधानमन्त्रत्वाच्छिखाप्रयोगेणाभिः ग्रन्थिच्छेदादिभिः विधीयते।

p. 309)

अतः क्षपणार्थत्वम्। [एतेन दीक्षोत्तरकालं अबुद्धिपूर्वप्राप्तं

पापकर्म अकामतया प्राप्तं कर्मचेष्यते ।

बुद्धिपूर्वकृतस्य पापसामान्यस्य विशेषशास्त्रेषु प्रायश्चित्तस्य

श्रुतत्वात् । काम्यस्य च कर्मणो मुमुक्षोर्निषिद्धत्वाच्च ।

अतः शंकर एतादृशं कर्म नाशयेत्यर्थः ॥]

आत्मसमर्पणमन्त्रमाचष्टे (शिवो दाता) इति ।

अनेन श्लोकेनात्मनिवेदनं क्रियते । अस्य

पूर्वार्द्धेनात्मनिवेदनस्य संप्रदानभूतः शिवो उच्यते । (शिवो

दाता) शिवशब्देन

क्रि?नित्यनिर्मलनिरतिशयसर्वार्थज्ञानक्रियारूपशिवत्वयुक्तः

परमेश्वर उच्यते । स एव दाता अनाद्यशुद्धियुक्तानामाशोधकः

।

दैव्?शोधने इत्यस्माद्दातार्निर्वृत्तं रूपं दातेति । (शिवो भोक्ता)

स एव सर्वेषां रक्षकः । भोक्तेति भुज पालनाभ्यवहारयोः

इत्युक्तत्वात् अत्र

p. 310)

* पा क्रियान्ते इति ॥

(२२७) भुजिः पालन एव वर्तते । शिवः पालक एव वर्तते ।

अव्यवहारासंभवात् अनश्वन्नन्यो अभिचाकशीति इति श्रुतेः ।

(शिवस्सर्वमिदं जगत्) स शिवः शुद्धमिश्राशुद्धरूपमिदं

सर्व जगत् रक्षकत्वेन शोधकत्वेन च व्याप्य स्थितः।

अस्मान्नान्यः शोधको रक्षकश्च विद्यते।

उत्तरार्द्धेन दाता अस्य कर्तृकारक आत्मोच्यते।

(शिवो यजति) इति। प्राकृतं भावमुत्सृज्य शिवोहमिति भावयेत्

शिवीभूय शिवं यजेत् यावन्न तत्समो जातस्तावन्नाराधने

क्षमः इत्यादिभिर्वचनैः पूर्वोक्तभूतशुद्ध्यादिप्रकारेण

शुद्धः सर्वत्र शास्त्रचोदितेषु सर्वेष्वधिकरणेषु स्वकीया

शुद्धिक्षयाय यो यजति अर्चयति स पूजकः शिवः।

p. 311)

अहं तु शब्देन संप्रदानभूताच्छिवात्

तत्प्रदेयभूतस्यात्मनः पूर्यष्टकावच्छिन्नं स्वरूपामुच्यते।

एवं श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण श्लोकत्रयं

व्याख्यातम्॥

साध्यमन्त्रार्चनादिप्रकारः॥

(क्रि) (५२) काम्यमन्त्रपूजकः तदर्थं विज्ञाप्य,

लब्धानुशश्शिवासनपद्मस्य दक्षिणदलाग्रे प्राग्भागे

स्त्रीरूपान् गौर्यादिमन्त्रान्, पश्चिमभागे पुंरुपान्

मृत्युञ्जयादिमन्त्रान्, स्त्रीपुंरूपान् उमामहेश्वरादिमन्त्रान्
देवस्य पुरतो यजेत्। तत्र स्वाध्वान्तं प्रणवेनासनमूर्तीं दत्वा,
हृत्संपुटितैस्स्वस्वमन्त्रैरावाह्य, सकलीकृत्य,
पाद्यादिभिस्संपूज्य सहस्रं शतमष्टोत्तरं वा यथाशक्ति
जप्त्वा, हृत्संपुटितं अस्त्ररक्षितं कवचावकुण्ठितं
काम्यमन्त्रोपरक्ताय शिवाय समर्पयेत्।

p. 312)

अथवा आवरणपूजान्ते काम्यमन्त्रानाराद्ध्य पश्चाज्जपान्ते
काम्यमन्त्रजपं कृत्वा, पूर्वोक्तवन्निवेदयेत्॥ (५२)

(प्र) अथ साधकस्य साध्यमन्त्रार्चनादि प्रकारमाह
(काम्यमन्त्र) इत्यादिना (निवेदयेत्) इत्यन्तेन। (स्त्रीरुपान्)
स्त्रीदेवतावाचकान्। (पुंरूपान्) पुरुषदेवतावाचकान्।
(स्त्रीपुंरूपान्) स्त्रीपुरुषोभयरूपदेवतावाचकान्। (देवस्य)
अघोरनाथस्य। (पुरतः) इति। अत्र यदा साध्यमन्त्रो देवीमूर्तिस्तदा
शिवासनपद्मयाम्यपत्रस्य पूर्वभागे पूज्यः देवविग्रहश्चेत्
तर्हि पद्मपत्रपश्चिमभागे स्त्रीपुंविग्रहो यदि तदा
पद्मपत्रमध्यत इति तात्पर्यम्।
२२९- तथा श्रीमन्मृगेन्द्रे

याम्याब्जपत्रे प्राक्पश्चाद्भागयोस्स्त्रीनृविग्रहान् ।

अघोरलोचनज्योतिर्मध्ये नान्यत्र कुत्रचित् ॥

p. 313)

इति । काम्यमन्त्रपूजास्थानमुक्त्वा तदर्चनाप्रकारमाह (तत्र) इति ।

(स्वाध्वान्तम्) इति । अत्र यावत्यध्वनि काम्यमन्त्रस्य व्याप्तिः तदन्त

अव्याप्तिकमावाहनं कुर्यादित्युक्तं श्रीमता

मृगेन्द्रव्याख्याकारेण (काम्यमन्त्रोपरक्ताय) इति ।

साधकाभिमतमन्त्रोपरंजितायेत्यर्थः । तथा

श्रीमत्सर्वस्त्रोतस्संग्रहसारे

येन येन हि रूपेण साधकस्संस्मरेत् सदा ।

तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः ॥

इति । (समर्पयेत्) इति । प्रत्यहं वाञ्छितमभिधाय ममैनं जपं

पालयेति निवेदयेदित्यर्थः । तथा श्रीमन्मृगेन्द्रे स्वजपं

साधकः काममभिसन्धाय निक्षिपेत् इति । तन्मन्त्राराधन क्रमे

विकल्पमाह (अथवा) इति ॥

p. 314)

स्वगुरुसपर्याविधिः ॥

(क्रि) (५३) तदनु देवस्याग्नेय दिग्भागे सकृत्प्रयोगेणासनं
षडुत्थं वा दत्वा, तत्र मूर्तित्वेन गुरुमूर्तौ मूर्तिमन्त्रेण
विन्यस्य, तस्यां शिवमावाह्य, पाद्यादिकं दत्वा,
गन्धपुष्पादिभिरभ्यर्च्य, शिवं ध्यात्वा,

श्रीमद्देशिकपादेभ्यस्सशक्तिभ्यो नमो नमः।
सदा शिष्टात्मचिद्व्यक्ति कारणेभ्यो नमो नमः॥

इत्यादिस्तोत्रादिभिस्तोषयेत्॥ (५३)
(प्र) अथ काम्यमन्त्रार्चनक्रममुदाहृत्य,
स्वगुरुसपर्याविधिमाह (तदनु) इत्यादिना (तोषयेत्) इत्यन्तेन।
(सकृत्प्रयोगेणासनम्) इति। अत्र
शक्त्यादिशक्तिपर्यन्तासनमन्त्रमनुचिन्तयन्
शिवासनमन्त्रमात्रमुच्चरन्नर्चयेदित्यर्थः। (षडुत्थं वा) इति।
एतल्लक्षणमुक्तं

p. 315)

श्रीमद्विमलावत्या

अनन्तश्चैव धर्मश्च ज्ञानं वैराग्यमेव च।

ऐश्वर्यञ्चैव पद्मञ्च षडुत्थमिदमासनम् ॥

इति । स्तोत्रं वक्ति (श्रीमत्) (सशक्तिभ्यः) ।
पाशविमोचनसामर्थ्यसहितेभ्यः । शेषं सुगमम् । अत्र
गुरुर्निजगुरुः । यद्वक्ष्यति स्वगुरुं विद्यापीठञ्च इति ।

विद्यापीठार्चनविधिः ॥

(क्रि) (५८) तदनु देवस्य पश्चिमदिग्भागे ओम् हां योगपीठाय
नमः ओं हां हौं विद्यापीठाय नमः इति विद्यापीठं
संपूज्य,

सकलाज्ञानहं विश्व विज्ञानप्रदमीश्वरम् ।
विद्यापीठस्थमाहृत्य मनोवाग्विग्रहैर्नमः ॥
इत्यादिभिः स्तुत्वा ॥ (५४)

(प्र) अथ विद्यापीठार्चनविधिः (तदनु) इत्यादि (स्तुत्वा) इत्यन्तम् ।

p. 316)

योगपीठन्नाम शक्त्यादिशक्तिपर्यन्तासनम् । तथा
श्रीमत्पंचावरणस्तवे

क्षित्यादिकुटिलाप्रान्तसमस्ताध्वमयं शुभम् ।
योगपीठमिदं दिव्यं शिवस्यासनमाश्रये ॥

इति । योगस्य सादाशिवस्य देहस्य पीठमासनभूतम् इति गदितं
भगवता सर्वज्ञानोत्तरवृत्तिकारेण ।
विद्यापीठन्तावत् श्रीमन्मृगेन्द्रादिस्वस्वसंहिता । तथा
श्रीमज्ज्ञानरत्नावल्यां विद्यापीठं कोटिमात्रं पूजयेद्वा
स्वसंहिताम् इति । स्तोत्रं वक्ति (सकल) इति । (विश्वविज्ञानप्रदम्)
सर्वज्ञानक्रियाव्यक्तिलक्षणबोधप्रदमित्यर्थः । तदुक्त
श्रीमन्मृगेन्द्रे

तमश्शक्त्यधिकारस्य निवृत्तेस्तत् परिच्युतौ ।
व्यनक्ति दृक्क्रियानन्त्यं जगद्बन्धुरणोश्शिवः ॥

इति स्फुटमन्यत् ॥

p. 317)

विद्यापीठार्चनानन्तरकरणीयविधिः ॥

(क्रि) (५५) देवस्य पुष्पाञ्जलित्रयं दत्वा, (५५)
(प्र) तदनन्तरकरणीयविधिः (देवस्य) इत्यादि (दत्वा) इत्यन्तम् ॥

स्तुतिक्रमः ॥

(क्रि) ५६) स्तोत्रैस्तोषयेत्। यथा

सुराधिपन्नमस्कृत्य शशंककृतशेखरम्।
कपालमालिनं देवं प्रणतोस्मि सदाशिवम्॥
कालेश्वरं महाकालं कालं जरनिवासिनम्।
कालकृत्कालवेत्तारं प्रणतोस्मि सदाशिवम्॥
सर्वकृत्सर्वदातारं सर्वज्ञमपराजितम्।
सर्वभूतात्मभूतस्थं प्रणतोस्मि सदाशिवम्॥
योऽसृजत् सर्वभूतानि ब्रह्माद्यांश्च सुरासुरान्।
तमहं लोककर्तारं प्रणतोस्मि सदाशिवम्॥
वरं वरेण्यं वरदं परिष्ठं परवाहनम्।

p. 318)

वरमालाधरं देवं प्रणतोस्मि सदाशिवम्॥
प्रीतिमत्प्रीतिदातारं सुप्रियं प्रियदर्शनम्।
उमाप्रियं सदा कान्तं प्रणतोस्मि सदाशिवम्॥
धर्माधर्ममयं देवं सुखदुःखफलोदयम्।
बन्धमोक्षप्रणेतारं प्रणतोस्मि सदाशिवम्॥

मनोबुद्धिरहंकारन्तन्मात्रेन्द्रियगोचरम् ।

प्रधानपुरुषेशानं प्रणतोस्मि सदाशिवम् ॥

यं ध्यायन्ति महात्मानो मुनयस्संशिवव्रताः ।

तमोकारपरं सूक्ष्मं प्रणतोस्मिं सदाशिवम् ॥

सूक्ष्मं सर्वगतन्नित्यं सर्वविद्येश्वरेश्वरम् ।

सर्वतत्वाश्रयं देवं प्रणतोस्मि सदाशिवम् ॥

भूमिज्ञपोऽग्निरनिलः खमात्मा चन्द्रभास्करौ ।

मनोबुद्धिरहंकारः परा प्रकृतिरेव च ।

यस्येच्छामनुवर्तन्ते भावाभावविकारिणीम् ।

तस्मै परमदेवाय पराय परमात्मने ॥

p. 319)

महद्भयश्चातिमहते महामायातिमायिने ।

सूक्ष्मेभ्योप्यतिसूक्ष्माय नमस्तेस्त्वमितात्मने ॥

नमस्ते बोधरूपाय कालान्तक नमोस्तु ते ।

कलाधिप नमस्तेस्तु सर्वकाल प्रवर्तक ॥

कलासकलरूपेण कलाभिर्विश्वरूपधृत् ।

विश्वेश्वर नमस्तेस्तु आदिकाल प्रवर्तक ॥

रौरवे

जलान्धक पृथुस्कन्ध बन्धभेदविवक्षण ।

जय प्रवर विरेश संरुद्धपुरदाहक ॥

जयाखिलसुरेशान शिरश्छेदं भयानक ।

जयप्रथितसामर्थ्य मन्मथस्थितिनाशन ॥

जयाच्युत तनुध्वंसिन् कालकूट बलापह ।

जयावर्तमहाटोप सरिद्वेग विदारण ॥

जयदारुवनोद्यान मुनिपत्नी विमोहक ।

जयनृत्तमहारंभ क्रीडाविक्षोभदारुण ॥

जयोग्ररुपसंरंभ त्रासितत्रिदशासुर ।

p. 320)

जयक्ररगजेन्द्रास्य दर्शितासृक्सुनिर्झर ॥

जयवीरपरिस्पन्द दक्षयज्ञ विनाशन ।

जयाद्भुत महालिंग संस्थानबलगर्वित ॥

जयश्वेतनिमित्तोग्र मृत्युदेह निपातन ।

जयाशेष सुरावास काममोहित शैलज ॥

जयोपमन्युसन्ताप मोहजाल तमोहर ।

जय पातालमूलोर्ध्व लोकालोक प्रदाहक ॥

श्रिमत्किरणे

सर्वज्ञान नमस्तुभ्यं सर्वकर्त्रे नमोस्तुते ।
अविलुप्त स्वरूपाय चिन्मयाय नमोस्तु ते ॥
प्रमाणातीत देहाय नमश्शान्ताय तेजसे ।
सत्संवित्कारणातीत हानादानान्तरात्मने ॥
अनादिनिधनेशान शिवाय परमात्मने ।
नमस्ते तत्वरूपाय विभवायामितात्मने ॥
ज्ञानज्ञात्रे तथा ज्ञेय व्यतिरक्ताय ते नमः ।
ज्ञप्तिमात्र स्वरूपाय आनन्दब्रह्मणे नमः ॥

p. 321)

अविद्याव्यतिरिक्ताय विद्यादेहाय ते नमः ।
स्वप्रमाणैकगम्याय स्वप्रकाशाय ते नमः ॥
नमोऽभिमतकर्त्रे ते पञ्चकृत्यैस्सदाऽत्मनाम् ।

षट्सहस्त्रिकायां

भगवन् भूतभव्येश ब्रह्मविष्णिवन्द्रनायक ।
त्वत्प्रसादगुणाविष्टा दिवि दीव्यन्ति देवताः ॥
भवता निखिलं व्याप्तं जगत् स्थावरजंगमम् ।
त्वत्पादांबुजसामर्थ्य स्मरणादपि पापिनः ॥
प्रध्वस्तपापनिचयास्सिद्धिभाजो भवन्ति हि ।

किं पुनर्मुनयो धीरास्त्वय्येवार्पित चेतसः ॥

विमुक्तास्सर्वपापेभ्यो योगिनो विगतस्पृहाः ।

विरजस्का विशोकाश्च ह्यतिक्रान्त भवार्णवाः ॥

अन्येपि हि सुरेशान लब्धेप्सितवरा नराः ।

अहमेकोऽल्पभाग्यस्तु क्लेशभाक् सुखवर्जितः ॥

वज्रोपमं महत्पापं मदीयमथवा विभो ।

त्वदीयाश्शक्त्यस्तीव्रास्संसारोद्धारणं प्रति ॥

p. 322)

मत्पापनिचयं प्राप्ता लघुना मृकुतां गताः ।

तस्मात् त्वमेव भगवन् वर्तयेथा ममेष्टद ॥

श्रीमन्मतङ्गपारमेश्वरे

जय जय परमेश्वरेन्दुमौले जय जय शिव सांब शंकरेश ।

जय जय मृड भीम कृत्तिवासो जय जय पुरकालजित् प्रसीद ॥

(२२३) जयजय जगदेकमातरीशे जय जय विनतात्मपालनेशे ।

जय जय करुणामृतांबुराशे जय जय गिरिजे नमः प्रसीद ॥

इत्यादि मतिविभवानुरूपं स्तुत्वा ॥ (५६)

(प्र) अथ स्तुतिक्रमः (स्तोत्रैः) इत्यादि (स्तुत्वा) इत्यन्तम् । स्तोत्रार्थः

स्पष्टः ॥

प्रदक्षिण नमस्कार विधिः ॥

(क्रि) ५७) प्रदक्षिणत्रयमपदशब्दं कृत्वा साष्टांगं दण्डवत्

प्रणम्य, हृष्टस्समुत्थाय ॥ (५७)

(प्र) अथ प्रदक्षिण नमस्कारविधिं दर्शयति (प्रदक्षिण) इत्यादिना

(समुत्थाय) इत्यन्तेन ।

p. 323)

(साष्टांगम्) शिरोहस्ताद्यष्टांगसहितम् । तथा श्रीमद्दीप्ते

शिरो हस्तौ च कर्णौ च चिबुकं बाहुयुग्मकम् ।

अष्टांगं च नमस्कारम् इति । (प्रणम्य) इति ।

अत्र त्रिवारं पंचवारं वा नमस्कुर्यात् ।

तथा दीप्त त्रीणि पंच च सप्तापि नव द्वादश संख्यया ।

भक्त्या कृत्वा नमस्कारं शिवस्याग्रे ततो नरः ॥ इति ।

द्विकालादिपूजाशक्तविधिः ॥

(क्रि) (५७) द्विकालादि पूजाशक्तंस्तु

शिवमासनमूर्तिमूलैस्संपूज्य, भोगांगस्थानेषु

ब्रह्मनेत्रांगानि सन्ध्यागणनया पूजयेत्॥ (५७)

(प्र) अथ एवं पूजाक्रममुदाहृत्य

परार्थे वा इयं पूजा ह्यात्मार्थे ना जनार्दन।
एककालं द्विकालं वा त्रिकालं वा विधीयते॥

इति श्रीमदजितादिश्रुतौ द्विकालादि पूजाया निहितत्वात् तदसमर्थस्य
किं

p. 324)

विध्यन्तरमस्तीत्याशंक्याह (द्विकाल) इत्यादिना (पूजयेत्) इत्यन्तेन।
अत्र एककालार्चनं मुख्यं माध्यन्दिन एव कार्यम्। तस्यैव
मुख्यत्वश्रुतेः। दिनार्द्धे सवनं गतः इत्युपक्रम्य

सर्वमन्त्रमुखे पुण्ये परमेशाधिदैवते।
तदनिर्वर्त्य योऽश्नाति सवनं सुरपूजितम्॥
तद्विरामं विना ख्यातं जन्तुर्मृत्योश्च वासरम्।
मन्त्रास्तन्नाधितिष्ठन्ति योगपीठव्यवस्थिताः॥

इति एकस्मिन् काले भोगाङ्गस्थानस्य पूजां विहाय, इतरक।
लोद्देशेन अष्टपुष्पिकार्चनेन च तत्तत्कालार्चनानां संपादनं

स्यादिति मन्तव्यम्। तदुक्तं

अष्टपुष्पादिदानेन द्विकालाद्यर्चनाविधिः।
अन्तर्भाव्य कृतो यस्मादेककालार्चनैरपि ॥ इति ॥

p. 225)

नित्याग्निकार्यविधिः ॥

(क्रि) (५३) अथ शिवं विज्ञाप्य, अग्निकार्यार्थमग्निसदनं यायात्।
तदनधिकारी शिवमासनमूर्तिमूलांगैर्नेत्ररहितैरष्टभिः
पुष्पैर्यथास्थानं वा समस्तैर्ब्रह्मांगैस्संपूज्य,
पराङ्मुखार्घ्यं दत्वा, पूजां समापयेत्।
अग्निकार्याधिकारयुक्तोप्युपकरणवैकल्यात्तस्मिन्नशक्तो वा
होमसंख्यया दशगुणञ्जप्त्वा, निवेद्य, पूजां समापयेत्।
अथाग्निकार्याधिकारी संपन्नोपकरणः
अग्निंकार्यार्थमद्धयेष्य, लब्धानुज्ञोऽर्घ्यपात्रादिकमानीय,
याम्यनैर्-ऋतवायव्येभ्योऽन्यस्यां दिशि कल्पितं कुण्डं वा
स्थण्डिलं वा समासाद्य पूर्वास्य उत्तरास्यो वा समुपविश्य
[कुण्डे वा स्थण्डिले वा] न्यस्तमूलेन चक्षुषा निरीक्षणम्,
शिवमन्त्रेण प्रोक्षणताडने,
कुशैहुंफडन्तास्त्रेणाभ्युक्षणं, वौषडन्तकवचेन

p. 326)

खननावकीरणः पूरण

समीकरणसेचनकुट्टणसंमार्जनसमालेपनानि खड्गेन कुशेन

विधाय, कुण्डमद्धये अस्त्रेण पूर्वाग्ररेखात्रयं कुशेन

संपाद्य, रेकामेकामुत्तराग्राञ्च संपादयेत्।

उत्तरास्यश्चेद्विपर्ययेण संपाद्य, कवचेनाभ्युक्ष्य,

सर्वसंस्कारसंपत्तिं विभाव्य, तत्र हृदयेन दर्भकूर्च्या

विष्टरं दत्वा, ओम् हां वागीश्वर्यै नमः इति

देवीमावाहयेद्विद्यां विधिवद्विश्वमातरम्।

श्यामामृतुमतीं ध्यात्वा सद्वासोमाल्यभूषणाम्॥

प्रसन्नवदनां पद्मपत्राभनयनत्रयाम्।

इति ध्यात्वा, तद्वद्वागीश्वरं देवं ओं हां वागीश्वराय

नमः इति संपूज्याघ्र्यं दत्वा पश्चादरण्यादिसंभवं वा

वह्नि शुद्धपात्रे समानीय, क्रव्यादांशं परित्यज्य,

निरीक्षणादिचतुस्संस्कारैस्संस्कृत्य, ओं हां हं हां

वह्निमूर्तये नमः इत्यनेन

p. 327)

मन्त्रेण संहारमुद्रया वह्निमादाय, पूरकेण इडया आकृष्य,
कुंभकेन नाभ्यग्निना वैन्दवेन च संयोज्य, एकीकृत्य, रेचकेन
पिङ्गलया ओम् हूं वह्निचैतन्याय नमः इति
प्रदीपकलिकोपममाग्नेयं बीजमुद्भवमुद्रया निवेश्य,
संहितया
(२२५) संपूज्य, पारमेश्वर वीर्यमिति विभाव्य, वागीश्वरेण वा
वागीश्वरीगर्भनाड्यां क्षिप्यमाणं विभावयन्,
मूलेनात्मसंमुखन्निक्षिप्य, समूह्य, देव्यैवासः
परिधानशौचाचमनानि हृदा दत्वा,
सद्योजातादिभिर्ब्रह्मभिरभ्यर्च्य, मूलेनाहुतिपञ्चकं दत्वा,
पूर्वदक्षिणपश्चिमोत्तरासु दिक्षु ओं हां ब्रह्मणे नमः ओं
हां विष्णवे नमः ओं हां रुद्राय नमः ओं हां अनन्ताय
नमः इत्यभ्यर्च्य, अग्नि शिशोरक्षां विज्ञाप्य, ओम् हां
शिवाग्निस्त्वं हुताशन इति अग्नेर्नाम कृत्वा, पितरौ विसृजेत्।
ततोऽग्निहृत्पद्मे शिवं पूर्ववदभ्यर्च्य, नैवेद्यसमये

p. 328)

तिलादिभिर्यथाशक्ति मूलेन ब्रह्मांगैश्च दशांशतौ हुत्वा,
पूर्णां दत्वा, तद्भस्माभिवन्द्य, अष्टपुष्पिकया संपूज्य,
पराङ्मुखार्घ्यं दत्वा, अग्निस्थमुत्थाप्य, मूर्तौ संयोज्य,
शिवन्निरपेक्षं विसृज्य, ओम् भूस्स्वाहा ओं भुवस्स्वाहा ओं

स्वस्स्वाहा ओं भूर्भुवस्सवस्स्वाहा इत्याहुति चतुष्टयं दत्वा,
ब्रह्मादिभ्यो बलिं दत्वा, वह्निन्नमस्कृत्य हुतं
भुक्त्वोपरमेत्युक्त्वा, ओं ह्रौं ह्रूं शिवाग्नये नमः इति वह्निं
विसृज्यं, ब्रह्मादीनपि व्युत्क्रमेण विसृजेत्॥
(प्र) अथ सूर्योपस्थानेत्यादिश्रुतेरेवं
सूर्यादिपञ्चाधिकरणशिवार्चनक्रमं व्याहृत्य अधुना
षष्ठवह्न्या धारार्चन लक्षणस्य नित्याग्निकार्यस्य विधिं
लीलावती नाम शिवागमविहितप्रकारेण संक्षिप्य श्रुते (अथ)
इत्यादिना (विसृजेत्) इत्यन्तेन।

p. 329)

ननु सर्वैरप्यग्निकार्यं करणीयं वा इत्याशंक्य नेत्याह (तत्) इति
। (तदनधिकारी) तस्याग्निकार्यस्य अनधिकारी अधिकाररहितः।
स च परहंसयतिप्रभृतिः। तथा श्रीमच्चिन्त्यविश्वसादाख्ये

परहंसयतीनाञ्च तपस्सन्न्यासिनश्च ये।
अनयोरग्निकार्येषु योग्यत्वं न विधीयते॥

इति। (यथास्थानं वा समस्तैर्ब्रह्माङ्गैस्संपूज्य) इति।
अत्र सवा?दिक्रमेण तत्तत्स्थाने अभ्यर्चयेदित्यर्थः।
तथा श्रीमदंशुमति

लयांगयजनं कृत्वा पराङ्मुखं ददेद्बुधः ।

सद्यादीशान्तमभ्यर्च्य व्युत्क्रमेणैव योजयेत् ॥

(२२६) अस्त्रादिहृदयान्तञ्च अंगान्यङ्गेन योजयेत् ।

चतुर्दिक्ष्वस्त्रमभ्यर्च्य सोमादीन्द्रान्तमेव च ॥

नेत्रमग्रे समभ्यर्च्य कवचं वायुदेशके ।

नैर्-ऋते च शिखां चैव शिरस्त्वीशानदेशके ॥

p. 330)

आग्नेय्यां हृदयं चैव अर्चयेत्तु लयांगकम् ।

इति । पराङ्मुखार्घ्यं नाम विसर्जन समये प्रदेयमर्घ्यम् ।

तथा श्रीमत्सर्वज्ञानोत्तरे विसर्जने तु गांगेयदेयमर्घ्यं

पराङ्मुखम् इति । एतत्स्वरूपमग्रे दर्शयिष्यामः ॥

ननु अग्निकार्याधिकारी यः तत्साधन विकलस्तस्मिन्नसमर्थः

स किं कुर्यादित्याह (अग्निकार्य) इति । तदधिकारी किंविधः कुत्र

यायादित्याशंक्याह (अथ) इति । अग्निकार्याधिकारी देशिकादिः ।

तथा श्रीमत्सारसंग्रहे

अग्निकार्याधिकारित्वंमभिषेकादनन्तरम् ।

यतस्तेन विनाऽचार्या दीक्षादौ नाधिकारिणः ॥

इति । तथा हुतेनैव तु मुच्यन्ते साधका जन्मबन्धनात् इति ।

(अन्यस्याम्) इति । आग्नेय्यादिदिशीत्यर्थः । तथा

श्रीमज्ज्ञानरत्नावल्यां

p. 331)

नित्यहोमे तु वेदाश्रमाग्नेय्यां हस्तसंमितम् । कुर्यात्

कुण्डमथैशान्यां पूर्वे वा इति । कुण्डलक्षणमरे

दर्शयिष्यामः । स्थण्डिलं तावत् सिकतादिभिः । करमानं

त्र्यंगुलोन्नतं कल्पितं चतुरश्रक्षेत्रम् । तथा श्रीमत्कारणे

कुण्डस्य लक्षणं प्रोक्तं स्थण्डिलञ्चाधुनोच्यते ।

शुद्धदेशोत्थसिकतैरनार्द्रैर्हस्तविस्तृतम् ॥

अंगुलत्रयमानोर्ध्वं समं निम्नोन्नतं न च ॥

इति । कुण्डसंस्कारमाह (कुण्डे वा) इति । (विपर्ययेण) इति । अत्र

युद्युत्तराभिमुखस्तदा उदमग्रं रेखात्रयं रेखामेकां

प्रागग्राञ्च संपादयेदिति बोध्यम् ॥

वागीश्वर्यावाहनमाह (तत्र) इति । वह्निविन्यासमाह (पश्चात्)

इति । संहारिणीलक्षणमुक्तं प्राक् । (प्रदीपकलिकोपमम्) इति ।

p. 332)

अत्र कलिकाशब्दः स्तवकवाची। स्याद्मुच्छकस्तु स्तवकः कलिका
इत्यमरः। (परमेश्वरवीर्यम्) परमेश्वरशुक्लम्। वीर्यं
पराक्रमे शुक्ले इति नानार्थरत्नमालः। अत्र
पारमेश्वरमेतद्वीर्यमिति भावनाभावे
वागीश्वरीगर्भनाड्युपक्षेपानुपपत्तिरिति तात्पर्यम्।

आग्नेयममुना बीजं प्रदीपकलिकोपमम्।
कुण्डस्थे पावके न्यस्य पञ्चब्रह्माणि पूजयेत्॥
आहुतीः पञ्चमूलेन जुहुयात् तदनन्तरम्।

इति श्रीमत्सोमशंभुवचनं हृदि निधाय
गर्भाधानादिपंचसंस्कारसिद्धये ब्रह्मभिरर्चां मूलेन
होमं च कुर्यादित्याह (सद्योजातादिभिः) इति।
स्रुगादिकमर्घ्यप्रोक्षणेन संस्कारयेत्। तथा
श्रीमज्ज्ञानरत्नावल्यां

सकृत् प्रोक्षणमात्रेण स्रुक्संस्कारः कृतो भवेत्।

p. 333)

एवं घृतस्य कर्तव्यो ह्यर्घ्यपात्रोदकेन च॥

इति । शिवावाहनमाह (ततः) इति । (शिवं पूर्ववदभ्यर्च्य) इति ।
अत्र पवित्रान्तं संपूजयेत् । तथा ज्ञानरत्नावल्यां
ततस्तद्वह्निहृत्पद्मे पूजयेत् पूर्ववत् सासनं
साङ्गमाश्रयोपाधिरूपं सोपचारं शिवं पवित्रान्तं
संपूज्य भगवंस्त्वां तर्पयामीत्याज्ञां नाडीसन्धानेन
होमं कुर्यात् इति । (यथाशक्ति) इति । अनेन दशकादिसंख्योच्यते ।
तथा श्रीमत्कामिके शतमर्द्धं तदर्द्धं वा विशतिर्दश एव च ।
शिवाद्दशांशतोऽङ्गानि तर्पयेत् इति । (तद्भस्माभिवद्य) इति ।
अत्र दर्भान् शिवाग्नौ सन्दीप्य तदभिव्यञ्जितशिवात्मना भस्मना
ललाटे तिलकं धृत्वेत्यर्थः । केचित्तु शिवं शिवाग्निं च विसृज्य
परिस्तरणदर्भमेकमग्नौ

p. 334)

सन्दीप्य तद्भस्मतिलकं कुर्यादिति वदन्ति । तत्पक्षो
गुरुणामभिमतो न । यद्वक्ष्यति समनन्तरं शिवं निरपेक्षं
विसृज्य इति । तथा चाह श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारः ।
भस्म वन्देत इत्यत्र शिवविसर्जनात् पूर्वं दर्भेण अग्निप्रदीप्तेन
तदभिव्यक्तस्वरूपेण भस्मना शिरोललाटादिषु आलंभनं
कुर्यात् इति । वह्निस्थ शिव विसर्जनमाह (अष्टपुष्पिकया) इति ।
(अग्निस्थम्) इति । शिवाग्निस्थितमन्त्रसंघातमित्यर्थः । (शिवं

निरपेक्षं विसृज्य) इति। अत्र आत्मिये हृदयकमले शिवं स्थापयेदिति
बोध्यम्। यदत्र हि मन्त्राणामभिव्यक्तिलयौ। तथा
श्रीमन्मृगेन्द्रपद्धत्यां भस्म वन्देत संगृह्य दैवमात्मनि
योजयेत् इति।

p. 335)

शिवाग्निविसर्जनमाह (ओम् ह्रौम्) इत्यादि। (वह्नि विसृज्य) इति।
स्वस्य हृदि स्थाप्येत्यर्थः। तथा

विसर्जनं यथा वह्नेर्देशादिस्थं कदाचन।
ज्ञानाग्नौ हृदये बिन्दौ योजयित्वा विसर्जयेत्॥

इति। (विसृजेत्) स्वहृदये ब्रह्मादीनपि स्थापयेदित्यर्थः।
तदुक्तं श्रीमत्सोमशंभुचरणैः भास्वरान् परिधिस्थांश्च
पूरकेण हृदाऽणुना। शुद्धया परयाऽत्मीये
स्थापयेत्तद्धृदंबुजे॥ इति॥

अन्तर्बलिबहिर्बलिविधिः॥

(क्रि) (६०) ततः स्वदक्षिणदिग्भागे मण्डलद्वयं संपाद्य,
प्रथममण्डले पूर्वाद्युत्तरान्तदिक्षु ओं हां रुद्रेभ्यो नमः

ओं हां मातृभ्यो नमः ओं हां गणेभ्यो नमः ओं हां
यक्षेभ्यो नमः ईशानादिकोणेषु

p. 336)

ओं हां गृहेभ्यो नमः ओं हां असुरेभ्यो नमः ओं हां
राक्षसेभ्यो नमः ओं हां नागेभ्यो नमः मण्डलमद्ध्ये
ईशानाग्नेयनैर्-ऋतेषु ओं हां नक्षत्रेभ्यो नमः ओं हां
राशिभ्यो नमः ओं हां विश्वेभ्यो नमः वायुवरुणयोर्मद्ध्ये
ओं हां क्षेत्रपालाय नमः इत्यभ्यर्च्य स्वाहान्तं बल्यर्घ्यं
दत्वा, द्वितीयमण्डले पूर्वादीशान्तासु दिक्षु ओं हां इन्द्राय
नमः ओं हां अग्नये नमः ओं हां यमाय नमः ओं हां निर्-
ऋतये नमः ओं हां वरुणाय नमः ओं हां वायवे नमः ओं
हां कुबेराय नमः ओं हां ईशानाय नमः ऐशान्यां ओं
हां ब्रह्मणे नमः नैर्-ऋते ओं हां विष्णवे नमः मध्ये ओं
हां नीललोहिताय नमः इति संपूज्य, बल्यर्घ्यं दत्वा बहिः ओं

p. 337)

हां वायसादिभ्यस्समयभेदिभ्यस्स्वाहा, ओम् हां
अग्न्यादिभ्यस्स्वाहा ओम् हां सर्वेभ्यो गृहवास्तुदेवेभ्यस्स्वाहा इति
बलिं दद्यात्। सर्वाण्विसृजेत्।
यदि वा संक्षेपेणानेन बलिं दद्यात्।

ओम् हां

ये रुद्रा रौद्रकर्माणो रौद्रस्थान निवासिनः ।

सौम्याश्चैव तु ये केचित्सौम्यस्थाननिवासिनः ॥

मातरो रौद्ररूपाश्च गणानामधिपाश्च ये ।

विघ्नभूतास्तथा चान्ये दिग्विदिक्षु समाश्रिताः ॥

सर्वे सुप्रीतमनसः प्रतिगृह्ण?न्विमां बलिम् ।

सिद्धिञ्जुषन्तु नः क्षिप्रं भयेभ्यः पान्तु मां सदा ॥

इत्येवं बलिं दत्वा, बलिमन्त्रान् स्वहृदिविन्यसेत् ॥

(प्र) अथ नित्याग्निकार्यक्रममभिधाय अन्तर्बलिबहिर्बलि बलिं

p. 338)

जलमिश्रान्नेन स्वाहान्तेन दापयेत् । तथा

श्रीमज्ज्ञानरत्नावल्यां जलमिश्रान्नेन स्वाहान्तेन् रुद्रादिभ्यो

बलिं दत्वा इति । (मण्डलद्वयम्) इति । अत्र कुण्डस्य वह्निकोणे

मण्डलमेकं पश्चिमे मण्डलमेकं पूर्वे चतुरश्रं कुर्यात् ।

तथा श्रीरामनाथपद्धत्यां

मण्डलद्वितयं वह्निकोणे कृत्वाऽथ पश्चिमे ।

इन्द्रादीनर्चयेदष्टौ पूर्वे पूर्वादितः क्रमात् ॥

(२२९) इति । अन्तर्बलिदेवतापूजाक्रममाह (प्रथम) इति ।
बहिर्बलिदेवतापूजाविधिमाह (द्वितीय) इति । अत्र अन्तर्बहिर्बलिदेवता
रुद्रादयः शुद्धविद्यातत्वनिवासिनः ।
अशुद्धाध्वनिवासिनां पूजायामनुक्तत्वात् इति समीरितं
श्रीमन्मृगेन्द्रपद्धतिव्याख्याकारेण ।

p. 339)

रुद्रादिभ्यो बलिदानमन्तर्बलिः । इन्द्रादिभ्यो बलिदानं बहिर्बलिरिति
कथ्यते । तथा श्रीमन्मृगेन्द्रपद्धत्यां

विसृज्याग्निं स्मरन् कुण्ड पार्श्वे मण्डलकद्वये ।
अन्तर्बहिर्बलिं दद्यात् स्वाहान्तैर्नामभिर्हृदा ॥

इति । पवित्रविधौ वक्ष्यति च अन्तर्बलिभुग्भ्यो रुद्रादिभ्यश्च
बहिर्बलिंभुग्भ्य इन्द्रादिभ्यश्च इति ॥
वायसादिबलिमाह (बहिः) इति । (बहिः) मण्डलयोरुभयोर्बाह्ये ।
(वायसादिभ्यः) इति । आदिपदेन श्वभूतादयो गृह्यन्ते । तथा
श्रीमत्सिद्धान्तशेखरे

तान् विसृज्य विनिर्गत्य नहिर्गोमयमण्डले ।

श्वभूतपतितप्रेतकाकादिभ्यो बलिं क्षिपेत् ॥

इति । (अग्न्यादिभ्यः) इति ।

p. 340)

आदिपदेन सूर्यादिरुच्यते । तथा श्रीरामनाथपद्धत्यां

हृदा नमोन्तमग्न्यादिप्राक्पर्यन्तदिगष्टके ।
यजेदग्निं च सोम च सूर्यं चैव बृहस्पतिम् ॥
प्रजापतिं च देवांश्च सर्वान् विश्वांश्च नामभिः ।
अग्निं स्विष्टकृतं च इति । अथ पक्षान्तरेण संक्षेपबलिं अक् ।ईकरोति
(यदि वा) इति । (यदि वा) एवं नोचेत् । ये रुद्रा इत्यादि मन्त्रश्लोकार्थः
सुबोधः ॥

बल्यनन्तरविधिः ॥

(क्रि) (६२) ततः स्तोत्रचन्दनादिकं कृत्वा, सकलीकृत्य,
साघ्र्यजलहस्तशिशवान्तिकं गत्वा,

यत्कृतं यत् करिष्यामि तत्सर्वं सुकृतन्तव ।
विश्वगोप्ता त्वमेवात्र नान्यो नाथो मे शिवः ॥

इति विज्ञाप्य, स्वाहान्तमूलेन पूजाहोमादिकं

p. 241)

पुण्यफलं शिवस्य वरदहस्ते अर्घ्यजलेन सहोद्भवमुद्रया
भूमिष्ठजानुर्निवेदयेत् ॥ (६२)
(प्र) अथ तदनन्तरकरणीयान्याह (ततः) इत्यादिता (निवेदयेत्)
इत्यन्तेन । यत्कृतमित्यादिग्रन्थार्थः स्पष्टः । (पुण्यपलम्) इति ।
फलति निष्पद्यत इति फलम् ॥

(२३०)शिवपूजासमापनविधिः ॥

(क्रि) (६२) ततोऽष्टपुष्पिकया संपूज्य पञ्चमुखीं दर्शयित्वा
सद्यादिक्रमेण मूलेनाभ्यर्च्य, अर्घ्यं दत्वा अस्त्रादीशानान्तं
। पूजाप्रातिलोम्येनार्घ्यं दत्वा, काम्यमन्त्रान् स्वस्वावधौ
संयोज्य नाराचमुद्रयाऽस्त्रेण मन्त्रान् पुष्पक्षेपेण उत्थाप्य
संहृत्य दिव्यमुद्रया मूर्तिमन्त्रेण मूर्तौ संयोज्य,
मूलेनाभ्यर्च्यार्घ्यंयित्वाक्षमस्वेति ब्रूयात् ॥
यथा

p. 342)

स्वामिन् क्षुद्रेण दासेन मलीमशधिया मया। कदर्थितोऽसि

यद्भक्तिलेशात् प्रीतः क्षमस्व तत्॥ इति।

ततो दिग्बन्धनावकुण्ठनामृतीकरणानि विधाय, अभ्यर्च्य॥

(६२)

(प्र) अथ शिवपूजासमापनविधिं वर्णयति (ततः) इत्यादिना।

(अभ्यर्च्य) इत्यन्तेन। (अर्घ्यम्) इति। विसर्जनसमये सद्योजातादि

क्रमेण देयं पराङ्मुखार्घ्यमित्यर्थः। तथा श्रीमत्कामिके

पराङ्मुखं ततश्चार्घ्यं सद्योजाताच्छिवावधि।

अस्त्राद्धृदयपर्यन्तम् इति। अत्र पराङ्मुखार्घ्यो न विसर्जनार्थं

देयः। किन्तु इदमस्मदीयमर्चनमिति पूजायाः समाप्तौ

निरोधकत्वेन दद्यादिति भावः। तथा श्रीमन्मृगेन्द्रे

परोऽर्घ्यस्तेष्वियत्तायै पूजायां न विसृष्टये इति।

तथा

p. 343)

श्रीमत्कामिके चललिंगे तु सापेक्षं नापेक्षं स्थण्डिलादिषु।

विसर्जनन्तु सर्वत्र कार्यं प्रोक्तेन वर्त्मना॥ इति।

काम्यमन्त्राणां संयोजनं कुत्रे व्याशंक्याह (काम्य) इति।

(स्वस्वावधौ) इति। अत्र यावत्यध्वनि साध्यमन्त्राणां व्याप्तिः

तदन्ते तान् लीनान् भावयेत्। न तु तेषां परतत्वे लयः कार्यः इति

व्यपदिष्टं श्रीमन्मृगेन्द्रवृत्तिकारेण।

नाराचमुद्रालक्षणमुदाहृतं मुद्रालक्षणे अथ नाराचमुद्रा
अङ्गुष्ठाग्रद्वयस्थपुष्पयोस्तर्जनीद्वयक्षेपणात् सिद्धा पूजित
मन्त्रोत्थापनकरी भवति इति। (मन्त्रान्)
भोगस्थानस्थमन्त्रानित्यर्थः। तथा श्रीमन्मृगेन्द्रे

एवं व्यक्तादिलिंगेषु किन्तु संहृत्य तानणून्।
भोगस्थानस्थितान् मूर्तौ निदध्यान्नोपसंहरेत्॥

इति। (उत्थाप्य) इति। विद्युद्वदुत्थितान् ध्यात्वेत्यर्थः

p. 344)

तथा श्रीकालोत्तरे विद्युद्वदुत्थितान् ध्यात्वा स्वस्थानेषु लयं
नयेत् इति। दिव्यमुद्रालक्षणमुक्तं मुद्रालक्षणे दिव्यमुद्रा तु
अंगुष्ठानामाग्रगृहीतपुष्पद्वयेन देवस्य पूजासमाप्तौ
योव्याकारभ्रमणस्वरूपा स्यात् इति। आसनमन्त्रांस्तु
शिवासनमन्त्रेण पीठे संयोजयेत्। तथा श्रीमत्कामिके

संहारमुद्रयाऽस्त्रेण देवानावरणस्थितान्।
समस्तानर्पितान् देवांस्तान् लिंगे सह योजयेत्॥
आसनार्चितमन्त्रांस्तु पीठेनैव तु योजयेत्।

इति। ततः किं कुर्यादित्याह (क्षमस्व) इति। तत्कथनं
कथमित्याशंक्याह (यथा) इति। स्वामिन्नित्यादि श्लोकार्थः
सुबोधः। तदनन्तरकरणीयमाह (ततः) इति। अत्र यदि चललिङ्गं
तदा शिवमन्त्रं समुच्चरन् पद्मपीठाल्लिङ्गमादाय
विचित्रवस्त्रेण संवेष्ट्य पेटकमध्ये विन्यस्य भीमरुद्रं स्मरन्
रक्षां विज्ञाप्य पिधानं कुर्यात्।

p. 345)

तथा श्रीमदंशुमति शिवमन्त्रमनुस्मृत्य लिङ्गं संगृह्य
देशिकः।
चित्रवस्त्रेण संवेष्ट्य पेटिकामध्यमे न्यसेत्॥
अपिधानन्तु संयोज्य भीमरुद्रं समरेत् ततः। इति।

देशिकादिविसर्जनविधिः॥

(क्रि) (६३) स्वगुरुं विद्यापीठं गुरून्महालक्ष्मीं गणपतिं
द्वारस्थांश्चार्चयित्वा विसृजेत्॥ (६३)
(प्र) अथ निजदेशिकादीनां विसर्जनविधिमतिदिशति (स्व) इत्यादिना
(विसृजेत्) इत्यन्तेन। अत्र स्वगुरु विद्यापीठादि मन्त्रान् आत्मगतान्
कुर्यादिति बोध्यम्। तथा श्रीरामनाथपद्धत्यां
सामान्याघ्र्येण दत्वाघ्र्यं गुर्वादीनां पराङ्मुखम्।

संहारमुद्रयाऽत्मस्थं कृत्वा इति ।

p. 346)

चण्डेश्वरार्चनविधिः ॥

(क्रि) (६४) ऐशान्यां दिशि शुद्धभूतले ओं च चण्डासनाय
हुंफण्णमः ओं चण्डमूर्तये हुंफण्णमः इत्यभ्यर्च्य

रुद्राग्निप्रभवञ्चण्डं कज्जलाभं भयानकम् ।
शूलटंकधरं रौद्रं चतुर्वक्त्रञ्चतुर्भुजम् ॥
मुखोद्गीर्ण महाज्वालं रक्तद्वादशलोचनम् ।
जटामकुटकण्डेन्दु मण्डितं फणिकं कणम् ॥
व्यालयज्ञोपवीतञ्च साक्षसूत्रं कमण्डलुम् ।
श्वेतपद्मासनासीनं भक्तिप्रह्वार्तिनाशनम् ॥

(१३२)इति ध्यात्वा, ओम् हां चण्डनेत्रेभ्यो हुंफण्णमः इति
विन्यस्य ओं ध्वनिचण्डेश्वराय हुंफट् स्वाहा इत्यावाह्य, ओं
चण्डहृदयाय हुं फण्णमः ओं चण्डशिरसे हुंफण्णमः
ओं चण्डशिखायै हुंफण्णमः ओं चण्डकवचाय
हुंफण्णमः ओं चण्डास्त्राय हुंफण्णमः
इत्यङ्गैस्सकलीकृत्य पूजयेत् ।

p. 347)

यदि वा आसनमूर्तिमूलैः केवलमूलेन वाऽभ्यर्च्य,
अघ्र्यनैवेद्याद्युपाहृत्य, पूर्वस्थापितनिर्माल्यं
दत्वाऽघ्र्ययित्वा,

लेह्यशोष्यान्नपानादि तांबूलं स्रग्विलेपनम् ।
निर्माल्यभोजनन्तुभ्यं प्रदत्तन्तु शिवाज्ञया ॥

इति विज्ञाप्य, यथाशक्ति जप्त्वा निवेद्य,

सर्वमेतत् क्रियाकाण्डं मया चण्ड तवाज्ञया ।
न्यूनाधिकं कृतं मोहात् परिपूर्णन्तदस्तुमे ॥

इति विज्ञाप्य, पराङ्मुखार्घ्यं दत्वा, अंगानुत्याप्य, मूर्तौ
मूर्तिमन्त्रेण संयोज्य, पूरकालितमूलेन संहारमुद्रया
स्वहृदि विन्यसेत् ॥ (६४)
(प्र) अथ एवं शिवलिङ्गार्चनं यथावदभिधाय
तन्न्यूनाधिकं दोषनिवारणाय चण्डेश्वरस्यार्चनमाह
(ऐशान्याम्) इत्यादिना (विन्यसेत्) इत्यन्तेन ।

p. 348)

चण्डेश्वरध्यानमाह (रुद्र) इति । (रुद्राग्निप्रभवम्) रुद्राग्निः
रुद्रवह्निः । यद्वा रुद्रस्याग्निः क्रोधः चण्डं क्रोधाद्विनिर्गतम्
इति श्रुतेः । तस्मात् प्रभवः प्रकृष्टो भवो जन्म यस्य स तथोक्तः
तम् । एवमुक्तं श्रीमता सोमशंभुपद्धतिव्याख्याकारेण ।
सुगममन्यत् । चण्डासनमूर्तिमूलमन्त्राणामुद्धारः
प्रदर्शितः श्रीमत्कामिके

चण्डासनं चतुर्थ्यन्तं नत्यन्तमनुरासने ।
चण्डमूर्तिपदं दीप पूर्वं नत्यन्तमेव च ॥
चतुर्थ्यन्तमिदं मूर्ति मन्त्र इत्यभिधीयते ।
ध्वनिचण्डेश्वरायेति हुंफट् स्वाहापदेन च ॥
ओं चण्डपूर्वको हुंफट् नमोन्तस्त्याद्ध्रुवादिकः ।

इति । चण्डपूजाया विकल्पमाह (यदि वा) इति ।
निर्माल्यन्नाम परमेश्वरोपभुक्तं मन्त्रपुरस्सरं निरस्तं
माल्यमित्युच्यते ।

p. 349)

तथा

माल्यं निरस्तं निर्माल्यं न लिङ्गादावस्थितम् ।

नादत्तं संभवे पूर्वं न चामन्त्रबहिष्कृतम्॥

चण्डेश्वराय यद्दत्तं निरस्तं मन्त्रपूर्वकम्।

उपभुक्तं हि देवेन निर्माल्यं तत् प्रकीर्तितम्॥

इति। अर्घ्यं विशेषार्घ्यम्। चण्डेशस्य विशेषार्घ्यम् इति व्याहृतं श्रीमन्मृगेन्द्रपद्धति व्याख्याकारेण। विज्ञापन प्रकारमाह (लेह्य) इति। (लेह्यशोष्यान्नपानादि) लेह्यं च मध्वादि शोष्यञ्च नालिकेरोदकादि। अन्नञ्च भोज्यमित्यर्थः। पानञ्च पेयमित्यर्थः। लेह्यशोष्यान्नपानानि तानि आदीनि यस्य तत् तथोक्तम्। आदिपदेन भक्ष्यमुच्यते। तदुक्तं

भक्ष्य भोज्यं च पेयं च लेह्यं शोष्यं च पञ्चधा।

भक्ष्यं फलादिकं भोज्यमन्नं पेयं रसायनम्।

p. 350)

लेह्यं मध्वादि शोष्यन्तु नालिकेरोदकादिकम्।

इति। स्फुटमन्यत्। पुनरपि प्रार्थनान्तरमाह (सर्वम्) इति। (क्रियाकाण्डम्) शिवपूजाकर्मवर्गम्।

काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु इत्यमरः।

शेषं सुगमम्। चण्डेश्वर विसर्जन क्रममाह (पराङ्मुखम्) इति

। अत्र केचन आत्मार्थपूजायां चण्डेश्वर सपर्यां नेच्छन्ति।
तत्गतं न रोचते। शैवसिद्धान्ते सर्वदा सर्वत्र चण्डेश्वरः
पूजनीय एवेति नियमः। चण्डपूजानिषेधश्च वामदक्षिणतन्त्र
विषयः। तथा श्रीमत्कालोत्तरे

स्थिरे चले तथा रत्नमृद्वासै शैलकल्पिते।
लोहचित्रमये बाणे स्थितश्चण्डो नियामकः।
सिद्धान्तस्येतरे तन्त्रे न वामे न च दक्षिणे।

इति ॥

p. 351)

शिवादिविसर्जनविधिः ॥

(क्रि) (६५) ततः स्थण्डिले पूजितान् शिवादी नप्येवमेव विसर्जयेत् ॥
ततोऽर्घ्यपात्रस्थमन्त्रानुत्थाप्य, संहृत्य, हृत्कमले
विन्यस्य, निर्माल्यापनयनं कृत्वा, भूमिं गोमयेन संशोध्य,
प्रोक्षयेत् ॥ (६५)
(प्र) उक्तन्यायमन्यत्राप्यति दिशति (स्थण्डिले) इत्यादिना (विसर्जयेत्)
इत्यन्तेन ॥
अथ तदनन्तरकरणीयमाह (ततः) इत्यादिना (प्रोक्षयेत्)

इत्यन्तेन ॥

अघोरमन्त्रजपविधिः ॥

(क्रि) (६६) ततो धौतपादस्समाचम्य, शुद्धभस्मना स्नात्वा,
सकलीकृत्य, समस्तपूजा फललाभार्थमघोरमेकविंशतिवारं
जपेत् ॥
(२३४) इति परमेश्वरापरनामधेय श्रीमदघोरशिवाचार्य
विरचितायां

p. 352)

क्रियाक्रमद्योतिकायां शिवपूजाविधिस्समाप्तः ॥ (६६)
(प्र) अथ समस्तन्यूनातिरिक्तदोषशान्त्यर्थं
पूजाफललाभार्थञ्चाघोरं जपेदित्याह (ततः) इत्यादिना (जपेत्)
इत्यन्तेन ॥

कपिलार्चनाविधिः ॥

(क्रि) (६७) ततः कपिलां संपूज्य, अमृतमथनोत्पन्ने सुरभे
लोकधारिणि ।
इमं ग्रासं गृहाण त्वमिदं मे व्रतमुत्तमम् ॥

इति ग्रासं दत्वा ॥ (६७)

(प्र) अथ कपिलार्चनाविधिः (ततः) इत्यादि (दत्वा) इत्यन्तम्। (कपिलां संपूज्य) इति। अत्र ओं कपिले नन्दे नमः ओं कपिले भद्रे नमः ओं कपीले सुशीले नमः ओं कपिले सुरभे नमः ओं कपिले सुमनसे नमः इत्यर्चयेत्।

p. 353)

तथा श्रीरामनाथपद्धत्यां

कपिलां कपिलापूर्वैर्जैन्नन्दादिनामभिः।
यथा सतारं कपिले नन्दे नम इति ब्रुवन्॥
भद्रां सुशीलां सुरभिं तथा सुमनसामपि।

इति। ग्रासप्रदानमन्त्रमाचष्टे (अमृत) इति। (ग्रासम्) कबलम्।
ग्रासन्तु कबलार्थतः इत्यमरः। शेष सुबोधम्॥

शिवसंहिताध्ययनविधिः॥

(क्रि) (६८) मध्याह्नसमयं यावत् स्वाध्यायादिकं कृत्वा,

(प्र) अथ अहन्यहनि योऽधीते विधिस्थश्शिवसंहिताम्।
स हन्ति सर्वपापानि तामिस्रमिवभास्करः॥

इति श्रुतेः शिवसंहितां प्रत्यहं समधीयीतेत्यभिधत्ते

(मध्याह्न) इत्यादिना (कृत्वा) इत्यन्तेन । (स्वाध्यायादिकम्) इति ।

p. 354)

अत्र स्वाध्यायः संहितास्वन्यतममीप्सितं शिवशास्त्रमित्यर्थः ।

आदिपदेन पुराणाद्यनुसन्धेयम् । (कृत्वा) इति । अधीतेत्यर्थः । तथा

श्रीमन्मतङ्गवृत्तिकारेण लिखितं

मन्त्राणामेव जपतस्स्वाध्यायाध्ययनात्तथा ।

दुष्कृतेभ्यो विमुच्यन्ते कर्मणस्सुकृतादपि ॥

इति । तथा श्रीमन्मृगेन्द्रपद्धत्यां कुर्यात् स्वाध्यायमीप्सितम् इति ।

कुर्यात् अधीतेत्यर्थः । एवमुदितं तद्व्याख्याने ॥

(२३५)अत्र शिवागमाध्ययने शिवदीक्षितानां

चतुर्वर्णानामधिकार इत्येवधेयम् । तथा श्रीमत्सिधान्तबोधे

आगमान्ताख्यसिद्धान्तः पुराणं शूद्रवर्णिनाम् ।

शूद्राणां वृत्तयो वाच्याश्श्रुत्युक्तैरागमार्थकैः ॥

इति । तथा श्रीमत्किरणे यदवाप्य नरास्सर्वे इति ।

तथा चाह

p. 355)

भगवान् नीलकण्ठाचार्यः पत्युरसामञ्जस्यात् इत्यत्र वयन्तु वेदागमशैवागमयोर्विशेषं न पश्यामः इति । यदि सर्वात्मना सिद्धान्तशैवागमवेदयोरभेदः किमर्थन्तर्ह्युभयोर्निर्माणमिति चेन्न । अस्तीयाननयोर्भेदः वेदस्त्रैवर्णिकाधिकारः । आगमश्चातुर्वर्ण्याधिकार इति । एतदप्युक्तं श्रीकण्ठभाष्ये वेदस्त्रैवर्णिक विषयः सर्वविषयश्चान्यः इति ।
शिवागमाध्ययन क्रमः श्रीमत्कामिकादिषु बहुशः प्रकाशितः विस्तरभयान्नेह प्रतन्यते ॥

माध्याह्निकविधिः ॥

(क्रि) (६९) मध्याह्नसमयेऽपि पूर्ववत् स्नानसन्ध्या शिवार्चनादि कुर्यात् ॥
यद्वा पूर्वार्चिते तत्काले वा त्रिकालसंख्ययाऽष्टपुष्पिकया संपूजयेत् ॥ (६९)

p. 356)

(प्र) अथ माध्याह्निकविधिः (मध्याह्न) इत्यादि (संपूजयेत्) इत्यन्तम् । मध्याह्नसमयनिर्णयः पूर्वं ध्यायेन्माध्यन्दिने

देवीम् इत्यत्र स्फुटीकृतः ॥

सान्तानिकभिक्षाभोजनविधिः ॥

(क्रि) (७०) पश्चात् सुलिप्तं भोजनस्थानं कृत्वा, गोमयकल्पिते
भस्मना चतुस्त्रिद्वयेकरेखया परिष्कृते यथाक्रमं
देशिकादयः प्राग्दक्षिणपश्चिमोत्तरास्या वा स्वातन्त्र्येण सर्वे
प्रागास्या वा सवर्णैस्संस्कृतैः
पंक्तिपावनैरेकपंक्तयोपविष्टास्सभवे
सुवर्णरजतताम्रलोहपात्रेषु नभावे सप्तधा भस्म शोधिते
अघोरेण सप्तधाऽभिमन्त्रिते कांस्यपात्रे वा अभिषिद्धेषु
कदल्यादिपत्रेषु वा अश्नीयुः। जानुमद्धयकरो

p. 357)

बंद्धवीरासनो वा भोजनानुपयुक्तां वार्तां वर्जयेत्।
पात्रलग्नवामकरो भुञ्जीत ॥
ततः पात्रदत्तमन्नमस्त्रेण प्रोक्ष्य, वौषडन्तमृत्युञ्जय
मन्त्रेण सप्तधाऽभिमन्त्र्य, यथाशक्ति पृथक्पात्रेषु शिवादिभ्यो
निवेद्य अंभसा परिषिच्य, किञ्चिदन्नं भूमौ निक्षिप्य,
दक्षिणहस्तेन कनिष्ठांगुलिपातितजलेन ओम्
नागकूर्मकृकरदेवदत्त धनञ्जयेभ्य

उपप्राणवायुभ्यस्स्वाहा इति मन्त्रेण

भूमिष्ठमन्नन्नागादिभ्यो निवेद्य, शिष्टञ्जलं

अमृतोपस्तरणमसि इति प्राश्य, यद्वा ईशानेन परिषिच्य, पुरुषेण

प्राश्य, अस्त्रेण औदर्यं अनलं ज्वलितं ध्यात्वा, ओम् प्राणाय

स्वाहा ओम् अपानाय स्वाहा ओम् समानाय स्वाहा

p. 358)

ओम् ददानाय स्वाहा ओम् व्यानाय स्वाहा एवं भूमिसंस्थेन

पात्रेण प्राणाहुतीर्हुत्वा, यथेष्टं भुञ्जीत ॥

तत्रान्तरे मक्षिकानखकेशादि वृष्टञ्चेदल्पमन्नन्त्यत्त्वा,

हस्तं प्रक्षाल्य, स्पृष्ट्वा भस्म भुञ्जीत ।

लशुनपलाण्डुगृञ्जनालाबुकशंबूकमत्स्यमांससैन्धवोद्भ

वलवणहस्तदत्तलवणादीनि सामान्यशास्त्रनिषिद्धानि च वर्जयेत् ।

भुञ्जानो लवणाज्ये नाददीत । अन्नस्योर्ध्वं पानीयन्न पिबेत् ।

व्यावृतवक्त्रो वा पीतशेषञ्च न पिबेत् । नान्त्यजातिं विलोकयेत् ।

परिमितं भुक्त्वा, अन्ते अप्रक्षालित पाणिना अमृतापिधानमसि इति

जलन्तत्पुरुषेण वा प्राश्य, हस्तादिकं प्रक्षाल्याचम्य,

स्वदक्षिणमुष्टिस्थांगुष्ठच्युत

p. 359)

तोयेन दक्षिणपादांगुष्ठं ओम् हां कालाग्निरुद्राय स्वाहा

यद्वा ओम् हां आत्मतत्वाय स्वाहा इति सिञ्चेत्। ततः भस्मना
विशुद्धस्सकलीकृत्य, परिधामुद्रामाबद्ध्य,
वामदेवन्नवधाऽवर्त्य, तांबूलादिना मुखं संशोधयेत्।
अन्यगृहभोजने अन्नस्याग्रतः शिवगायत्रीजपपूर्वं भुञ्जीत॥
(७०)
(प्र) अथ माध्याह्निकविधिमुदीर्य शरीरस्थित्यर्थं
देशिकादीनां शैवानां सान्तानिकभिक्षाभोजनविधिं ब्रूते
(पश्चात्) इत्यादिना (भुञ्जीत) इत्यन्तेन। आचार्यादयः कीदृशे
अवकाशे किंविधाः कैस्सह कस्मिन् भाजने
भोजयेयुरित्याशंक्याह (गोमयकल्पिते) इति। करमान
गोमयकृतचतुरश्रमण्डले इत्यर्थः। तथा श्रीमत्षट्सहस्रे
हस्तमात्रन्तु वेदाश्रम् इति।

p. 360)

चतुस्त्रिद्वयेकरेखाकं गुर्वादिसमयान्तकम् इति श्रीमत्किरण
श्रुतेराचार्यादिसमय्यन्तानां चतुर्णां यथाक्रमं
चतुरादिरेखालंकृत मण्डलमित्याह (चतुस्त्रिद्वयेकरेखया) इति।
(देशिकादयः) देशिकसाधकपुत्रसमयिनः। (सवर्णैः) समानो
वर्णो येषान्ते सवर्णाः एकवर्णा इत्यर्थः तैः। (संस्वृतैः)
दीक्षासंस्कारसंपन्नैः। तथा नादीक्षितेन वसतिं कुर्यात्
पंक्तौ च भोजनम् इति। (पंक्तिपावनैः) पंक्तिं पवित्रीकुर्वाणैः

। अत्र संहेति शेषः। (संभवे) द्रव्यसंपत्तौ।

(स्वर्णरजतताम्रलोहपात्रेषु) अत्र गुरुप्रभृतेः यथाक्रमं

स्वर्णादिपात्रम्। तथा श्रीमत्किरणे

भाजनं यद्गुरोर्हैमं रौप्यं स्यात् साधकस्य तु।

ताम्रकं पुत्रकस्योक्तं लोहजं समयार्थिनाम्॥

p. 361)

इति। (अभावे) आचार्यादिक्रमोक्तसौवर्णादिपात्राणां विरहे।

(कदल्यादिपत्रेषु) रंभापद्मादिपत्रेषु। तथा

श्रीमन्मृगेन्द्रपद्धत्यां

पलाशकदली चूतपद्मिन्यादिदलोषु वा।

अनिषिद्धेष्वमिश्रेषु तदूर्ध्वग्रथितेषु च॥

इति। अस्वत्थादिवर्णानि निषिद्धानि। तथा श्रीमज्ज्ञानरत्नावल्यां

अश्वत्थैरण्डभल्लातैर्न्यग्रोधार्क विभीतकैः।

शाकोदुंबरसज्जाद्यैर्न स्याद्भोजनभाजनम्॥

इति। (अश्नीयु) आशनः विदध्युः। कथं भुञ्जीत इत्याह (जानु) इति।

(बद्धवीरासनः) इति । एतल्लक्षणमुदितं श्रीमत्सुप्रभेदे

द्विर्भुजापतीतं वामपादं दक्षिणतोपरि ।
स्थितं वीरासनं प्रोक्तं भुक्तकाले विशेषतः ॥

इति । भोजनानुपयुक्तवार्तां वर्जयन्नित्येतदाचार्य व्यतिरिक्तविषयम्
।

p. 362)

तथा श्रीमत्किरणे

मौनमास्थाय भोक्तव्यं साधकादित्रयेण तु ।
भोक्तव्यं प्रभुणा यद्वदाचार्येण यथेच्छया ॥ इति ॥

किं कृत्वा भुञ्जीतेत्याह (ततः) इति । (ततः)
एवमवस्थानानन्तरम् । मृत्युञ्जयमन्त्रोद्धारः प्रदर्शितः
श्रीमत्कामिके ओम् जुं स इति मन्त्रोऽयमेव मृत्युञ्जिदाह्वयः इति ।
(शिवादिभ्यः) शिवाग्निगुरुभ्यः । शिवादित्रयनिवेदनस्य
फलमुपवर्णितं श्रीमच्छिवधर्मोत्तरे

कृषिवार्द्धष्यवाणिज्यक्रोधासत्यार्जनादिभिः ।

पुंसा पापानि वर्द्धन्ते सूनादोषैश्च पंचभिः ।

संमार्जनाञ्जनं तोयमग्निमन्थनपेषणे ।

सूनाः पञ्च गृहस्थानां नित्यं पापाभिवृद्धये ॥

शिवाग्निगुरुपूजाभिः पापैरेतैर्न लिप्यते । इति ।

p. 363)

अत्र स्वेष्टलिंगादिनिवेदनावशिष्टं भुंजीयात् । न तु तन्निवेदितमिति

तात्पर्यम् । अत एवात्र यथाशक्ति पृथक्पात्रेषु इत्युक्तम् ।

तथा चाह श्रीमान् सोमशंभुपद्धतिव्याख्याकारः अनिवेद्य न

भुंजीत इत्यत्र स्वेष्टलिंगाग्निगुर्वधिकरणाय

शिवायेत्यध्याहर्तव्यं तन्निवेदनावशिष्टमेव

भुंजीतेत्याशयः इति । (किञ्चिदन्नम्) इति । अनेन

ग्रासार्द्धमात्रमुपलक्ष्यते । तथा श्रीमदंशुमति

आत्मनस्सव्यभागे तु गोमयालिप्तमण्डले ।

भूमौ ग्रासार्द्धमात्रन्तु नागादिभ्यो निवेदयेत् ॥

इति । बलिं क्षिपेदिति । (औदर्यम्) जाठरम् । (तस्मिन्) उदरोतितानले ।

अत्र प्राणाद्याहुतिभिरात्मप्रभृतयस्तृप्ता भवन्ति इत्यवसेयम् ॥

p. 364)

तथा श्रीमज्ज्ञानरत्नावल्यां

आत्मा प्राणेस्थितोऽपाने संस्थिता भूतयोनयः ।
उदाने संस्थिता देवास्समाने पितरस्तथा ॥
व्याने व्यवस्थिता नागास्तथा पातालवासिनः ।
अंगुष्ठमध्यानामाग्रैर्दक्षहस्तस्रुताग्रगैः ॥
आस्यकुण्डान्तरस्थाग्निज्वाला मध्ये व्यवस्थिताः ।
एकैकाहुतिभिर्दन्तानस्पृशस्तर्पयेदिमान् ॥
घृतव्यञ्जनसंमिश्रं शेषमीशायं होमयेत् ।

इति । यदि भोजनभाजनस्थौदने नखादिपरिदृष्टं तदा किं
कुर्यादित्याह (तत्र) इति । (तत्रान्तरे) तस्मिन् भोजनावसरे । (केशादि) इति ।
आदिपदेन तुषादि निगद्यते । तथा श्रीमत्कालोत्तरे

भोजने तु तुष केशं चीरांगारनखाव्यपि ।
सरीसृपाणि सर्वाणि अन्ने मत्कुणमक्षिकाः ॥
यूका भ्रमरदंशाश्च क्षेपाच्छुद्ध्यन्ति भस्मनः । इति ॥

p. 365)

अभोज्यानि वस्तून्यत्र कानीति बुभुत्सायामाह (लशुन) इति ।
(लशुनपलाण्डुगृञ्जनालाबुकमत्स्यमांससैन्धव

लवणहस्तदत्तलवणादि) लशुनं च श्वेतनालं पलण्डुश्च

सुकन्दकः पलण्डुस्तु सुकन्दकः इत्यमरः।

गृञ्जनञ्च रक्तनालं गृञ्जनारिष्टमहाकन्दरसोनकाः

इत्यमरः। अलाबुकञ्च तुंवरफलं शंबूकश्च जलशुक्तिः

मत्स्यश्च मांसं च सैन्धवलवणं च हस्तदत्तलवणं च

तथोक्तानि तानि आदयः यस्य तत् तथोक्तम्। आदिपदेन

बिम्बोदुंबरफलादि निगद्यते। तथा श्रीमच्चिन्त्यविश्वे

उदुबरञ्चालाबुश्च सौवीरञ्च कुमारिका।

वृन्ताकं कतकञ्चैव च्छत्राकं बिम्बिका तथा।

इति। (सामान्यशास्त्रनिषिद्धानि)

p. 366)

सामान्यशास्त्राणि वेदस्मृतादीनि तैर्निविद्धानि अविहितानि। अत्र

वेदादेरपि धर्मोपदेशे सामान्यशास्त्रत्वेनाभ्युपगमः इति

भावः। तथा श्रीमोहशूरोत्तरे वेदस्मृतिपुराणाद्या आगमा

धर्मदर्शकाः इति। सामान्यं च विशेषं च शैवं वैशेषिकं

वचः इति। तथा च श्रीमत्स्वायंभुवे

धर्मसाधनसंविति सम्नायादेव जायते।

तन्मूलत्वात् स्मृतेश्चापि ताभ्यामेवापरस्य तु ॥ इति ।

तानि च यथा

शिरः कपालमात्राणि नखचर्मतिलांस्तथा ।
एतानि क्रमशो नित्यमष्टम्यादिषु वर्जयेत् ॥
एतद्वचनार्थे बृहस्पतिः

पक्षद्वयेपि चाष्टम्यां नालिकेरन्न भक्षयेत् ।
नवम्याञ्च त्यजेल्लाबुं धूम्रालाबुञ्च वर्तुलम् ॥
भोजने वर्जयेन्नित्यं पटोलं दशमी दिने ।
एकादश्यां च निष्पावं द्वादश्यां सर्षपं त्यजेत् ॥

p. 367)

त्रयोदश्यां निषेधेन भक्षयेन्न तिलान् द्विधा ।

इति । इतः परं विस्तरभयान्न लिख्यते ।
भुञ्जान इति निर्देशात् भुक्तेः पूर्वमेव लवणान्ये गृहीतव्ये इति
दर्शयति । (नाददीत) न गृह्णीयात् । (अन्नस्योर्ध्वं पानीयं न
पिबेत्) इति । अनेन भोजनावसाने पिबेदिति निर्दिश्यते । तथा
श्रीमदाग्नेयपुराणे

किंचिदूनं ततो भुक्त्वा भोजनान्ते द्रवोदकम्।
पिबेत् स लवणं तक्रमातृप्तेस्स्वस्तिमान् भवेत्॥

इति। (व्यावृतवक्त्रः) व्यावृतं विदारितं वक्त्रं येन सः तथोक्तः।
(अन्त्यजातिम्) नटकैवर्तादिजातिम्। तथा

रजकश्चर्मकारश्च नटो वरट एव च।
कैवर्तो मेदभिल्लौ च सप्तधा चान्त्यजास्स्मृताः॥

इति। भोजनानन्तरकरणीयमाह (अन्ते) इति।

p. 368)

आत्मा वै दक्षिणे पादे परात् परतरो विभुः।
तमहमभिषिंचामि योऽङ्गुष्ठाग्रे व्यवस्थितः॥

इति वचनं मनसि निधाय पक्षान्तरमाह (यद्वा) इति। ततः किं
कुर्यादित्याह (ततः) इति। परिघामुद्रालक्षणमुक्तं
श्रीमदंशुमति

आरोप्य वामहस्तस्य कनिष्ठां नाभिमण्डले।

तामेव दक्षहस्तस्य वामांगुष्ठेन योजयेत् ।
विततौ च करौ कृत्वा दक्षांगुष्ठे न्यसेन्मुखे ।
परिघेयं समाख्याता दुष्टाहारविनाशिनी ॥

इति । (आवर्त्य) इति । नाभिस्पर्शनपूर्वं जस्त्वेत्यर्थः ।
ननु परान्नं किमश्नीयान्न वेत्याशंक्य प्रायश्चित्तजपपूर्वं
भुञ्जीतेत्याह (अन्य) इति ॥

तपस्विनां समाधिविधिः ॥

(क्रि) ७२) विरक्तस्तु

p. 369)

अथ माद्ध्यन्दिनं यावत् समाधिस्थो भवेद्यथा ।

ज्ञानज्योतिर्मयं लिङ्गं शरच्चन्द्रवदुज्वलम् ॥
भ्रूमद्ध्ये संस्थितं तत्र मनः प्राणं च योजयेत् ।
तल्लीन्स्तन्मयो योगी चित्तं शून्यं नयेत्त्घनैः ॥
नष्टे चित्ते चिदानन्दं स्वयमुद्योतते परम् ।
समाधिः कथितो ह्येवमणिमादिगुणालयः ॥
इति ॥ (७२)

(प्र)अथ सान्तानिकभोजनविधिमुपवर्ण्य तपस्विनां

यावन्माध्याह्निकं तावत् किं करणीयमित्याकांक्षायामाह

(अथ) इत्यादिना (इति) इत्यन्तेन। समाधिकरणप्रकारमाह (ज्ञान) इति।

श्लोकार्थः स्पष्टः॥

भिक्षाटनविधिः॥

(क्रि) (७२) अनन्तरं माध्यन्दिनं कृत्वा, यथाविधि भिक्षाटयित्वा,

भुञ्जीत।

p. 370)

भिक्षाभोजननियतः क्वचिदप्येकान्नन्न भुञ्जीत।

प्रार्थनादिक्लिष्टान्निरोधाख्यान्नाददीत।

सान्तानिकायाचितमाधूकरीभ्यो माधूकरी श्रेष्ठा। सापि

कणान्नभिक्षाख्या द्विविधा। तत्र कणभिक्षा तु पूर्वाह्न एव

कार्या। द्वितीया तु द्वितीयसवनावसाने॥ अथ तद्विधिः।

स्वयं भस्मना स्नातः तत्रपरिवर्तितकौपीनोत्तरीयस्समाचान्तो

न्यस्तमन्त्रदेहस्ताम्रादिजनितं ब्रह्मवृक्षांदिपत्रकृतपात्रं

वाऽस्त्र प्रक्षालितञ्चतुस्संस्कारसंस्कृतं अघोरेण

सप्तधाऽभिमन्त्रितं कवचेनाभिमन्त्रितं वस्त्रावकुण्ठितं

दक्षिणकरे गृहीत्वा, अस्त्रेण सप्तधाऽभिमन्त्रितमात्मसमं

दण्डं वामकरेण सच्छत्रं वा गृहीत्वा, सोपानत्कः शिवं
गुरुं ध्यात्वा, विज्ञाप्य, सन्निहितश्चेदाज्ञां

p. 371)

समादाय, गृहीताविरुद्धमौनः पतितनापिताभीशस्तकारु
गर्हितब्रह्मदेवस्वोपजीविलीलावधूगृहवर्जं शुद्धगृहेषु
भिक्षामन्त्रं जपन्नरेत्। तत्र
प्रणामनिष्ठीवस्पर्शोन्मार्गसपर्णकुत्सनकोप विवादानि न
कुर्वीत। भिक्षार्थं गृहं प्रविश्य, भिक्षां देहीत्भुक्त्वा,
स्वपादांगुष्ठाग्रं पश्यन् सन् रावत्सगोप्रस्त्रवकालावधि
स्थित्वा, गृहान्तरं प्रविशेत्। व्रजन्नाहूतः पुनर्नागच्छेत्। तत्रैव
भिक्षां हरतकांस्याद्यडूषितामाहरेत्। भिक्षां चरतो
भिक्षान्नादतीत। एवं पर्याप्तां भिक्षामटित्वा, जगतः शुभं
स्मरन् मठं गत्वा॥
(प्र) अथ समाधिकरणात् परं किं कुर्यादित्याह (अनन्तरम्)
इत्यादिना (भुञ्जीत) इत्यन्तेन।

अथ भिक्षाटनविधिं वक्ष्ये निवर्त्यं यतिभिर्यथा।

p. 372)

तथा ते संप्रवक्ष्यामि शृणु विप्रेश्वरेश्वर॥

कर्तव्यमखिलं कृत्वा प्रत्यवस्थे तु दिवाकरे

इति श्रीमन्मतंगश्रुतेः मध्याह्नेपि स्नानसन्ध्यापूजादि

कुर्यादित्याह (माध्यन्दिनम्) इति। मध्यन्दिने भवं माध्यन्दिनम्

। ननु भिक्षाशी एकान्नं किमश्नीयादित्याशङ्क्यनेत्याह (भिक्षा)

इति। (भिक्षाभोजन नियतः) इति। भुज्यते भूतैरद्यत इति भोजनमन्नम्

। भिक्षान्न नियम इत्यर्थः। (क्वचिदपि) कुत्राप्युक्तमकुल इत्यर्थः।

तथा

माधूकरीञ्चरेद्वृतिमतिम्लेच्छकुलादपि।

एकान्नं तु न भुंजीत बृहस्पति कुलादपि॥

इति। अत्र कादापित्कमेकान्नभोजनमनुमतं न तु सदा।

तदुक्तं श्रीमत्सोमशंभुचरणैः सदैकान्नं तु वर्जयेत् इति।

ननु यदि परेण प्रार्थितं तर्हि किमेकस्मात्

p. 373)

गृह्णीयादित्याशंक्य नेत्याह (प्रार्थना) इति।

(प्रार्थनादिक्लिष्टाम्) इति। अत्र स्वात्मना वा परेण वा प्रवृत्तं

बलमादिशब्दार्थः। तथा श्रीमत्पौष्करे स्वात्मना वा परेण वा

इति। (विरोधाख्याम्) निग्रहाभिधानाम्। निग्रहस्तु निरोधस्स्यात्

इत्यमरः। निरोधभिक्षा अध मेत्याकूतमत्र। तदुक्तं
श्रीमत्सोमशंभुचरणैः

एताभ्यस्त्वपरांभिक्षां प्रार्थनाद्युपरोधतः।
साध्यां भिक्षां निरोधाख्यामधमां परिवर्जयेत्॥

इति। सान्तानिकादि भिक्षासु का मुख्यभिक्षेति जिज्ञासायामाह
(सान्तानिक) इति। (सन्तानिक्रायाचितमाधुकरीभ्यः। सान्तानिका च
शिष्यादिसन्तानभवभिक्षा। तथा
श्रीमद्ब्रह्मशंभुपद्धत्यां

शिष्यादिसन्तेतिश्शैवे सन्तानं तन्निवेदितम्।
द्रव्यं यद्मुखे सा हि भिक्षा सान्तानिकी स्मृता॥

p. 374)

इति। अयाचिता च अप्रार्थितभिक्षा। एतल्लक्षणमुक्तं
श्रीमत्सोमशंभुचरणैः

आनीयायावमानाय श्रद्धया यत् प्रदीयते।
अन्नादिभूमिपर्यन्तं सा भिक्षा स्यादयाचिता॥

इति । अयाचितपदेनात्र श्रीमत्पौष्कराद्युक्ता स्वयं दत्ताख्या
भिक्षा चोपलक्षिता । तथोक्तं श्रीमत्पौष्करे

भैक्षं चतुर्विधं प्रोक्तं साधूनां हि महात्मनाम् ।
माधूकरं स्वयं दत्तं सान्तानिकमयान्वितम् ॥

इति । माधूकरी च एतल्लक्षणमुक्तं तत्रैव गृहाद्गृहे पर्यप्तो
भैक्षं माधूकरं स्मृतम् इति । सान्तानिकायातितमाधूकर्यः
ताभ्यः । तत्र माधूकरी भिक्षां विभजति (सापि) इति । केन
प्रकारेण द्वैविध्यमित्याह (कणान्नभिक्षाख्या) इति ।
कणशब्देनात्र तण्डुलान्युच्यन्ते । तद्भिक्षाकालमाह (तत्र) इति ।
(तत्र) तयोः । (पूर्वाह एव) इति ।

p. 375)

एतल्लक्षणमुक्तं श्रीमत्सूक्ष्मे
आतपोदयमारभ्य आभूतद्वयंनाडिका ।
पूर्वाह्न इति विज्ञेयः इति । (द्वितीया) अन्नभिक्षेत्यर्थः ।
सा कदा ग्राह्येत्याकांक्षायामाह (द्वितीय) इति ।
(द्वितीयसवनावसाने) द्वितीयसवनं माध्याह्निकस्नानादि तस्य
अवसानं समापनं तस्मिन् । तथा श्रीमृगेन्द्रे
माधूकरीञ्चरेद्भिक्षां दिनेऽर्द्धे सवने गते इति ॥

अथ यथाविधि भिक्षामटित्वा भुञ्जितेत्युक्तं तत् कथमिति

बुभुत्सायां तद्विधिं ब्रूते (अथ) इत्यादिना (गत्वा) इत्यन्तेन।

(तद्विधिः) तस्याः माधूकर्याः विधिः। उच्यत इति शेषः। तत्र तावत्

भिक्षुः किं लक्षणो भिक्षामभ्याददी तेत्याकांक्षायामाह

(स्वयं भस्मना स्नातः) इत्यादि। (परिवर्तितकौपीनोत्तरीयः)

परिवर्तिते विनिमयिते कौपीनोत्तरीये येन स तथोक्तः।

p. 376)

पुरा विधृतं कौपीनं उत्तरीयञ्च विसृज्य

धारितकौपीनोत्तरीयान्तर इत्यर्थः। तदुक्तं

श्रीमत्सोमशंभुचरणैः विशुद्धभस्मना स्नातः

कौपीनञ्चोत्तरीयकम्। परिवर्त्य समाचम्य इति। (समाचान्तः)

सम्यक् कृताचमन इत्यर्थः। कस्मिन् पात्रे भिक्षामाददीतेत्याह

(ताम्र) इति। (ताम्रादि हानितम्) इति। अत्र लोहादिरादिशब्दार्थः।

(ब्रह्मवृक्षादिपत्रकृतपात्रम्)

पलाशरसालप्रभृतिपर्णविरचितभाजनम्। तथा श्रीमत्कालोत्तरे

पलाशमधुपत्रैश्च कदंबाम्रादिपत्रकैः।

वर्जयेच्च वटाश्वत्थ पिशाचाक्षादिकेसरम्॥

इति। पात्रलक्षणमुक्तं श्रीमत्किरणे

भिक्षापात्रं तदावश्यं ताम्रं लोहमथापि वा ।

तदष्टाङ्गुलकोच्छ्रायं द्वादशांगुलविस्तृतम् ।

इति । (आत्म समम्) स्वप्रमाणम् ।

p. 377)

तथा किरणे

हृदा प्रक्षाल्य तोयेन दण्डं गृह्यात्मसंमितम् इति ।

(सोपानत्कः) उपानहा पादुकया सह वर्तत इति । पादूरुपानत्

इत्यमरः । ननु माधूकरीञ्चरेद्वृत्तिमतिम्लेच्छकुलादपि इति

श्रुतेः माधूकरी भिक्षायै सर्वेषां भवनं किं

मायादित्याशंक्य नेत्याह (पतित) इति । (पतितनापिताभिशस्त-

कारुगर्हितब्रहदेवस्वोपजीविलीलावधूगृहवर्जम्) पतितश्च

स्वाश्रंमाचारात् परिभ्रष्टः । तथा श्रीमद्बृहन्नारदीये

भ्रष्टो यस्स्वाश्रमाचारात् पतितस्सोऽभिधीयते इति । नापितश्च

प्रसिद्धः । अभिशस्तश्च ग्रामणीकः । एवं निर्णीतं

श्रीमत्सर्वज्ञानोत्तर वृत्तिकारेण । कारुश्च शिल्पी । गर्हितश्च

निन्दितः । ब्रह्मदेवस्वोपजीवी च

p. 378)

ब्राह्मण देवता द्रव्योपभोक्ता। लीलावधूश्च

परिहासक्रीडालापप्रणयकुशलवनिता। तथा श्रीमन्मृगेन्द्रे

परिहासादि चतुरा यत्र नार्यस्तथोपि च। भिक्षाचारान्न गृह्णीयात् इति

। पतितनापिताभिशस्त कारुगर्हितब्रह्मदेवस्थोपजीविलीलावध्वः

तासां गृहाणि तैर्वर्जं यथा तथा। पुनः केषु गृहेषु

भिक्षाटेदित्याह (शुद्धगृहेषु) इति। शुद्धाः सदाचारवन्तो

विप्रादयश्चत्वारो वर्णाः तेषां गृहाणि तेषु। तथा

श्रीमत्सोमशंभुपद्धतौ

ब्रह्मक्षत्रविशां भिक्षामभिशस्तादिवर्जिताम्।

अमद्यपास्तु ये शूद्राः शौचाचार समन्विताः॥

तेषामेव परेद्भिक्षां नान्येषां तु कदाचन।

इति। (अटेत्) चरेत्।

p. 379)

भिक्षाटनसमये किं न करणीयमित्याह (तत्र) इति। (तत्र)

भिक्षाटने।

(प्रणामनिष्ठीवस्पर्शोन्मार्गसपर्णकुत्सनकोपविवादानि)

प्रणामश्च नमस्कारः निष्ठीवश्च आस्य जलोद्गिरणं स्पर्शश्च

यस्य कस्यापि स्पर्शनं उन्मार्गसपर्णं च अपथगमनं

कुत्सनं च निन्दा कोपश्चक्रोधः। भिक्षामलब्ध्वा तदर्थं वा
विधृतस्सन्नकुप्येत्। न च मार्गेषु ये प्रधावन्तो जनास्तेष्वन्येषु
वा अप्रियवादिषु कोपं कुर्यादित्यवधेयम्। तथा श्रीमन्मृगेन्द्रे
भिक्षामलब्ध्वानो कोपं कुर्यान्नो विधृतश्चिरम् इति।
विवादश्च व्यवहारः विवादो व्यवहारस्स्यात् इत्यमरः। तानि।
सामान्ये नपुंसकलिङ्गनिर्देशः। (न कुर्वीत) (न कुर्यात्।
गृहेषु किं विधः कियत्कालं

p. 380)

वा तिष्ठेदित्याह (भिक्षार्थम्) इति। (सतत्सगोप्रस्नवकालावधि) अत्र
धेनुर्वत्सयोगेन यावत्कालं प्रस्नवं समवाप्नोति तावत्कालं
प्रतीक्षेत इति तात्पर्यार्थः। तथा समभिहितं
श्रीमत्सोमशंभुचरणैः

तावत्कालं प्रतीक्षेत यावद्गौर्वत्सयोगतः।
प्रस्नवं समवाप्नोति ततोऽन्यत्र व्रजेन्मुनिः॥

इति। (हस्तकांस्यादि) इति। आदिपदेन दर्वी निगद्यते। तथा तैरेव न
दर्व्या न च हस्तेन न कांस्येनाददीत ताम् इति। (पर्याप्तम्)
तृप्तिपर्यन्तम्। तथा श्रीमच्चिन्त्यविश्वसादाख्ये भिक्षित्वा
पात्रपूर्णान्तमथवा तृप्तिमात्रकम् इति। कामं प्रकामं

पर्याप्तम् इत्यमरः ॥

भिक्षाटनानन्तर करणीयविधिः ॥

p. 381)

(क्रि) (७३) निर्माल्यादिभिरुपहितां गच्छेत् भिक्षापात्रसहितं स्नायात्। भिक्षापात्रं शुद्धस्थाने धृत्वा, आचम्योद्धूल्य, सकलीकृत्य, भिक्षामस्त्रेण प्रोक्ष्य, त्र्यक्षरेणामृतीकृत्य, मनसा त्र्यंशन्निरूप्य, देवाय च मुखे च निवेद्य, स्वरक्षार्थं पूर्वोक्तवत् भुञ्जीत ॥

एककालार्चकस्तु पूर्ववत् समाधि कृत्वा,

कन्दादुत्थाप्य तन्नादं ब्रह्मरन्ध्रमुदीर्य च।
सुप्रभोद्योतिताशेष दिगन्तान्तानलद्युतिः ॥
तत्रैव पश्यते सर्वं मन्त्रजालं महाद्युतिः।
अनेनाधिष्ठिता मन्त्राश्शान्तरौद्रादिभेदजाः ॥
सिद्ध्यन्तीति किमाश्चर्यन्तद्भावगतचेतसः।
तत्र चित्तं समाधाय यावदास्ते मुहूर्तकम् ॥
तावदस्य भवेत् कंपस्तदाऽनुभव एव सः।

p. 382)

तस्मिन् व्योम्नि शिखान्तस्थो निष्कलः परमशिवः ॥

ध्यानगम्यस्स्वयं भूत्वा, चिन्तामणिरिव स्थितः ।

एवं सन्ध्यासु सर्वत्र पूजनं स्याच्छिवप्रियम् ॥

इत्युक्तवत् सर्वदोपास्य च] (७३)

(प्र) अथ भिक्षाटनविधिमुपवर्ण्य तदनन्तरकरणीयमाह

(निर्माल्य) इत्यादिना (भुञ्जीत) इत्यन्तेन । (उपहिताङ्गः)

रूषितविग्रहः । (धृत्वा) इति । निधायेत्यर्थः । (त्र्यक्षरेण)

मृत्युञ्जयमन्त्रेण । तदुक्तं

कार्यं त्र्यक्षरेणाभिमन्त्रितम् ।

तदाऽमृतं भवत्याशु तत् खातमृत्युकं भवेत् ॥

इति । अत्र भुक्तेरनन्तरं यावदस्तमयं स्वाध्यायादिकं कुर्यादिति

तात्पर्यम् । तदुक्तं श्रीमत्सोमशंभुचरणैः अथ

स्वाध्याययोगेन सन्ध्यामासाद्य पश्चिमाम् इति ॥

p. 383)

सायन्तनविधिः ॥

(क्रि) (७४) पश्चात् सायाह्नसमयेपि सन्ध्यामुपास्य, यथाशक्ति

पूजाजपध्यानसमाधीन् कृत्वा ॥ (७४)

(प्र) अह सायन्तनविधिः। (पश्चात्) इत्यादि (कृत्वा) इत्यन्तम्॥

शयनविधिः॥

(क्रि) (७५) स्वापकाले शय्यामधिरुह्य, शिवमक्षरात्मानं

ध्यात्वा, सुप्यात्॥ (७५)

[] एतच्चिह्नितः मूलपाठः केषुचित् कोशेषु न दृश्यते।

व्याख्यापि नास्योपलभ्यते॥

(२८५) (प्र) अथ शयनविधिः। (स्वापकाले) इत्यादि (सुप्यात्) इत्यन्तम्।

स्वापकाललक्षणमुक्तं श्रीमच्चिन्त्यविश्वसादाख्ये

पूर्वपश्चिमयोर्मध्ये रात्रौ तु दशनाडिका।

स्वापकाल इति प्रोक्तम् इति। (शय्याम्) इति। अस्य लक्षणमुपवर्णितं

श्रीमत्किरणे

p. 384)

स्वपेत् पूर्वाशिराश्शय्यामथवा दक्षिणाशिराः।

सा चतुष्करदीर्घा स्याद्विस्तारस्स्यात् तदर्द्धतः॥

तत्समं चोपधानं स्याद्द्वादशांकुलविस्तृतम्।

तस्यां स्वपेद्गृहस्थो यः इति। किं कृत्वा सुप्यादित्याह (शिवम्) इति।

(अक्षरामानम्) अक्षरः स्वाभिकौपाधिकक्षयादिदोषरहितः आत्मा

स्वरूपं यस्य स तथोक्तः तं निष्कलमिति यावत्। यद्वा
अक्षरात्मानं नादात्मानम्। तथा श्रीमन्निश्वासकारिकायां

अक्षरात् क्षरितं नित्यं वर्णाद्यं नैव तत् क्षरम्

इति।

स्वयमुच्चरते देहे अव्यक्तध्वनिरक्षरम्।
ममात्मीयंमिदं सूक्ष्म शरीरं नादसंशितम्॥
पंशोः पाशापनोदाय प्रकाशीकृतमद्भुतम्।

इति च। भोगावस्थं सदाशिव संज्ञं सकलनिष्कलं शिवमिति
यावत्। तदुक्तं अधिकारी च भोती च लयी स्यादुपचारतः इति।

p. 385)

तथा ईशस्सदाशिवश्शान्तः कृत्यभेदेन भिद्यते इति। यद्वा
अक्षरात्मानं अक्षरविशिष्टं पञ्चवक्त्राद्याकारं आत्मानि
गृह्णाति यः तं अधिकारावस्थ सदाशिवतत्वाधिष्ठातृत्वात्
सदाशिवापरपर्यायं ईश्वरसंज्ञं सकलरूपमिति यावत्।
तदुक्तं ईशशब्देन भगवान् कीर्तितव्यस्सदाशिवः इति।
एवदवस्थात्रयमुक्तसन्ध्याध्यानवदधिकारिभेदेन

कर्तव्यत्वादुपपन्नमिति गुरवः। अत्र अक्षरमात्मानमिति
व्यस्तपदं न विदधीत। तदुक्तं श्रीमत्सोमशंभुचरणैः
चिन्तयन्नक्षरात्मानं शयित्वा योगनिद्रया इति। (सुप्यात्) स्वापं
कुर्यात्॥

अर्धरात्रविधिः॥

(क्रि) (७६) निशीथेप्युत्थाय, तुर्यां सन्ध्यां स्मृत्वा, कृतसमाधिः
पुनः सुप्यात्।

p. 386)

प्रातरुत्थाय, शिवं संस्मृत्य, यथोक्तं कर्म कुर्यादिति
शुभम्॥

एवं यः प्रत्यहं भक्त्या संपूजयति कारणम्।
न तस्य जायते पापं यथादित्योदयात्तमः॥
न चाप्युपैति देहान्ते कर्माशयवशङ्गगत्।
सामान्यं यजनं ह्येतन्नित्यमभ्युदयावहम्॥
शुभ्रखण्डेन पयसा लिङ्गं स्नाप्य दिने दिने।
पायसञ्च हविर्दद्यादगरुं चन्दनं लिपेत्॥
व्योमव्यापिपदेनैव य इत्थं पूजयेच्छिवम्।

उत्पातास्तस्य नश्यन्ति ग्रहपीडाश्च दारुणाः ॥

सर्वव्याधिविनिर्मुक्तश्शिवसायुज्यमेधते ।

श्रीमतंगादि शास्त्रेषु विद्यापादार्थसंग्रहम् ॥

सर्वविद्येशिनी नाम्ना निर्ममे यस्तदुक्तिभिः ।

पवित्रस्य स्वरूपञ्च निर्ममे यश्शिवोक्तिभिः ॥

p. 387)

तेन ख्यातेन गुरुणा परमेश्वर संज्ञया ।

क्रियाक्रमद्योतिकायां नित्यकर्म विधिःकृतः ॥ (७६)

इति परमेश्वरापर नामंधेय श्रीमदघोरशिवाचार्य

विरचितायां क्रियाक्रमद्योतिकायां नित्यकर्मविधिस्समाप्तः ॥

(प्र) अथ अर्द्धरात्रविधिः (निशीथे) इत्यादि (समाधिः) इत्यन्तम् ।

ननु दिवोपनीत तोयाद्यैरर्द्धरात्रे तु पूर्ववत् ।

सन्ध्यां शिवार्चनं कुर्यात् इति श्रुतेरर्द्धरात्रेपि

सन्ध्यावन्दनादिकरणस्य विहितत्वात् कथमन्त्र

सन्ध्यास्मरणविधिरिति चेत् । सत्यं

अर्द्धरात्रे तु संप्राप्ते कुर्यात् सायन्तनं विधिम् ।

आचम्योद्धूल्य वा ध्यायन् स्वपेत् पूर्ववदीश्वरम् ॥

इति ब्रह्मशंभुपद्धतिकारिकोत्तरार्द्धप्रदर्शितार्थं हृदि
निधाय तुर्यां सन्ध्यां स्मृत्वेत्युक्तमत्रेत्यविरोधः ।

p. 388)

तदनन्तर करणीयमाह (पुनः सुस्त्वा) इति पदद्वयेन ।
अथ यथोद्दिष्टं क्रियाकाण्डं सर्वं प्रत्यहमाचरेदित्याहं
(प्रातः) इत्यादिना (इति शुभम्) इत्यन्तेन ॥
अथ व्याख्यातस्य उपसंहारं व्याख्येयस्योपक्षेपं चाह
(श्रीमतंग) इत्यादि सार्द्धकारिकाद्वयेन । (पवित्रस्य स्वरूपञ्च)
इति । अनेन व्याख्येयस्योपक्षेपः कृतः । (परमेश्वरसंज्ञया) इति ।
अत्र परमेश्वर इति अघोरशिवाचार्यस्य
नामधेयान्तरमित्यवगन्तव्यम् । यद्वक्ष्यति ख्यातो यः
परमेश्वरापरमहानाम्ना महीमण्डले इति । शेषं सुगमम् ॥
गुरुणा निर्मलमणिना व्याख्यातो नित्यकर्मविधिरेषः ।
शिवदर्शनोदितार्थैः क्रियाक्रमद्योतिकाविहितः ॥

p. 389)

इति श्रीमत्कमलालयनिवासि भक्ताध्यक्ष
सन्तानप्रभवत्यागराजाचार्यात्मजनिर्मलमणिगुरुविरचितायाम-
स्फुटार्थ प्रकाशिकायां प्रभासमाख्यायां

क्रियाक्रमद्योतिकाव्याख्यायां नित्यकर्मविधिस्समाप्तः ॥

शिवमस्तु ॥

पवित्रविधिः ॥

पवित्रकर्मोपकरण समाहरणविधिः ॥

(क्रि) (२) अथ पवित्रविधिः । उक्तकाले उक्तवत् पवित्राणि निष्पाद्य,
यागद्रव्याण्यपि मृण्मयानि नवानि ताम्रादि मयानि वा पात्राणि
सुविशुद्धानि विधाय, समित्कुशकुसुमदूर्वादीनि समाहृत्य ॥ (७७)

(प्र) नत्वाऽघोर शिवाख्य देशिकमणिं सद्विप्रवंशाब्धिजं

p. 390)

सन्धार्य हृदये सदा सुकृतिभिः कीर्तिद्युतिद्योतितम् ।
एकाब्दोद्भवकर्मलोपभिदुरं नित्यक्रियापूरकं व्याख्यास्ये
परमं पवित्रकविधिं लेशाद्यथादर्शनम् ॥
अथ एवमनुदिनमनुष्ठेयं नित्यकर्मविधिक्रममभिधाय
अधुना प्रत्यब्दमनुष्ठेयस्य नित्याङ्ग भूतस्य
पवित्रारोहणकर्मणोऽपि क्रममभिधातुं प्रतिजानीते (अथ
पवित्रविधिः) इति । (अथ नित्यकर्मकथनानन्तरम् । अत्र उच्यत इति शेषः

॥

ननु पवित्रस्य नित्यनैमित्तिककाम्यप्रायश्चित्ताख्येषु कर्मसु कथमस्मिन्नन्तर्भावः। अत्रोच्यते इदं पवित्रकर्म नित्याङ्गम्। न तावन्नित्यम्। तथा हि, सूत्रारोपणस्य प्रत्यब्दमनुष्ठेयत्वेपि प्रत्यहमननुष्ठेयत्वात् दैवसिकान्नित्याद्वैलक्षण्यस्य सत्वात् न नित्यम्।

p. 391)

नापि नैमित्तिकं दीक्षाप्रतिष्ठयोर्द्वयोरेव नैमित्तिकत्वनियमात्। तदुक्तं दीक्षा चैव प्रतिष्ठा च नैमित्तिकमिति द्विधा इति। दीक्षाप्रतिष्ठयोर्नैमित्तिकयोरकरणप्रायश्चित्तस्य क्वचिदम्यवृष्टत्वाच्च। ननु नियतकालत्वान्नैमित्तिकमिति चेन्न। अनियतकालस्य दीक्षादेरपि नैमित्तिकत्व श्रवणादुक्तलक्षणस्याव्याप्तेः। प्रातरादिनियतकाल कर्तव्यानां सन्ध्यावन्दनादीनामपि नैमित्तिकत्वप्रसङ्गादतिव्याप्तेश्च। न च काम्यम्। पवित्रस्य कामनानधीनत्वात्। तत्तु अभिलक्षितं बाधकम्। तदुक्तं अणिमादि प्रसिद्ध्यर्थं काम्यन्तदपि विस्तरम् इति। नापि प्रायश्चित्तम्। तद्धि विहितेतर चरणरूपस्य कर्मणोडनंकुरप्रसवतामात्र जनकम्।

p. 392)

न तु तत्पूर्वकम्। इदन्तु तदुभयजनकम्। तदुक्तं

वार्षिकान्मुच्यते कृत्यविप्लवात् पूरणं विधेः इति। ततः पवित्रं

नित्यांगमेव।

तथा समाख्यातं श्रीमत्कालोत्तरे

ततो नित्यांगमेवाहुः पवित्रारोपणन्तु यत् इति। तत्तु द्विविधं

दैवसिकं वार्षिकं चेति। दैवसिकापेक्षया वार्षिकं

प्रधानञ्चेति सिद्धम्। एवं प्रपञ्चितं

श्रीमत्सोमशंभुपद्धतिटीकादौ तत एवावधार्यम्॥

अत्र देशिकादयश्चत्वारोऽधिकारिणः। तत् समुदीरितं

श्रीमत्कामिके

दुरितस्य विनाशार्थं संवत्सरकृतस्य तु।

प्रायश्चित्तमकुर्वाणो मन्त्रीविधिविलंघनात्॥

सिद्धिभ्रंशमवाप्नोति देशिको दोषभाऽभवेत्।

पुत्रको मुक्तिभाङ्ग स्याज्जन्मनैकेन रोधनात्।

समयी समयस्थोपि नैवं यस्मात् पवित्रकम्।

p. 393)

विधातव्यं प्रयत्नेन येन केन प्रकारतः॥

इति। तथा च नैतत् कार्यन्न केनचित् इति। अलमतिविस्तरेण॥

अथ पवित्रकर्मकरणाय तदुपकरणानि समाहर्तव्यानीति
प्रथमं सञ्चष्टे (उक्तकाले) इत्यादिना (समाहृत्य) इत्यन्तेन।
कस्मिन् काले पवित्राणि समारोपयेदित्याह (उक्तकाले) इति।
अत्रैतदुक्तं भवति। आषाढश्रवणभाद्रपदानामन्यतममासे
सितासितपक्षयोरेकस्मिन् अष्टम्यां चतुर्दश्यां वा मुमुक्षुः
पवित्रारोपणं कुर्यात्। बुभुक्षुस्तु मासत्रयेषु शुक्लपक्ष एव
कुर्यात्। इति। तथ श्रीमत्कामिके

आषाढादित्रयो मासा ज्येष्ठमध्यमकन्यसाः।
अश्विनी कृत्तिकामासाव?थवा संप्रकीर्तितौ॥
पूर्वपक्षे चतुर्दश्यामथाष्टम्यां पवित्रकम्।

p. 394)

इति। शुक्लपक्षे गृहस्थस्य यतेरुभयपक्षयोः इति च।
आषाढस्तावदत्र सौरवृशा उत्तरायणान्तिममासो मिथुनराशिः
इति श्रीमता सोमशंभुपद्धतिटिकाकारेण समुदीरितस्तत
एवावधार्यः विस्तरभयान्नेह प्रतन्यते।
गुरुशुक्रमूढसंयुक्तमासं त्यक्त्वा शुद्धमासे
पवित्रारोहणं कुर्यात्। यदा
मूढगुरुशुक्रयोर्मासत्रयेऽप्युदयो न स्यात् तदा पवित्रस्य
नित्यांगत्वात् कर्तव्यमेव। तथा श्रीमत्सिद्धान्तशेखरे

कवौ गुरौ वाऽस्तमयं प्रयाते मासत्रयेवाप्युदयो न चास्ति।
तथापि कुर्वीत पवित्रकार्यं नैमित्तिकत्वात् इति। (उक्तवत् पवित्राणि
निष्पाद्य) इति। अत्र अष्टोत्तरशतादिसंख्यैर्दुकूलादिसूत्रैस्तुल्यदश
ग्रन्थियुतानि

p. 395)

समान्तरालानि लिङ्गमस्तकमानानि चतुरङ्गुलाद्यायतानि वा
तत्वपवित्रसंज्ञानि कंकणाकाराणि पवित्राणि अष्टादशग्रन्थि
समलंकृतं गंगावतारकन्नामकंकणाकारमेकं पवित्रं
च कुर्यात्। तथा श्रीमन्मृगेन्द्रे

दुकूलं पट्टसूत्रं वा क्षौमं कार्पासमेव वा।
सूत्रं नवगुणं कृत्वा सद्येन नवतन्तुकम्॥
शुद्धोदकेन प्रक्षाल्य तथा चन्दनवारिणा।
शोषयेद्बहुरूपेण कुर्यात् कन्तुकवद्धृदा॥

इति। तथा श्रीमच्चिन्त्यविश्वसादाख्ये

अष्टोत्तरशतेनैकं सूत्राणां स्यात् पवित्रकम्।
इत्थं त्रीणि तदर्द्धेन दशधैवाथ सप्तभिः॥

इति । तथा श्रीमन्मकुटे

सूत्रैर्विंवर्द्धयेद्विद्वान् नवधा तु पवित्रकम् ।
अधमं त्रयमित्युक्तं नवषोडशविंशकम् ॥

p. 396)

पञ्चविंशतिर्द्वात्रिंशत् षट्त्रिंशन्मध्यमत्रयम् ।
पञ्चाशत् सप्ततिश्चैव नवतिश्चोत्तमत्रयम् ॥
एतेष्वेकं यथाशक्ति संग्रहेत्तु महेश्वरि ।
पूर्वत्रयं चले कार्यमर्काष्टाब्ध्यंगुलायतम् ॥
कृत्वा कंकणवत्तत्र दशग्रन्थीन् समान्तरान् ।
गंगावतारकन्नाम चतुर्थं शक्तिसूत्रकम् ॥
बाहुमानञ्चले कार्यं यद्वा कुर्याद्यथाशुभम् ।
द्व्यंगुलान्तरितं तत्र कृत्वा ग्र?न्थिचतुष्टयम् ॥
ततस्तालान्तरन्त्यक्त्वा कुर्याद्ग्रन्थिचतुष्टयम् ।
इत्थं पार्श्वद्वये कार्यं षोडशैव कलामयम् ॥
शिवशक्तिमयं प्रान्ते कुर्याद्ग्रन्थिद्वयं पुनः ।

इति । तथा च श्रीमत्सूक्ष्मे
अष्टादशग्रन्थियुक्तं कुर्याद्गंगावतारकम् इति ।

द्वारद्वारपालादीनामष्टसूत्रैरेकग्रन्थिपरिशोभितं

गन्धपवित्रं विदध्यात्। तथा श्रीमज्ज्ञानरत्नावल्यां

ग्रहलोकेशलक्ष्मीणां सर्वेष्वावरणेषु च।

p. 397)

द्वारपालेषु कर्तव्यं वसुतं तु युगांगुलम्॥

गुर्वात्मनोः प्रकर्तव्यं पवित्रं नवतन्तुकम्।

ग्रन्थ्यैकं नवसूत्राढ्यं द्वादशाङ्गुलमायतम्।

कुर्याद्गन्धपवित्रन्तद्यद्वा मानविवर्जितम्। इति।

मण्टपपूजापूर्वकरणीयविधिः॥

(क्रि) (२) सप्तम्यां त्रयोदश्यां वा नित्यांह्निकद्वयं विधाय,

सायाह्ने याग गृहं पुष्पदामभिरलंकृत्य [-क्षमाभिः] ,

नैमित्तिकीं सन्ध्यां विशेषतर्पणञ्च विधाय [कृत्वा], परीक्ष्य

[परीक्षं] परिगृहीतायां भुवि [भुवि नित्यो] शक्रानलदिशोर्मध्ये

नित्योक्तवत् सूर्यमभ्यर्च्याविसृज्यैव [भ्यर्च्य वि]॥ (७८)

(प्र) अथ पवित्राधिवासार्थं मण्टपपूजामभिधातुं

तत्पूर्वकरणीयान्याह (सप्तम्याम्) इत्यादिना (अविसृज्यैव)

p. 398)

* पा पूत ॥ भूत ॥

इत्यन्तेन । (सप्तम्यां त्रयोदश्यां वा) इति । अत्र यद्यष्टम्यां
पवित्रारोहणं क्रियते तदा सप्तम्यामधिवासं कुर्यात् । यदि
चतुर्दश्यां तर्हि त्रयोदश्यामधिवासमिति तात्पर्यम् । यदा
त्वेकदिने साधिवासं पवित्रसमर्पणं कर्तव्यं तदा तत्र
संपूर्णा चतुर्दशी ग्राह्या । उक्तञ्च

यदैकस्मिन् दिने कार्यं सर्वं पूर्णातिथिर्यदि ।
तदा त्वेकदिने शंभोः पवित्राद्यं चिकीर्षितम् ॥

इति । यदा चतुर्दशी दिवाद्वयगता तिथिर्भवति तदा
परघस्र?युक्तचतुर्दश्यां पवित्रसमर्पणं कर्तव्यम् ।
तथा श्रीसिद्धान्तशेखरे पवित्रकार्ये परघस्रयुक्ता चतुर्दशी
स्याच्छुभदाऽष्टमी च इति । तथाऽन्यत्रापि

यदा खण्डतिथिस्तत्र तदा तत्तिथिभागयोः ।
गन्धसूत्रं पवित्रञ्च दद्यात् इति ।

p. 399)

विष्णुस्वापानन्तरकाले पवित्रस्य क्रियमाणत्वात्

मिथुनगतशुद्धाष्टमीं विना तच्चतुर्दश्यामारंभः

कर्तव्यः। उक्तञ्च

शुद्धाष्टमीं विना द्वन्द्वे कुलीरे सिंहभाद्रयोः।

सितासितासु कर्तव्यं चतुर्दश्यष्टमीषु च॥

इति। (नैमित्तिकीम्) पवित्रारोहणनिमित्तेन कर्तव्य?म्।

तथा श्रीमज्ज्ञानरत्नावल्यां

पवित्रारोहणे कार्या या सन्ध्या तन्निमित्ततः।

तेन नैमित्तिकी प्रोक्ता नैमित्तिकनिमित्ततः॥

इति॥ नित्यां सन्ध्यां निधाय पश्चान्नैमित्तिकीं

सन्ध्यामाचरेदित्यर्थः। काले हि कर्म चोद्यते न कर्मणि कालः इति

न्यायेन सायन्तनकाल एव नित्यसन्ध्यासमनन्तरं

पवित्राधिवासनार्थं पुनरपि सन्ध्यावन्दनं कार्यम्।

एतद्विधिसामर्थ्यादेव तर्पणस्यापि सिद्धौपुनर्विशेष ग्रहणं

p. 400)

श्रीमन्मृगेन्द्राद्युक्त विस्तरतर्पणद्योतनाय।

यथा

तैश्च पुनराचम्य पाण्यग्रेण गुणोत्तमम् ।

ब्रह्मादिपञ्चकं सर्वान् विद्याविद्येश्वरानपि ॥

तत्वान्यधिपतीन् सर्वान् ध्यायन् कालान्तमण्डले ।

चतुर्थ्यन्ताभिधानेन स्वाहाप्रान्तेन तर्पयेत् ॥

ततो यज्ञोपवीतेन मुनीन् कण्ठावलंविना ।

सनकादीन् सभृग्वादीन् सगोत्रप्रवराधिपान् ॥

कनिष्ठांगुलिमार्गेण भूतादीन् पर्वसन्धिभिः ।

तथाऽपसव्येन पितॄन् सपत्नीकान् पितामहान् ॥

प्रपूर्वांश्च गुरूनेवं चोदकान् बोधकान् परान् ।

भ्रातॄन् सखीनुपाध्यायान् समातामहमातुलान् ।

स्वधान्तेनाभिधानेन नतिप्रान्तेन मध्यमान् ।

इति । एवं समाख्यातं श्रीमत्सोमशंभुपद्धतिव्याख्याकारेण

। (परीक्ष्य) इति । भूशोधनं शल्योद्धारादिना विधायेत्यर्थः ॥

p. 401)

द्वारद्वारपालाद्यर्चनक्रमः ॥

(क्रि) (३) समाचम्य, सकलीकृत्य, प्रणवसहितसामान्याघ्र्यहस्तो [-

तप्रणवार्घ्यं] द्वाराण्यस्त्रेण संप्रोक्ष्य, ओम् ह्यैं [हां]

शान्तिकलाद्वाराय नमः इति पूर्वे, ओम् ह्रूं [हां]

विद्याकलाद्वाराय नमः इति दक्षिणे ओम् ह्लां [हां]

निवृत्तिकलाद्वाराय नमः इति पश्चिमे, ओम् ह्लीं [हां]

प्रतिष्ठाकलाद्वाराय नमः इत्युत्तरे संपूज्य, तथैव

तच्छाखयोः [-योः ओ हां नन्दिने] स्वदक्षिणवामस्थयोः

पूर्वादारभ्य ओम् हां नन्दिने नमः ओं हां महाकालाय

नमः ओं हां भृंगिणे नमः ओं हां विनायकाय नमः ओं

हां वृषभाय नमः ओं हां स्कन्दाय नमः ओं हां देव्यै

नमः ओं हां चण्डाय नमः इति प्रतिद्वारं द्वौ द्वौ [द्वौ

वक्ष्यमाण ध्यानपुरस्सरं संपूज्य] पार्श्वकलशयोः

स्वदक्षिणवामक्रमेण च द्वारपालान्

p. 402)

संपूज्य, पश्चिमे नित्यवत् द्वारपालानभ्यर्च्य[संपूज्य],

विघ्नानुत्सार्य, द्वाराण्यन्यान्यस्त्रेण [-ण्यस्त्रेण] संघट्य,

पश्चिमद्वारेणान्तः प्रविश्य, अस्त्रमुदुंबरे [-स्त्रोर्दुथरे]

राक्षायै विन्यस्य, प्रदक्षिणं [प्रादक्षिण्येन] गत्वा [-त्क- - नैर्-

ऋते ओं] ओं हां वास्त्वधिपतये [वासत्वाधि-] ब्रह्मणे नमः इति

नैर्-ऋते पुष्पं दत्वा [संपूज्य]

अस्त्रप्राकारकवचावकुण्ठनाभ्यां यागगृहं [-ग्रहं]

संरक्ष्य, मण्डलाद्दक्षिणतः कृष्णाजिनादौ सौम्यास्य उपविश्य

॥ (७९)

(प्र) अथ तद्द्वारतत्पालाद्यर्चनक्रमं ब्रूते (आचम्य) इत्यादिना

(उपविश्य) इत्यन्तेन ॥

शिवहस्तकरणपूर्वकर्तव्यविधिः ॥

(क्रि) (८) भूतशुद्धिं विधाय, अंगन्यासञ्च पूर्वोक्तवत्

कलान्यासपूर्वं विधाय,

विहितान्तर्यजनहवनध्यानस्तालत्रयादीना [-दीना] धाम

संरक्ष्य, क्षीरादिसाष्टांगं विशेषार्घ्य मुपकल्प्य [च]

तदंभसा

p. 403)

स्वशिरसि [शिरः] संप्रोक्ष्य, सकुशजलेन [-कुशेन]

यागोपकरणद्रव्यजातमस्त्रेण संप्रोक्ष्य, कवचेनाभ्युक्ष्य

[कवचेनेभ्यक्ष्य?], हृदयेनाभिमन्त्र्या [-कवचेना-]

वकुण्ठ्यामृतीकुर्यात् [-कुण्डय्य] ।

ततश्चन्दनेन ललाटे तिलकं कृत्वा, आत्मानमभ्यर्च्य,

मन्त्रशुद्धिं विधाय [कृत्वा] ॥ (७०)

(प्र) शिवहस्तकरणात् पूर्वकर्तव्यान्याह (भूतशुद्धिम्)

इत्यादिना (विधाय) इत्यन्तेन ॥

शिवहस्तकरणतदधिरोपणादिकम् ॥

(क्रि) (५) चन्दनालेपनपूर्वमासनमूर्त्यादिमन्त्र संहितया
[संहिताया] शिवहस्तं संकल्प्य, तेजोरूपं ध्यात्वा,
स्वशिरस्यधिरोपयेत् [-रस्याधि-] ज्ञानखड्गं
सप्तधाऽस्त्रजप्तमादाय,
(प्र) शिवहस्तकरण तदधिरोपणादिकं वक्ति (चन्दन) इत्यादिना
(आदाय) इत्यन्तेन ॥

p. 404)

शिवभावना ॥

(क्रि) (६) शिवोऽहमादिसर्वज्ञो मम यज्ञे प्रधानता इति
भावितशिखाद्वैतः [-तश्शिवाद्वय] ॥ (७२)
(प्र) अथ शिवभावनां ब्रूते (शिवः) इत्यादिना (शिवाद्वैतः)
इत्यन्तेन । (आदिसर्वज्ञः) आदिश्चासौ सर्वेषां अनन्तादीनां
गुरूणां सर्वज्ञाश्चेत्यादिसर्वज्ञः ।
यदाहुः
स पूर्वेषामपि गुरुः कालेनानवच्छेदात् इति ॥

मण्टपसंस्कारः ॥

(क्रि) (७) पञ्चगव्यं संसाद्धय[संस्थाप्य]विकितान् [विकिरान्] सप्तधाऽस्त्रेणाभिमन्त्रय, नैर्-ऋत्यामीशाभिमुखः [नै-ऋत्यामीशानाभिमुख] स्थित्वा, पञ्चगव्याघ्र्याभ्यां यागगृहं [-गग्रहं] संप्रोक्ष्य, निरीक्षणादि च[-चतु-स्त्रेणं]तुष्पथान्तसंस्कारैस्संस्कृत्य ॥ (७३)

(प्र) अथ मण्टपसंस्कारमतिदिशति (पंचगव्यम्) इत्यादिना (संस्कृत्य) इत्यन्तेन । (पंचगव्यं संसाध्य) इति । अत्र दीक्षाविधौ वक्ष्यमाणवद्विधेयमित्यवधेयम् ॥

p. 405)

मण्टपसंस्कारानन्तरकरणीयविधिः ॥

(क्रि) (७) तस्मिन् ज्वलच्छस्त्रभूतान्विकारानस्त्रेण विक्षिप्य, कुशकूर्च्योपसंहृत्य, वर्द्धन्यासनायैशान्यां [-यैशान्यां] संकल्प्य, नैर्-ऋते [नै-ऋते] वास्तुनाथमभ्यर्च्य [मभ्यच्य], पश्चिमे ओम् हां महालक्ष्म्यै नमः इति संपूज्य [-ज्य द्वारस्य संमुखीं श्या-], श्यामां पुष्परत्नौघवर्षिणीं [-णीं ध्यात्वावाह्य यजेद्विद्वान् स्मरेन्मण्ट-] मण्टपरूपिणीं

ध्यायेत् [-णीं इति ध्या-] । (६८)

(प्र) तदनन्तरकरणीयान्याह (तस्मिन्) इत्यादिना (ध्यायेत्) इत्यन्तेन ॥

(२५३) सपरिकरशिवकुंभवर्धनीपूजाविधिः ॥

(क्रि) (९) तत ऐशान्यां सर्वधान्यस्थे गलितांभसा पूरिते चूतपल्लवाहलंकृतमुखे [-लंकृते निष्कमात्र सुवर्णगर्विते पश्चि-] पश्चिमानने मूतिर्भूते [मूर्तिर्भूते] कुंभे चलासनं दत्वा, सांगं भगवन्तं शिवमावरणरोधरहितं

p. 406)

संपूज्य, तद्दक्षिणतो वर्द्धन्यान्तथा भूतायां ओम् अस्त्रासनाय [ओं ओं] हुंफण्णमः [हुं फट् नमः] ओम् अस्त्रमूरत्ये [ओं ओं] हुंफण्णमः[हुं फट् नमः] ओं श्लीं [श्रीं] पशूं हुंफडस्त्राय हुंफण्णमः [-शूं हुं फट् नमः] ओं हृदयाय [ओं ओं] हुंफण्णमः [हुं फट् नमः] ओं श्लीं [श्रीं] शिरसे हुंफण्णमः [हुं फट् नमः इत्यादिना पाशु-] ओं पं शिखायै हुंफण्णमः ओं शूं कवचाय हुंफण्णमः ओं हुं नेत्रेभ्यो हुंफण्णमः ओं फट् अस्त्राय हुंफण्णमः इति पाशुपतास्त्रं संपूज्य [अभ्यर्च्य], सितवस्त्रादिनोभयं विभूष्य, मण्डपस्याभ्यन्तरदिग्भागे

लोकपालान्वाहनायुधसंयुक्तान् ध्यात्वा, प्राच्यादिदिक्षु [-दिक्षु]
कुंभेषु महाकालसूर्ययोर्मध्ये ओं हां इन्द्राय नमः ओं
हां अग्नये नमः ओं हां यमाय नमः [-नमः ओं हां नि-ऋते-
] गणेशस्य पश्चिमकुंभे ओं हां निर्-ऋतये नमः [-नमः
इन्द्राभिमुखं ओं हां वरु] ओं हां वरुणाय नमः [-नमः
ओं हां वाय-] स्कन्दस्योत्तरे ओं हां वायवे नमः

p. 407)

[नमः ओं हां सोमाय नमः ओं हां इशा] ओं हां कुबेराय
नमः चण्डेशस्य पूर्वे ओं हां ईशानाय नमः तत्रैव [तस्यैव
द] तत्कुंभस्य दक्षिणे ओम् हां ब्रह्मणे नमः नैर्-ऋते [नै-ऋतां
पूर्वे ओं हां वि] तत्कुंभस्योत्तरे ओम् हां विष्णवे नमः इति
संपूज्य

भोभो शक्र [चक्र] त्वया स्वस्यां [स्वभ्यां] दिशि
विघ्नप्रशान्तये ।
सावधानेन यागान्तं यावत् स्थेयं [यावस्थेयं] शिवाज्ञया ॥
इत्यनेन क्रमेण सर्वान् लोकपालान् शिवाज्ञां श्रावयेत्, ततो
वर्द्धनीमादाय, कुंभाग्रगामिनीमविच्छिन्न [मिनी विच्छन्न?]
पयोधारां [पयोधरां]
मूलमन्त्रेणास्त्रदुर्गमनुस्मरन्नीशादीशपर्यन्तं

[नीशानादीशान्तं परि] परिभ्राम्य, स्वस्थाने पूर्वं [पूर्व]
कुंभं पश्चाद्वर्द्धनीञ्च संस्थाप्य, कुंभे स्थिरासनं
शिवं संपूज्य, वर्द्धन्यामस्त्रमभ्यर्च्य, लिङ्गमुद्रया ओं
ह्रौं ह्रौं [ह्रौं] शिवशक्तिभ्यान्नमः [शक्तिशिवाभ्यां
नमः] इति भगलिंगसमायोगं [लिङ्गं] विधाय, ज्ञानखड्गं
[खट्गं] समर्प्य, मूलमन्त्रजपं दशांशतो

p. 408)

वर्द्धन्यामस्त्रञ्च [न्याञ्च] निवेद्य, अवभृथान्तमत्र [अथ
प्रथमान्तम] भगवंस्त्वया स्थातव्यमिति विज्ञाप्य,
निरोधार्घ्यं कृत्वा, तदंभसा निरोधार्घ्यमघोरेण दत्वा
[घ्यं दत्वा], तत्पात्रन्तत्रैव निश्चलं संस्थाप्य,
वर्द्धन्यासनविकिरोत्थास्त्रैर्यागगृहमपसारिताशेषविघ्नं
[विकीरोर्थास्त्रैयागग्रहमप] समन्तात् भावयेत्। (७५)
(२५४) (प्र) अथ शिवकुंभवर्द्धनीपूजां
तत्परिकरलोकपालपूजया सह वक्ति (तत ऐशान्याम्) इत्यादिना
(भावयेत्) इत्यन्तेन। (अवभृथान्तम्) यावद्दीक्षान्तम्।
दीक्षान्तोऽवभृथो यज्ञे इत्यमरः॥

गणेशपूजाविधिः॥

(क्रि) (२०) वायव्यान्तत्पूर्वकुंभे गणपतिमाराध्य,

अविघ्नमस्त्विति विज्ञाप्य, ॥ (७६)

(प्र) अथ अविघ्नार्थं गणेशपूजाविधिः (वायव्याम्) इत्यादि

(विज्ञाप्य) इत्यन्तम् ॥

p. 409)

इष्टलिङ्गपूजाविधिः ॥

(क्रि) (२२) ऐशान्यान्तत्पश्चिमकुंभे गुरूनिष्ट्वाऽध्येष्य,

लब्धानुज्ञः स्वेष्टलिङ्गे [ज्ञ स्त्वेष्ट] शिवं

पञ्चगव्यादिभिर्विभवानुसारेण भोगाङ्गपूजार्थं [-गाङ्गं

पूजान्तं] संपूज्य, (७७)

(प्र) इष्टलिङ्गपूजाविधिः (स्व) इत्यादि (संपूज्य) इत्यन्तम् ॥

मण्डलेश्वरपूजाविधिः ॥

(क्रि) (२२) ब्रह्मस्थाने लतालिङ्गोद्भवादि मण्डले

गन्धविरचितमण्डले वा परमकारणमध्वपतिं [मध्वरपतिं]

शिवं स्वेष्टलिङ्गपूजान्तं [जान्तज्जपान्तं समा] वा जपान्तं

वा समाराद्धय [समाराध्या] (७७)

(प्र) अथ मण्डलेश्वरपूजाविधिं वर्णयति (ब्रह्म) इत्यादिना

(समाराध्य) इत्यन्तेन । (ब्रह्मस्थाने) इति ।

p. 410)

एतत्स्वरूपं दीक्षाविधौ निरूपयिष्यामः ।

(लतालिङ्गोद्भवादिमण्डले) इति । अत्र लतालिङ्गोद्भवलक्षणं

समुदीरितं श्रीमत्सिद्धान्तसारावल्यां

भक्ते विंशतिधा बहिश्शशिपदाविथी सिता दिक्षु

जैर्द्दराणीशमुखद्युतीन्युभयतो लिङ्गानि पाण्डुद्युगैः ।

कोणेष्वब्धिपदैलता हरितभा वीथी चतुष्षष्टिभिः पद्मं

शान्तिकलादिभानि च लतालिङ्गोद्भवे मण्डले ॥

इति । (स्वेष्टलिङ्गपूजान्तम्) इति । अत्र भोगाङ्गपूजान्तं संपूज्येति

प्रागुपपादितं स्मर्तव्यम् ॥

अग्निस्थानगमनविधिः ॥

(क्रि) (२३) अग्निकार्यार्थमध्येष्य, लब्धानुज्ञोर्घ्यपात्रमादाय,

प्रदक्षिणं ससंभारं यागोपकरणं दिव्यदृष्ट्याऽवलोकयन्

कुण्डसमीपमेत्य [-ण्डसकाशमे-] कुण्डनाभिं पुरस्कुर्वन्

सौम्यास्य [-म्यस्या] उपविशेत् [-पवेशेत्] ॥ (६३)

p. 411)

(प्र) अथ अग्निकार्याय तत्स्थानगमनमतिदिशति (अग्निकार्य) इत्यादिना

(उपविश्य) इत्यन्तेन । (अग्निकार्यार्थम्) शिवाग्न्युत्पादनाय ।

(अध्येष्य) अग्निकार्यं करिष्येऽहमिति प्रार्थ्य । (अर्घ्यपात्रम्)

सामान्यार्घ्यपात्रम् । तथा निगदितं श्रीरामनाथपद्धत्यां

हीमार्थं प्रार्थ्य सामान्यं गृहीत्वाऽर्घ्यं हविर्भुजे इति ।

(ससंभारम्) सोपकरणम् । क्रियाविशेषणमेतत् । एवं समुदीरितं

श्रीमत्सोमशंभुपद्धतिकारेण । (यागोपकरणम्)

शिवाध्वरसाधनद्रव्यम् । वामसव्यभागयोः स्थित्मेतत् ।

तदुक्तं श्रीमत्सोमशंभुचरणैः

निविष्टो विधिना तस्मिन्नर्घ्यगन्धघृतादिकम् ।

वामे सव्ये तु विन्यस्य समिद्दर्भतिलादिकम् ॥

इति । (दिव्यदृष्ट्या) परचक्षुषा । (कुण्डसकाशम्) इति ।

p. 412)

अत्र कुण्डलक्षणमाम्नातं श्रीमोहशूरोत्तरे

हस्तमात्रं खनेत्तिर्यमूर्ध्वमेखलया सह ।

खाताद्वाह्योऽङ्गुलः कण्ठस्सर्वकुण्डेष्वयं विधिः ॥

मेखलात्रितन्नं कार्यमश्वरामयमांगुलैः ।

दैर्घ्यात् सूर्यांगुला नाभिस्त्र्यंशेन विस्तरेण तु ॥

एकांगुलोच्छ्रिता सा तु प्रविष्टाऽभ्यन्तरे तथा ।

कुंभद्वयसमायुक्ता चाश्वत्थदलवद्यथा ॥

अंगुष्ठमेखला युक्ता मध्येत्वाज्यधृतिर्यथा ।

दक्षस्था पूर्वयाम्ये तु जलस्था पश्चिमोत्तरे ॥

इति ।

कुण्डलाभिस्तु होतुरग्रस्थितावयवविशेषः ॥

कुण्डसंस्कारविधिः ॥

(क्रि) (२८) तत्रानामिकांगुष्ठाभ्यां [-मिकाभ्याङ्गु-]

न्यस्तमूलेन चक्षुषा कुण्डस्य निरीक्षणं शिवमन्त्रेण

प्रोक्षणताडने [-प्रोक्षणं ताड-]

p. 413)

कुशैः हुंफडन्तास्त्रेणाभ्युक्षणं वौषडन्तकवचेन [-डन्त

पवचे-] खननावकिरण[-नावकीरण-

]पूरणसमीकरणसेचनकुट्टनसन्मार्जनसमालेपनानि[-

नसंमार्जन-] खड्गेन कुशेन विधाय,

कुण्डमध्यपूर्वयाम्योत्तरपश्चिमेषु [-कुण्डमध्ये पूर्व-]

शान्त्यतीतादिकलामन्त्रान्[शान्त्याती-] न्यस्त्वा, कलामयं

परिकल्प्य, त्रिसूत्र्यास्त्रेण संवेष्ट्य[आवेष्ट्या] ओम् हां

कलामयाय कुण्डाय नमः इत्यभ्यर्च्य, प्रागायतमुदगायतं

वा तिर्यग्रेखया सह रेखाचतुष्टयमुभयत्र [भ्ययत्रिषु]

त्रिशूलाकृतिना [-शूलाकृतीना] कुशत्रयेण वज्रीकरणं

पूर्वोत्तराग्रकुशद्वयेन चतुष्पथन्यासमस्त्रेण[?] ॥ (९०)

(प्र) अथ अग्निस्थानगमनविधिं व्याहृत्य

असंस्कृते वाप्यग्नौ वा हुतं भवति निष्फलम्।

तस्मात् कुण्डादिसंस्कारान् कुर्यान्मन्त्रेण देशिकः ॥

p. 414)

इति श्रीमदजितनिगदित वचनेन पुरा तावत् कुण्डसंस्कारविधिं

वर्णयति (तत्र) इत्यादिना (अस्त्रेण) इत्यन्तेन। (तत्र) तस्मिन् कुण्डे।

(न्यस्तमूलेन) न्यस्तः मूलः मूलमन्त्रः यस्य तत् तथोक्तं तेन।

(निरीक्षणम्) वीक्षणाख्यः प्रथमस्संस्कारः। (प्रोक्षणताडने)

प्रोक्षणञ्च प्रोक्षणाख्यो द्वितीयस्संस्कारः। ताडनञ्च

ताडनाख्यः तृतीयस्संस्कारः ते। प्रोक्षणं साघ्र्यजलेन
उत्तानपादेन पताकाकारेण हस्ततलेन। ताडनं प्रसृततर्जन्या
मुष्ट्या (अभ्युक्षणम्) अभ्युक्षणाख्यश्चतुर्थस्संस्करः।
अभ्युक्षणं अधोमुखेन पताकाकारेण हस्ततलेन।
कुशैरित्यभ्युक्षणस्थापि संबन्धनीयम्। एवमाख्यातं
श्रीमता सोमशंभुपद्धतिव्याख्याकारेण।
(खननावकिरणपूरणसमीकरणसेचन
कुट्टनसन्मार्जनसमालेपनानि)

p. 415)

खननं च खातः पंचमस्संस्कारः अवकिरणं च उद्धारः
षष्ठस्संस्कारः पूरणं पूर्तिकरणं सप्तमस्संस्कारः
समीकरणं च समताविधानं अष्टमस्संस्कारः सन्मार्जनं
च रजोव्युदासः एकादशस्संस्कारः समालेपनं च सम्यक्
रूक्षणं द्वादशस्संस्कारः (खड्गेन) अस्त्रेण।
अत्र अस्थिशल्यादिदोषनिवृत्त्यर्थं खननादिकं मनसा विधेयमिति
भावः (कुण्डमध्यपूर्वयाम्योत्तरपश्चिमेषु) कुण्डमध्यं
च मेखलान्तरालावकाशः पूर्वं च पूर्वमेखला याम्यं च
याम्यमेखला उत्तरं च उत्तरमेखला पश्चिमञ्च
पश्चिममेखला कुण्डमध्यपूर्वयाम्योत्तरपश्चिमानि तेषु।
(परिकल्प्य) इति। कलारूपप्रकल्पनाख्यस्त्रयोदशस्संस्कारः।

(आवेष्ट्य) इति ।

p. 416)

त्रिसूत्रीपरिधानाख्यश्च चतुर्दशस्संस्कारः । (अभ्यर्च्य) इति ।
कलामयाभ्यर्चनाख्यः पंचदशस्संस्कारः । (प्रागायतम्)
प्रागाननमित्यर्थः । (उदगायतम्) उत्तराननमित्यर्थः ।
कुशेनेति शेषः । अत्र गुरुः पूर्वाननश्चेत् तर्हि पूर्वाननं
रेखात्रयं उत्तराग्रामेकां रेखाञ्च कुर्यात् । यद्युत्तरास्यस्तदा
उदग्रगं रेखात्रयं प्रागग्रामेकां रेखाञ्च कुर्यात् इति
तात्पर्यम् । यदुक्तं प्राक् नित्याग्निकार्ये पूर्वाग्रं रेखात्रयं
कुशेन संपाद्य, रेखामेकामुत्तराग्राञ्च संपादयेत् ।
उत्तरास्यश्चेद्विपर्ययेण संपाद्य इति । तत्र रेखाचतुष्टयं
ब्रह्मविष्णुरुद्र महेश्वरात्मकमित्यवसेयम् । तथा श्रीमत्किरणे

रेखात्रयञ्च पूर्वास्यं रेखैकाचोत्तरामुखा ।
वामो वाऽयं विधिः कार्यो रेखाः कल्प्यास्सुरात्मिकाः ॥

p. 417)

ब्रह्मविष्णुहरेशाख्याः

इति । रेखाचतुष्टयविन्यासाख्योऽसौ षोडशस्संस्कारः । (उभयत्र)

मूलाग्रयोरित्यर्थः। (वज्रीकरणम्) वज्रीकरणसंज्ञः

सप्तदशस्संस्कारः। अत्र रेखाचतुष्टयविन्यास

वज्रीकरणसंस्कारद्वयं हृदयमन्त्रेण कुर्यात्।

अनुक्तान्यन्यानि कर्माणि यानि तान्यपि हृदयेनेत्युच्यते।

यदुक्तं उक्तानुक्तं च यत् किंचित् तत्सर्वं हृदयेन तु इति।

यद्वा अस्त्रेण वा कुर्यात्। (चतुष्पथन्यासम्)

चतुष्पथन्यासाभिधानोऽष्टादशस्संस्कारः।

तथा श्रीमज्ज्ञानरत्नावल्यां

चक्षुषापि प्रसादेन वीक्ष्य प्रोक्ष्य शिवाणुना।

आताड्याभ्युक्षयेद्विद्वान् वौषडन्तेन वर्मणा॥

अस्त्रेण खातमुद्धारं पूरणं समतां हृदा।

सेचनं कवचेनाथ कुट्टनं हेतिना चरेत्॥

p. 418)

सन्मार्जनं समालेपं कवचेन समाचरेत्।

न्यस्तव्याश्शान्त्यतीताद्या मध्य पूर्वादितः कला॥

त्रिसूत्रीपरिधानेन तनुत्राणेन वेष्टयेत्।

कलामयाय कुण्डाय नमस्संयोज्य चार्चनम्॥

तिस्रः पूर्वाननाः कार्या रेखैका चोत्तरानना।

वज्रीकरणमस्त्रेण वज्राकारं कुशैस्त्रिभिः॥

हृदा चतुष्पथं कार्यं सोमेन्द्राग्र कुशद्वयात्।

इत्यष्टादश संस्काराः कुण्डेप्रोक्तास्समासतः॥

इति।

वागीश्वरीवागीश्वरावाहनम्।

(क्रि) (२५) कुण्डस्याभ्यन्तरे समन्तादुत्थितैः कुशैरक्षपाटं
कवचेन विधाय [-चेनापिधाय], मध्ये कूर्चरूपं विष्टरं ओम्
हां वागीश्वरवागीश्वरासनाय [-गीश्वरीवागीश्वराभ्यां]
नमः इति दत्वा [ध्यात्वा देवीं-], तस्मिन् देवीमावाहयेद्विद्यां [-
येद्विद्वान्] विधिवद्विश्वमातरम्।

p. 419)

श्यामामामृतुमतीं [श्यामा-] ध्यात्वा,
सद्वासोमाल्यभुषणाम्॥
प्रसन्नवदनां पद्म पत्राभनयनत्रयाम्।
२५८- इति ध्यात्वा, ओं हां वागीश्वर्यै नमः इति। [-इति
वागीश्वर्यै नमः इति वागीश्वरं तद्वागीश्व-]
तद्वद्वागीश्वरञ्च ओं हां वागीश्वराय नमः इति
गन्धादिभिरभ्यर्च्य॥ (३२)

(प्र) अथ एवं संस्कृते कुण्डे किं कुर्यादित्याशंक्य

अक्षपाटासनविन्यासपूर्वं वागीश्वरीवागीश्वरावाहनमाह

(कुण्डस्य) इत्यादिना (अभ्यर्च्य) इत्यन्तेन। (समन्तात्) परितः।

(उत्थितैः) विन्यस्तैरित्यर्थः। (अक्षपाटम्) तिरस्करणीशाटिः।

अत्र वागीश्वरीवागीश्वरयोस्तदर्थं कुण्डाभ्यन्तरस्थकण्ठोपरि

परितः कुशचतुष्टयमास्तीर्यताम्। तथा

श्रीमज्ज्ञानरत्नावल्यां

अक्षपाटाय कण्ठोर्ध्वे कवचेन कुशान्न्यसेत्

इति। तथा श्रीरामनाथपद्धत्यां

कण्ठोर्ध्वं परितः पूर्वोत्तराग्रैर्वर्मणा कुशैः।

p. 420)

अक्षपाटम् इति। (विष्टरम्) दर्भकौप्तमासनम्।

विष्टरो विटपीदर्भमुष्टिः पीठाद्यमासनम् इत्यमरः। (तस्मिन्)

विष्टरे। वागीश्वरीध्यानमाह (देवीम्) इति। (विद्याम्) विद्याख्याम्।

तदुक्तं परा वागीश्वरी विद्या इति। (विधिवत्) शास्त्रोक्तेन क्रमेण।

(विश्वमातरम्) अशेषजगत्कारण भूतामित्यर्थः। (श्यामाम्)

श्यामवर्णाम्। (ऋतुमतीम्) ऋतुस्नातामित्यर्थः। तथा श्रीचिन्त्ये

ध्यायेद्यस्तु विशेषेण ऋतुस्नातां स यौवनाम्।

नीलोत्पलदलाभासाम्

इति। सुबोधमन्यत्। वागीश्वरध्यानमभिहितं

श्रीमज्ज्ञानरत्नावल्यां

दशबाहुं सितं सौम्यं पञ्चास्यं तिथिलोचनम्।

नादरूपन्तथा देवं देव्या बिन्दुस्वरूपया॥

सन्निधी भवतं वह्निजननाय युवामिति।

p. 421)

हृदाऽवाह्य समभ्यर्च्य तयोर्योगं विभावयेत्॥

इति॥

वह्निन्यासः॥

(क्रि) (२६) अरणेस्सूर्यकान्तात् द्विजगृहाद्वैश्यगृहात् स्वगृहाद्वा

[दिजग्रहात् स्वग्रहा-] वह्निं मृत्पात्रे ताम्रपात्रे वानीय [-नीय्य],

आग्नेय्यामैशान्यां [आग्नेयामै-] वा [-शान्यां नै-ऋत्यां]

निधाय, अग्निशकलं क्रव्यादार्थमस्त्रेण [-व्यादांशमस्ते-]

नैर्-ऋते [नै-ऋते) निस्सार्य,

निरीक्षणाद्यैश्चतुर्भिस्संस्कारैस्संस्कृत्य[-स्कारैर्विशोध्य], ओम्

हां [हं] हं हां वह्निमूर्तये नमः इति भूताग्निं पूरकेण

गृहीत्वा, हृदयेन कुंभकेन नाभ्यग्निना [-केनाभ्यग्निं-]

बिन्द्वग्निना च संयोज्य, रेचकेण निस्सार्य [-केणा निस्-], ओम् हां

[हां] हूं वह्निचैतन्याय नमः इति पात्रस्थेऽग्नौ विन्यस्य,

संहितयाऽभिपूज्य, संरक्ष्यावकुण्ठ्य, प्रासादेन वौषडन्तेन

धेनुमुद्रयाऽमृतीकृत्यादाय, कुण्डस्योपरि प्रदक्षिणन्त्रिः

परिभ्राम्य,

p. 422)

शिवबीजमिति ध्यात्वा, पितरौ ईशदिग्गतशिरसौ [ईशगताशि-] ध्यायन्

[ध्यायेरन्] वागीश्वरीगर्भनाड्यां [-गर्भनाढ्यां]

वागीश्वरेण क्षिप्यमाणं [-श्वरे निक्षिप्य-] विभाव्य,

भूमिष्ठजानुमूलेनात्मसंमुखं

[जानुमूलेनात्मसन्निभं] क्षिपेत्॥ (३२)

(प्र) अथ वह्निन्यासं ब्रूते (अरणेः) इत्यादिना (क्षिपेत्) इत्यन्तेन

। (अरणेः) अश्वत्थादिवह्निप्रभवकाष्ठादित्यर्थः। (वह्निम्) वहति

प्रापयति हव्यमिति वह्निः तम्। (मृत्पात्रे) अभिनवमृण्मयशरावे।

वह्निमूर्तिमन्त्रोद्धारः कृतः श्रीरामनाथपद्धत्यां अथ

हृदा पुटम्। आत्मबीजं वदन् वह्निमूर्तये नम इत्यपि इति।

(भूताग्निम्) भौतिकानलम्। (नाभ्यग्निना) औदर्यवह्निना।

(बिन्द्वग्निना) बैन्दवपावकेन। (संयोज्य) इति।

भौतिकजाठरबैन्दवाग्नित्रयमेकीकृत्येत्यर्थः।

तथा व्याहृतं श्रीमत्सोमशंभुचरणैः

p. 423)

औदर्यं बैन्दवं भौतमेकीकृत्यानलत्रयम् इति। (प्रदक्षिणम्)

सव्यक्रमेण। (परिभ्राम्य) इति। एतत् वागीश्वरीयोनिक्षोभा येति

भावः। तथा श्रीमज्ज्ञानरत्नावल्यां

योनि क्षोभाय कुण्डोर्ध्वे त्रिधा तं भ्रामयेद्धृदा इति।

(शिवबीजम्) परमेश्वरशुक्रमित्यर्थः। अत्र वह्नेः

शिवबीजत्वाभावे वागीश्वरीगर्भनाडी प्रक्षेपानुपपत्तिरिति

भावः। (पितरौ) पिता च माता च पितरौ वागीश्वरि

वागीश्वरावित्यर्थः। पिता मात्रा इत्येकशेषः।

(वागीश्वरीगर्भनाड्याम्) वागीश्वरीयोनावित्यर्थः।

(भूमिष्ठजानुः) भूतलस्थितजानुद्वय इत्यर्थः।

तथा श्रीमन्मतङ्गे

आत्मानं शिववद्ध्यात्वा ध्यायेदग्निन्तु बीजवत्।

सद्योजातेन मन्त्रेण भ्रामयित्वा त्रिधा शनैः ॥

जानुभ्यामवनिं गत्वा इति ॥

p. 424)

वह्निविन्यासानन्तर करणीयविधिः ॥

(क्रि) (२७) ततो नाभिदेशे समूह्य, परिधानस्य संवृतिं विभाव्य,

शौचाचमनार्थं तोयबिन्दुं [-बिन्दु] हृदा [हृदा] दत्वा, कवचेन

सदिन्धनैराच्छाद्य, अस्त्रेण प्रज्वाल्य, ओम् ह्रां ह्रूं गर्भाग्नये

[-ओम् ह्रां गर्भा-] नमः इति गर्भाग्निं संपूज्य,

गर्भरक्षार्थमस्त्रजप्तदर्भकंकणं देवीहस्ते [देविहस्ते]

बद्ध्वा ॥ (२३)

(प्र) अथ वह्निविन्यासानन्तर करणीन्याह (ततः) इत्यादिना

(बध्वा) इत्यन्तेन । (नाभिदेशे) नाभिर्नाम कुण्डमध्यवर्ती

पद्माकारोऽवयवविशेषः । तथा श्रीमत्कामिके

नाभिस्स्यात् कुण्डमध्ये तु सार्द्धमानेन निर्मिता ।

तच्चतुर्थांशतोऽतुंगापद्माकारं यथा भवेत् ॥

इति । तस्याः देशे । (समूह्य) समूहनं विधाय, नाभिदेशेवह्नौ

p. 425)

विक्षिप्ते सति परितो व्यस्तन्तमे अत्र पुञ्जीकृत्येति यावत्। (परिधानस्य)
वस्त्रस्य। (संवृतिम्) आच्छादनम्। (अस्त्रजप्तदर्भकंकणम्) इति।
अत्र शुभं कणतीति कंकणति सरतीति वा कंकणं हस्ताभरणम्
। प्रतिसरो वा कंकणं करभूषणम्। कंकणं स्यात् प्रतिसरः
इति नैघण्टुकाः। (देवीहस्ते) वागीश्वरी दक्षिण हस्ते। तथा
श्रीमत्स्वतन्त्रे

सप्त वारास्त्रजप्तेन दर्भेणैवास्त्रकंकणम्।
बध्नीयाद्दक्षिणे हस्ते अस्त्रमन्त्रमनुस्मरन्॥
रक्षार्थमग्निगर्भस्य

इति।

गर्भाधानादिसंस्कारविधिः॥

(क्रि) (२८) गर्भाधानाय सद्योजातेनाभ्यर्च्य, हृदयेनाहुतित्रयं
तिलैर्दत्वा, पुंसवनार्थं

p. 426)

तृतीये मासि वामदेवेभ्यर्च्य [-देवेनाभ्य-],
शिरसाऽहुतित्रयन्तिलैर्दत्वा [-त्रयं हुत्वा-], जलबिन्दुं विनिक्षिप्य,

सीमन्तीन्नयननिमित्तं षष्ठे मास्यघोरेणाभ्यर्च्य,

शिखयाऽहुतित्रयं दत्वा, शिखयैव वक्त्रांगकल्पनानिष्कृतिञ्च

[-कल्पनां निष्कृ-] विधाय, जननार्थं दशमे मासि

पुरुषेणाभ्यर्च्य, कवचेन तिस्राहुतीर्दत्वा, जाते

गर्भमलापहस्नानार्थं [-दला गर्भ-]

वह्निन्दर्भाद्यैस्सन्धुक्ष्य [वह्निदर्भा],

देवीहस्तदर्भकंकणमुन्मुच्य [हस्तस्तन्दर्भ-], स्वर्णबन्धनं

देव्याः कृतमिति [देव्याकृत-] ध्यात्वा, हृदाभ्यर्च्य,

सद्यस्सूतकनिवृत्तये कुण्डमस्त्रांबुना [-मस्त्राम्भसा]

संसिच्य, दर्भेणास्त्रेणाताड्य, कवचेनाभ्युक्ष्य,

वह्निरक्षार्थं

पूर्वादिमेखलासूत्तरपूर्वाग्रान्दर्भानस्त्रेणास्तीर्य, तेषु

परिधिविष्टरान् [-विष्टनान्] संस्थाप्य, वक्त्राणां

p. 427)

लालापनोदनायाग्नेः पुष्टये च मूलाग्रयोर्घृताक्ताः

पञ्चसमिधः खड्गेन हुत्वा, पूर्वपश्चिमदक्षिणोत्तरासु दिक्षु [-

त्तरदिक्षु] ओं हां ब्रह्मणे नमः ओं हां विष्णवे नमः ओं

हां रुद्राय नमः ओम् हां अनन्ताय [ईश्वराय] नमः इति

परिधिस्थान् [परिस्थानं] संपूज्य, विष्टरेषु पूर्वादिदिक्षु ओम्

हां इन्द्राय नमः [विष्टरे इन्द्राद्यष्टदिक्षु ओं हां इन्द्रा-] ओम्

हां अग्नये नमः ओम् हां यमाय नमः ओं हां निर्-ऋतये [नि-
ऋतये] नमः ओम् हां वरुणाय नमं ओम् हां वायवे नमं ओम्
हां कुबेराय [सोमाय] नमः ओम् हां ईशानाय नमः
ऊर्ध्वभागमुद्दिश्य ऐशान्यां ओम् हां ब्रह्मणे नमः [-
नमः ओं हां ब्रह्मणे नमः ऐशान्यां ओं हां विष्ण-]
अधोभागमुद्दिश्य नैर्-ऋत्यां ओं हां विष्णवे नमः इति
संपूज्यार्घ्ययित्वा, विघ्नसंघातं निवार्य, बालकं [निवार्य
विघ्नसंघातं बाल-] पालयिष्यथेति शिवाज्ञां श्रावयेत्॥

p. 428)

ततस्स्रुक्स्रुवौ सकुशावूर्ध्ववदनाधोमुखौ
[-कुशादादूर्ध्ववदनायोमुखौ-] गृहीत्वा [ग्रहीत्वा], अस्त्रेण
संप्रोक्ष्य, कवचेनाभ्युक्ष्यावकुण्ठ्य, अग्नौ [-वकुण्ढ्याग्नौ-]
प्रताप्याभ्राम्य, कुशाग्रेण तदग्रं संस्पृश्य पुनः
परिभ्राम्य, मध्येन मध्यं संस्पृश्य पुनः परिभ्राम्य
मूलेन मूलं संस्पृश्य, तयोः कुशस्पृष्टप्रदेशेषु [-भ्राम्य
मूलेन मूलं संस्पृश्यतयो-] शिवविद्यात्माख्यं तत्वत्रयं
रुद्रत्रयं रुद्रविष्णुब्रह्माख्याधिपसंयुतं क्रमात् [-धिपं
संयुक्तं क्रमात्-] ओम् हूं [हं] हीं हां शंबैरैर्विन्यस्य,
स्रुचिशक्तिं स्रुवे शंभुं न्यस्त्वा वर्मणा [-शंभु विन्यस्त्वा
वर्म-] त्रिसूत्रीवेष्टितग्रीवावात्मनस्सव्यभागे कुशोपरि मूलेन

[मूले *] संस्थाप्य, हृदा [हृदा] संपूजयेत् [संपात्य?] ॥

अथ गव्यमाज्यमानीय वीक्षणादिभिर्विशोद्धय स्वदेहं

ब्रह्ममयं विचिन्त्यादाय, कुण्दस्योर्ध्वं त्रिधाऽवर्त्य, अग्निगोचरे

तापयित्वा [दापयित्वा],

p. 429)

आग्नेय्यां स्थापयित्वा [संस्थाप्य], दर्भाग्रेण

घृतबिन्दुमादाय, ओम् हां ब्रह्मणे स्वाहा इति हुत्वा,

पुनर्विष्णुमयं [-हुत्वा स्थापकं पुन-] स्वदेहं ध्यात्वा,

ऐशान्यामधिश्रित्य, कुशाग्रेणाज्यविन्दुं ओं हां विष्णवे

स्वाहा इति हुत्वा, पश्चात् [-हुत्वा अधिश्रवणं पश्चा-] स्वमूर्तिं

रुद्रमयीं मत्वा, नाभौ धृत्वा, ओं हूं [हां] रुद्राय

स्वाहा इत्याज्यबिन्दुं कुशाग्रेण जुहुयादित्युद्वास्य,

प्रादेशमात्रदर्भाग्रद्वयनिर्मितं

मध्यग्रन्थिपवित्रकमंगुष्ठानामिकाभ्यां [-देशामात्रं

दर्भाग्रद्वयं निर्मितं मध्य-] गृहीत्वा,

अस्त्रेणाज्यमग्निसन्मुखं त्रिधा उत्प्लावयेत्।

तद्वदात्मसन्मुखं संप्लवनं हृदा कृत्वा,

तत्पवित्रग्रन्थिमुन्मुच्याग्नौ [-वित्रग्रन्धिमुमुच्य-] क्षिप्त्वा,

हृदाऽभिमन्त्रितदग्धदर्भोल्मुकमस्त्रेण घृते क्षिप्त्वा,

पवित्रीकृत्य, तदप्यग्नावस्त्रेण क्षिपेत्।

p. 430)

दीप्तेनान्येन दर्भेण कवचेन [कवचेना] नीराज्याग्नौ क्षिप्त्वा,
अपरेण दीप्तेनास्त्रेण सन्दीप्य तदप्युल्मुकं [-दीप्य तदत्युल्मुक]
वह्नौ क्षिपेत् ॥
ततः प्रादेशमात्रमध्यग्रन्थिकुशद्वयं [-देशमात्रं
मध्य-] प्रणवेन घृतमध्ये न्यस्त्वा, स्वदक्षिण [-स्त्वादक्षिण]
वामक्रमेण शुल्ककृष्णपक्षद्वयं [शुक्लकृष्ण-] विभाव्य,
दक्षिणवामक्रममध्यभागेषु [-द्वयदक्षिण- -वाममध्य-]
पिंगलेडासुषुम्ना [पिङ्गलेडान्सुषुम्ना] नाडीत्रयञ्च
संकल्प्य, सव्यभागान् स्रुवेणाज्यमादाय, ओम् हां अग्नये स्वाहा
इत्यग्नि दक्षिणनेत्रे, वामभागादाज्यमादाय [-माजं गृही ओं
हां सोमा-] ओं हां सोमाय स्वाहा इत्यग्निवामनेत्रे
मध्यादादाय [मध्यभागादादाय], ओम् हां अग्नीषोमाभ्यां
स्वाहा इत्यग्नि मध्यनेत्रे, ओम् हां अग्नये स्विष्टकृते स्वाहा इत्यग्नि
वक्त्रे च स्वा इति किंचिद्धुत्वा, शेषमाज्यं तत्तदाज्यभागेषु हा इति
क्षिपेत् शुक्लपक्षे ।

p. 431)

कृष्णपक्षे तु ओम् [शुक्लपक्षे तु ओम् हां सोमाय] हां सोमाय
स्वाहा ओं हां अग्नये स्वाहा ओं हां सोमाग्निभ्यां स्वाहा ओं

हां अग्नये स्विष्टकृते स्वाहा इति वामदक्षिणमध्यभागेभ्य
आज्यमादाय, अग्नेर्वामदक्षिणमध्यनेत्रेषु [-इति अग्नेर्वाम-]
वक्रे च पूर्ववत् हुत्वा, आज्यं संहितयाऽभिमन्त्र्य [-
संहितायाऽभि-], संरक्ष्यावकुण्ठ्य, मूलेन
धुनुमुद्रयाऽमृतीकृत्य मूलेन संपूज्य [-वकुण्ढ्य
धेनुमुद्रं मुद्रयामुद्रीकृत्य-],
हृदयेनाज्यबिन्दुक्षेपादन्याज्यशोधनं कुर्यात्। तदनु ओम् हं
[हां] सद्योजाताय स्वाहा ओम् हिं [हीं] वामदेवाय स्वाहा ओं
हुं अघोराय स्वाहा ओम् [देवाय स्वाहा ओं हें-] हें तत्पुरुषाय
स्वाहा ओं हों ईशानाय स्वाहा इत्येकैकया घृताहुत्या
अग्निवक्राभिघारं [-वक्राणामाधारं] ओम् हं हिं [हीं]
सद्योजातवामदेवाभ्यां स्वाहा ओम् हिं हुं
वामदेवाघोराभ्यां स्वाहा ओम् हुं हें अघोरतत्पुरुषाभ्यां

p. 432)

स्वाहा ओं हें हों तत्पुरुषेशानाभ्यां स्वाहा इति
वक्रानुसान्धानं ओं हं हिं [हीं] हुं हें हों
सद्योजातवामदेवाघोरतत्पुरुषेशानाभ्यस्स्वाहा [-नाभ्यां
स्वाहा] इत्यग्नितो वायुं गतया निर्-ऋतित ईशानं [नि-ऋति इर्शा-]
गतया घृताहुत्या अग्निवक्रैकी करणं [-हुत्य वक्रेकीक-]
विदध्यात्। ततो नामकरणार्थमीशेनाभ्यर्च्य [-मीशानेनाभ्य-],

अस्त्रेणाहुतित्रयन्दत्वा, शिवाग्निस्त्वं [-दत्वा ओम् हां शिवा-]

हुताशनेति नाम [नामं] कृत्वा ॥ (९८)

(प्र) अथ वह्निविन्यासमुपन्यस्य

तदानुषंगिकगर्भाधानादिसंस्कारान् गन्धाद्यैरर्च्य सद्येन

हृदा दत्वाऽहुतित्रयम् इत्यादिश्रीमत्किरणश्रुतेः

सद्यादिब्रह्मभिरभ्यर्च्य अनेन हृदयादिभिः

प्रतिसंस्कारमाहुतित्रयेण निर्वर्तयेदित्याह (गर्भाधानाय)

इत्यादिना (नाम कृत्वा) इत्यन्तेन ॥

p. 433)

तत्र प्रथमं गर्भाधान संस्कारविधिमाह

(गर्भाधानाय) इति । (सद्योजातेन) इति । अत्र

तद्रूपशिवस्मरणपूर्वकं पूजनं कार्यमित्यभिहितं

श्रिमत्षट्सहस्त्रिकायां

योनौ तु बीजवत् क्षिप्त्वा सद्योमन्त्रं शिवं स्मरन् ।

सद्योजातेन तु हृदा दद्यादाहुतिपञ्चकम् ॥

गर्भाधानं भवेदेवम्

इति । एवं पुंसवनादिष्वपि

वामदेवादिरूपशिवस्मरणादिपूर्वकं पूजनं कार्यमिति

षट्सहस्त्रिकायां मित्यनुसन्धेयम् ॥

पुंसवनसंस्कारमाह (पुंसवनम्) इति । (पुंसवनार्थम्)

पुंसवनं पुरुषो भव मास्त्रीति तदर्थं पुरुष

परिकल्पनार्थमिति यावत् । पुमान् स्त्रूयतेऽनेनेति पुंसवनम् ।

p. 434)

किन्तु पुंसवने बिन्दुमपां दर्भेण निक्षिपेत् ।

जीवमित्यभिसन्धाय ब्रूयाद्भव पुमानिति ॥

इति श्रीमन्मृगेन्द्र श्रुतेः कुशाग्रेणार्घ्यजलकणं पुमान् भवेति

गर्भस्थस्याग्नेश्चैतन्याभिसन्धानार्थं निक्षिपेदित्याह

(जलबिन्दुम्) इति ॥

सीमन्तोन्नयन संस्कारमाह (सीमन्त) इति ।

(सीमन्तोन्नयननिमित्तम्) सीमा अवयवानामवधिः मर्यादा

तस्यान्तो यः समाप्तिः तस्य उन्नयननिमित्तं परिकल्पनार्थम् ।

(वक्रांगकल्पनाम्) शिरोवदनग्रीवोरुपादाद्यवयवकौप्तिम् ।

अनेन कर्मणात्र शिवाग्नेर्वपुः निष्पन्नमिति मन्तव्यम् ।

तथा श्रीमन्मृगेन्द्रे

वपुस्स्त्रीसीमसीमन्ते दर्भेण प्राक् पकल्पयेत् इति । (निष्कृतिं च)

निश्शेषकरणं च ।

p. 435)

एवमाख्यातं श्रीमत्सोमशंभुपद्धतिव्याख्याकारेण ।
वक्रांगकल्पनार्थं निष्कृत्यर्थञ्चात्र शिखामन्त्रेण
त्रिवारं प्रत्येकं जुहुयात् । तथा श्रीरामनाथपद्धत्यां

संपूज्य शिखया हुत्वा त्रिधा वक्रांगकौप्तये ।
उद्घाटनाय वक्राणां निष्कृत्यैव च तथा त्रिधा ॥

इति । निष्कृत्यर्थं पंचदशवारं हुनेदिति केचित् ॥
जातकर्मसंस्कारमाह (जननार्थम्) इति । (सन्धुक्ष्य) वह्निं
दर्भाद्यैस्सन्दीप्येत्यर्थः । तथा श्रीमज्ज्ञानरत्नावल्यां
वह्निमुद्दीप्य दर्भाद्यैर्जातं बालंशिवात्मजम् इति ।
(दर्भकंकणम्) दर्भकृतवलयम् । कंकणं करभूषणम्
इत्यमरः । (स्वर्णबन्धनम्) कनकपट्टम् । तथा
श्रीरामनाथपद्धत्यां

p. 436)

स्वर्णपट्टविभूषितां ध्यात्वा इति । (पूर्वादिमेखलासु)
पूर्वादिमध्यमेखलास्वित्यर्थः । तथा श्रीमत्सुप्रभेदे

एकमेखलकुण्डञ्चेन्मेखलायां परिस्तरेत् ।

स्थण्डिले सैकताद्वाह्ये परिस्तरणमुच्यते ॥

द्विमेखले द्वितीये च मध्यमे च त्रिमेखले

इति । (तेषु) परिस्तरणदर्भेषु । (परिधिविष्टरान्) परिधयश्च

कुण्डपरिस्तरणशाखाः परिधिर्यज्ञियतरौ इत्यमरः । विष्टराश्च

दर्भमुष्टयः परिधिविष्टराः तान् । परिधिलक्षणमुक्तं

श्रीमत्कामिके तन्माना ऋजवस्सार्द्रास्तत्कुण्डसमिदुद्भवाः ।

निर्व्रणाश्च समच्छेदाः प्रोक्ताः परिधयस्समाः इति ।

विष्टरलक्षणमुक्तं श्रीमत्किरणे

शुद्धस्थानसमुत्पन्नाः कोमला ऋजवश्शुभाः ।

ख्याश्मशानवल्मीकचतुष्पथविवर्जिताः ॥

p. 437)

तैरेव विष्टरः कार्यस्त्रिंशद्दर्भकृतस्समः ।

हस्तमात्रप्रमाणस्स्याद्वेणिका वेष्टिका तथा

इति । (लालापनोदनाय) लाला आस्यस्यंदीनी दन्तान्तर्गतोदकमिति

यावत् । सृणिका स्यन्दिनी लाला इत्यमरः । तस्याः अपनोदनाय

अपोहनाय । परिधिदेवतार्चनमाचष्टे (पूर्व) इति ।

विष्टराधिदेवतापूजामाह (विष्टरेषु) इति । (ऐशान्याम्) इति ।

ईशानस्य दक्षिणत इत्यर्थः । (नैर्-ऋत्याम्) इति ।

निर्-ऋतेरुत्तरत इत्यर्थः । (बालकम्) अग्निशिशुम् ।

परिधिविष्टराधिदेवताः हुतवहाभिमुखा ज्ञेयाः ।

तथोक्तं श्रीमत्सोमशंभुचरणैः

पूर्वाद्युत्तरपर्यन्तं परिधिस्थाननुक्रमात् ।

इन्द्रादीशानपर्यन्तान् विष्टरस्थाननुक्रमात् ॥

p. 438)

अग्नेरभिमुखी भूतान्निजदिक्षु हृदाऽर्चयेत् ।

इति । अथ स्रुक्स्रुवसंस्कारमतिदिशति (ततः) इति । (स्रुक्स्रुवौ) स्रुक्क

स्रुवश्च तौ । स्रवत्यधोमुखं घृतादिकमिति स्रुवः

यज्ञोपकरणम् । एतयोर्लक्षणमुदितं श्रीमन्मृगेन्द्रे

ब्रह्माश्वत्थशमीपर्णशिंशपादिमहीरुहः ।

द्व्यंगुष्ठपर्वगोऽङ्गुष्ठदण्डो हस्तायतिस्स्रुवः ॥

गोष्पदाभार्द्धविष्कंभः कर्षाधारावटश्रियै ।

विपर्ययोऽधिकन्यूनव्यंगवक्त्रवपुर्मतः ॥

षडंगायतिरष्टांगरसवेदेककन्धरा ।

पञ्चत्वद्रिमुखा हस्ता कन्यसा पृथुनिर्गमा ॥

वेदवृत्तादिपृथुता संस्थितिस्त्रिकलावटा ।

भागार्द्धमेखला शेषचित्रपत्रादिभूषणा ।

वेद्यर्धसंमिताशाग्रगण्डिकासक्तवेदिका ।

षण्णाहदण्डभागार्द्धनिवृत्तकलशोद्गता ॥

p. 439)

स्रुग्वराङ्गलिगोकर्णप्रणालाभपरिस्रुतिः ।

इति । (प्रताप्य) इति । अनेन स्रुक्स्रवयोः काष्ठत्वं निरस्तमित्यवसेयम् ।

तथा श्रीमज्ज्ञानरत्नावल्यां

तत्काष्ठत्व निरासाय वीक्षणादि विशोधितौ ।

प्रताप्य स्रुक्स्रुवावेतौ

इति । (तदग्रम्) स्रुक्स्रुवाग्रम् । अग्रस्पर्शः शिवतत्वप्रकल्पनार्थः ।

(मध्येन) दर्भमध्येन । (मध्यम्) स्रुक्स्रुवमध्यम् ॥

विद्यातत्वन्यासाय मध्यस्पर्शः ।

मूलस्पर्शस्त्वात्मतत्वन्यासायेत्येवमाख्यातं

श्रीमत्किरणव्याख्याकारेण । (ओं हूं ह्रीं हां शंबरैः)

शिखाशिरोहृदयबीजमन्त्रैः । तथा श्रीरामनाथपद्धत्यां

हृच्छिरोज्वालिनी बीजैस्तेषु तत्वत्रयं न्यसेत्

इति। अत्र ओं हूं शिवतत्वाय नमः ओं हूं शिवतत्वाधिपतये रुद्राय नमः एवं विद्यातत्वाद्यमपि विन्यसेत्।

p. 440)

भुक्त्यर्थिनामयं क्रमो ज्ञेयः।
मुमुक्षूणान्तु स्रुक्स्रुवमूलमध्याग्रेषु
आत्मविद्याशिवतत्वव्याप्त्या संस्पृशेदिति प्रदर्शितं
श्रीमन्मृगेन्द्रवृत्तिकारेण। (सव्यभागे) दक्षिणपार्श्व इत्यर्थः।
तथा श्रीमत्सुप्रभेदे दर्भोपरि तथा स्थाप्य स्रुक्स्रुवावपि दक्षिणे
इति। (संस्थाप्य) इति। अधोमुखौ प्रतिष्ठाप्येत्यर्थः। तथा
श्रीमन्मृगेन्द्रे विधायावङ्मुखौ स्थाप्यौ सव्यतः कुशविष्टरे
इति। अत्र उक्तस्रुक्स्रुवाभावे पलाशपर्णादिभिस्तौ कुर्यात्। तथा
श्रीमत्किरणे

अभावे तु स्रुवञ्चापि पलाशौदुंबरैर्दलैः।
किंशुकस्य दलैर्वापि इति॥

स्रुक्स्रुवसंस्कारं समीरयित्वा आज्यसंस्कारं कथयति

(अथ) इति । (गव्यम्) गोविकारम् । (आवर्त्य) परिभ्राम्य ।

p. 441)

अयंपर्यग्निकरणाख्य संस्कार इत्युच्यते । तथा

श्रीमज्ज्ञानरत्नावल्यां

त्रिधा तद्भ्रामयेत् कुण्डे पर्यग्निकरणं हि तत् इति । (तापयित्वा)

तापनाख्यसंस्कारं कृत्वा । अत्र ओम् हां ब्रह्मणे स्वाहा इति

मन्त्र होमेन तापनाख्यसंस्कारः कृतः । एवमुत्तरत्रापि बोध्यम्

। तथोक्तं

स्वकां ब्रह्ममयीं मूर्तिं धृत्वाऽदाय कुशाग्रतः ।

ब्रह्मणे जुहुयाद्बिन्दुं स्वाहान्त हृदयाणुना ॥

तापनं तत् समाख्यातं पुनर्विष्णुमयं स्वयम् ।

ईशकोणे घृतं धृत्वा विष्णवे जुहुयात् ततः ॥

इत्यधिश्रयणं ख्यातं नाभौ धृत्वा तथा घृतम् ।

रुद्रो रुद्राय तद्दद्यादुद्वासनमितीरितम् ॥

क्वचिदेतत्त्रयं प्रोक्तं हृच्छिरश्चूलिकाणुभिः । इति ।

(प्रादेशमात्रदर्भाग्रद्वयनिर्मितम्) प्रादेशमात्रं

p. 442)

प्रादेशप्रमाणं प्रादेशो नाम प्रसृततर्जन्यंगुष्ठः
संकुचितान्यांगुलिः पाणिः। प्रादेशतालगोकर्णास्तर्जन्यादि युते
तत्त्। अङ्गुष्ठे इत्यमरः। तच्च तत् दर्भाग्रद्वयञ्च
अखण्डितमूलाग्रदर्भद्वयमित्यर्थः तेन निर्मितम्।
(मध्यग्रन्थिपवित्रकम्) मध्ये ग्रन्थिः ब्रह्मग्रन्थिः यस्य तत्
मध्यग्रन्थि तच्च तत् पवित्रकम्। (अंगुष्ठानामिकाभ्यां
गृहीत्वा) इति। अत्र वामकराङ्गुष्ठानामिकाभ्यां मूलभागं
तदितरांगुष्ठानामिकाभ्यां अग्रभागं गृह्णीयादिति बोध्यम्।
तथा श्रीमज्ज्ञानरत्नावल्यां

अखण्डिताग्रमूलाश्च कुशाः प्रादेशमात्रकाः।
घृतसंस्कृतये योज्या नेतरे शुभदा भृशम्॥
कुशकाण्डद्वयं मध्ये ब्रह्मग्रन्थिकृता स्पदम्।
द्विहस्तांगुष्ठानामाग्रे तन्मूलाग्रं निगृह्य च॥ इति। (उत्प्लवेत्)
उत्प्लवं कुर्यात्।

p. 443)

अत्र उत्प्लवविधानानन्तरं तद्दर्भद्वयं मुक्तग्रन्थिं विधाय
वह्नौ विनिक्षिपेत्। (तद्वत्) इति। अत्र अन्येन तादृग्विधदर्भद्वयेन
संप्लवनं विदध्यादिति बोध्यम्। तथा श्रीरामनाथपद्धत्यां

मध्यग्रन्थियुतं दर्भद्वयं प्रादेशसंमितम्।

आदायानामिकांगुष्ठैर्वह्निसंमुखमुत्प्लवम्॥

शस्त्रेण कृत्वा तं मुक्तग्रन्थिं वह्नौ विनिक्षिपेत्।

तद्वत्तादृशदर्भेण हृदयेनात्मसंमुखम्॥

कृत्वा संप्लवनं प्राग्वत्तदग्नावपि निक्षिपेत्। इति॥

उत्प्लवस्तावत् अग्निज्वालोन्मुखं त्रेधोदीरणम्। संप्लवनं

उन्नयनम्। सूक्ष्मरूपाणां

विघ्नानामूर्ध्वगमनमुत्प्लवनम्। तेषामेव विघ्नानां

सर्वथाऽधोगमनं संप्लवनमित्यभिहितं

श्रीमद्वालज्ञानरत्नावल्याम्। (अभिमन्त्रितदग्धदर्भोल्मुकम्) इति।

p. 444)

अत्र उल्मुकशब्देनालातमुच्यते। अंगारोऽलातमुल्मुकम् इत्यमरः।

(पवित्रीकृत्य) इति। अत्र हृन्मन्त्रितदग्धदर्भस्य शस्त्रमस्त्रेण यः

प्रक्षेपस्तेन तदाज्यं परिशुद्धं कृतमित्यवसेयम्। तथा

समाख्यातं श्रीमत्सोमशंभुचरणैः

हृदालब्धदग्धदर्भशस्त्रक्षेपात् पवित्रयेत् इति। (नीराज्य)

नीराजनसंस्कारं कृत्वा। (दक्षिणवामक्रमेण) आत्मनः

सव्यापसव्यक्रमेण। (संकल्प्य) इति। घृते प्रविष्टं

भावयित्वेत्यर्थः। (सव्यभागात्)

पिंगलानाडीगतवह्निभागादित्यर्थः। (आज्यम्) तेजोमयघृतम्।

(दक्षिणनेत्रे) दक्षिणनेत्राग्नौ। (वामभागात्)

इडानाडीगतचन्द्रभागात्। (आज्यम्) अमृतमयघृतम्। (वामनेत्रे)

वामनयनचन्द्रे। (मध्यात्)

सुषुम्नागताग्नीषोमात्मकमध्यभागात्।

p. 445)

(आज्यम्) तदुभयात्मकघृतम्। (मध्यनेत्रे) तथाविधललाटनेत्र

ज्योतिषि। (अग्निवक्त्रे च) सोमानलात्मकज्वलनवदने। एवमुपपादितं

श्रीमता ज्ञानरत्नावलीकारेण। (अग्नये स्विष्टकृते स्वाहा) इति।

एतदाहुतिं सव्यभागादाज्यमादाय दद्यात्। तथा

श्रीरामनाथपद्धत्यां

घृतं भागत्रये स्विष्टकृते स्वेति ज्वलन्मुखे।

हेत्युक्त्वा जुहुयाच्छिष्टं घृतभागत्रयेपि च॥ इति।

(तत्तदाज्यभागेषु) ते ते आज्यभागाः तत्तदाज्यभागाः तेषु।

यद्यद्भागात् घृतमाहृतं तत्तद्भागे इत्यर्थः।

अग्न्याद्याहुतयो नेत्रोद्घाटनार्थमत्रेति मन्तव्यम्।

तथा व्याहृतं श्रीमत्सोमशंभुचरणैः उद्घाटनाय

नेत्राणामग्नेर्नेत्रत्रये मुखे इति। (शुक्लपक्षे) पूर्वपक्षे।

(कृष्णपक्षे) अपरपक्षे। पक्षौ पूर्वापरौ शुक्लकृष्णौ इत्यमरः

।

p. 446)

कृष्णपक्षे चन्द्रमसः क्षीयमाणतेति कृत्वा

प्रथमन्तदाप्यायनाय सोमस्तर्प्य इति उपदिष्टं भगवता

मृगेन्द्रवृत्तिकारेण ॥

अत्र आज्यस्य वीक्षणाद्यमृतीकरणान्ताः संस्कारा

अष्टादश इत्यवधेयम्। तथा श्रीमज्ज्ञानरत्नावल्यां

वीक्षणाद्याश्चतस्रश्च वह्नौ तद्भ्रमणं त्रिधा।

तापनाधिश्रयोद्वा समुत्प्लवस्संप्लवस्तथा ॥

पूतनीराजनोद्योतमन्त्र द्योतनमन्त्रणम्।

रक्षाकुण्ठनरोच्यं च घृतेऽष्टादश संस्कृतिः ॥

कर्तव्या मन्त्रपूता च तदा तदमृतं भवेत्। इति ॥

इत्थमाज्यसंस्कृतिमुदाहृत्य वक्राभिघार तत्सन्धान

तदेकीकरण विधिमतिदिशति (तदनु) इति। (अभिधारम्) दीपनमित्यर्थः

।

p. 447)

तथा श्रीमत्षट्सहस्त्रिकायां वक्राभिघारः कथितो वक्राणां
दीपनम् इति। यद्वा अभिधारन्नाम तद्वक्रे पृथक्
पृथगाहुतिदानम्। सन्धानं नाम समष्टीकृतोच्चारेण
द्वयोर्वक्रयोरेकाहुतिदानम्। वक्रैकीकरणं नाम
पंचवक्राणामेकोच्चारेणाग्नितौ वायुगतया निर्-ऋतित
ईशानगतयाऽविच्छिन्नया घृताहुतिधारया
तत्तदभिवांछितवक्रे शेषवक्राणामन्तर्भावं विभाव्य
तत्तदूर्ध्वगतवक्रस्य विवृतास्यकुण्डप्रमाणतया विभावनम्॥
उक्तं च वक्राणामभिघारोऽग्नेस्संध्यानं च
मुखैकता।

सद्येन जुहुयादाज्यं पश्चिमास्ये हविर्भुजः॥
वामेनोदङ्मुखे हुत्वा दक्षास्ये बहुरूपिणा।
पुंसा प्राग्वदनेचोर्ध्वमुखे चैशानमन्त्रतः॥

p. 448)

एकैकया घृताहुत्या तिसृभिर्वाभिघारणम्।
कथ्यते वक्रसन्धानं पञ्चाज्याहुतयो यथा॥
जुहुयादजवामाभ्यां स्रुवेणाज्यन्तदास्ययोः।
जुहुयाद्वामघोराभ्यां तद्वक्रद्वितये घृतम्॥
घोरतत्पुरुषाभ्यां तु तद्वक्रद्वितये घृतम्।

जुहुयात्पुरुषेशाभ्यां वदनद्वितये घृतम् ॥

ऐशे च जुहुयादाज्यं तद्वक्त्रे शिववाचकम् ।

एका वा वक्त्रसन्धाने तिस्रो वाऽहुतयो मताः ॥

कथितं वक्त्रसन्धानं कथ्यते च मुखैकता ।

सद्यादिपञ्चवक्त्रेभ्यो घृतधारां क्षिपेद्यथा ॥

अग्निकोणमथारभ्य वायुकोणान्तनीतया ।

निर्-ऋतेः कोणमारभ्य रुद्रकोणान्तनीतया ॥

कुर्वीत वदनैकत्वमविच्छिन्नाज्यधारया ।

इति । अत्रान्तरे प्रसंगात् एकैकाहुतिदानेन

p. 449)

जिह्वादीपनमाचरेत् इति केचिद्विस्तररुचय ऊचिरे इति व्याहृतं श्रीमता

सोमशंभुपद्धति व्याख्याकारेण ॥

अग्नेर्नामकरणसंस्कारं ब्रूते (ततः) इति । अत्र इत्थं

पारमेश्वरैर्गर्भधानादिभिः पंचभिः संस्कारैरग्निः

शुद्धः कृतः अन्यथा शिवावाहनाद्यनुपपत्तिरिति तात्पर्यम् ।

तथा श्रीमत्सर्वज्ञानोत्तरे

नाशिवश्शिवकर्माणि कुरुते किं कदाचन ।

तदर्थन्तु शिवः कार्यो यत्नेन तु हुताशनः ॥ इति ॥

गर्भाधानादिसंस्कारानन्तरकरणीयविधिः ॥

(क्रि) (२३) हृदयेन वागीशी वागीशावभ्यर्च्य [वागीशावागीशा-],

विसृज्य, कुण्डमानं यथाऽभिलषितं वक्रं परिकल्प्य,

मध्यजिह्वायां चूडान्तसंस्कारपूरणार्थं

वौषडन्तमूलेन पूर्णान्दद्यात्।

p. 450)

तद्यथा सर्पिषा स्रुचमापूर्य, पुष्करोपर्यधोमुखं [-

पर्यथोमुखं-] स्रुवं कृत्वा, तदग्रे पुष्पन्दत्वा [-दग्रे च पुष्प-

] वामदक्षिणहस्ताभ्यां शंखवत् संसक्ताभ्यां

[संसप्ताभ्यां] पुरस्सव्येन [पुनस्सव्-] संलग्नौ तावुपादाय [-

वुभादाय] समपादस्समुत्थाय [-समुद्धाय ऊद्ध्र्वकायो

सामनाभ्यां] समुद्गतोर्ध्वकायोनाभ्यां तिर्यग्विधाय,

स्रुगग्रदत्तदृष्टिर्वौषडन्तमूलमुच्चरन् [-मूले मुच्चरन्-]

वामस्तनान्तं स्रुङ्मूलमानीयानुद्विग्नोधवप्रमाणधारया

[-स्रुङ्मूलेमानीय अनुद्वग्नौ यव प्रमाण-] समस्तमाज्यं

वह्नौ क्षिपेत्। इति पूर्णां विधायोपविश्य ॥ (९५)

(प्र) अथ गर्भाधानादिसंस्कारविधिमुपवर्ण्याधुना तदनन्तर

करणीयान्युदाहरति (हृदयेन) इत्यादिना (उपविश्य) इत्यन्तेन।

(विसृज्य) इति। अत्र देवीं सन्तर्प्य संहृत्य इति श्रुतेरा

हुतिदानानन्तरं विसृजेदिति केचित्। (कुण्डमानम्) कुण्डप्रमाणम्।

p. 451)

(यथाऽभिलषितम्) यथा वाञ्छितम्। अत्र

ईशानवक्त्रैकीकरणवदन्येषु वदनेष्वपि

ईशानं मूर्तये होमः पुरुषेत्वणिमादिकम्।

प्रायश्चित्तादिकं घोरे तथा स्यात् क्रूरकर्मणि॥

वश्याकर्षणहोमार्थं वामदेवेन होमयेत्।

नित्यकर्म विधानं तु वक्त्रेऽस्मिन् पश्चिमे हितम्॥

इति श्रीमद्बृहत्कालोत्तर वचनेन कृत्यानुगुणमन्योन्यं

वक्त्राणामेकत्वं परिकल्पयेदिति तात्पर्यम्। यद्वा

ध्यात्वा वक्त्राणि पञ्चाग्नेर्येन यत् कर्म वाञ्छितम्।

तन्मुखमूर्ध्वं कुर्वीत तत्स्थाने चोर्ध्वगं मुखम्॥

अन्तर्भाव्यान्यवक्त्राणि तच्च कुण्डप्रमाणकम्।

इत्युक्तवदीशानवक्त्रे अन्यवक्त्रानामन्तर्भावं विभाव्य

तत्तद्वक्त्रफलप्रदत्वमीशानवक्त्रे विभावयेदिति मन्तव्यम्।

p. 452)

एकैव बहुरूपत्वात् सर्वकामफलप्रदा इति

श्रुतेर्बहुरूपाख्यायामीशानजिह्वायां मुख्यत्वसिद्धेः

तस्यामेव पूर्णाहुतिविधिमतिदिशति (मध्य) इति। (मध्यजिह्वायाम्)

इति। बहुरूपाभिधानायामीशानरसनायामित्यर्थः।

तथा समीरितं श्रीमत्सोमशंभुचरणैः

हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा।

जिह्वाऽग्नेरतिरक्ता च बहुरूपा च सप्तमी।

रुद्रेन्द्रवह्निमांसादवरुणानिलगोचरे।

हिरण्याद्या विनिर्दिष्टा रसनाष्षडनुक्रमात्॥

मध्यतो बहुरूपा तु दक्षिणोत्तरगामिनी। इति।

किमर्थं पूर्णादानमित्यत आह

(चूडान्तसंस्कारपूरणार्थम्) इति।

चूडा शिखासंस्कारः अन्ते यस्य स चूडान्तः

p. 453)

स चासौ संस्कारश्च तस्य पूरणार्थं पूर्तये। अत्र

गर्भाधानादि नामकरणान्तपञ्चसंस्काराणां कृतत्वात्

निष्क्रामणादिचूडान्तमित्यवसेयम्। तथा

श्रीमज्ज्ञानरत्नावल्यां

अशेषसंस्कारसंसिद्ध्यै पश्चात् पूर्णां प्रदापयेत्।

निष्क्रामणान्नप्राशश्च व्रतबन्धनमेव च॥

चूडा गोदानपर्यन्तं वृत्तान्तं पूर्णया कृतम्।

इति। ननु पूर्णां दद्यादित्युक्तं तत् कथमित्यत आह (तद्यथा) इति।

(सर्पिषा) घृतेन। घृतमाज्यं हविस्सर्पिः इत्यमरः। (पुष्करोपरि)

पुष्करस्य आज्याश्रयपद्मस्य उपरि। यदाह

श्रीमन्मृगेन्द्रवृत्तिकारः पुष्करविधिरित्यत्र आज्या

श्रयणपद्मान्तं यावत् कल्प्य इति। (तदग्रे) स्रुक्स्रुवाग्रे।

(शंखवत्) शंखेन तुल्यम्। एतल्लक्षणमुक्तं मुद्रालक्षणे

स्रुक्स्रुवयोर्दण्डमूलाग्रद्वये

p. 454)

वामसव्यपाण्यवष्टंभनात् शंखमुद्रा पूर्णावसरे कार्या

इति। (तौ) स्रुवस्रुवौ। (ऊर्ध्वकायः) समकायशिरोग्रीवः।

(अनिद्विग्नः) निर्व्याकुलः। अन्तर्भावनावानितिवार्थः। तथा

श्रीरामनाथपद्धत्यां

धृत्वा दक्षिणहस्तेन पश्चाद्वामेन पाणिना।

समकायशिरोग्रीवस्स्थित्वाऽन्तः परिभावनात्॥ इति। (क्षिपेत्)

पातयेदित्यर्थः ॥

अग्निभजनक्रमः ॥

(क्रि) (२०) चर्वाद्यर्थमग्निं विभज्य, स्थानान्तरे [-नान्तरं]
संरक्ष्य,
शिवाग्नेराप्यायनायाकाराद्यैस्स्वरैषोडशांगुलानिध्मान्
[शिवाग्नेराप्याय - - काराद्यस्स्व-] पलाशान् जुहुयात् ॥ (९६)
(प्र) अथ चरुपचनाद्यर्थं शिवावाहनात्
पूर्वमग्निभजनक्रममाचष्टे (चरु) इत्यादिना (जुहुयात्) इत्यन्तेन ।
(चर्वादि) इति । आदिपदेन धूपादिरुच्यते । तदुक्तं
सोमशंभुचरणैः धूपदीपचरूणां

p. 455)

(२७२) च कृते वह्निं समुद्धरेत् इति । (आप्यायनाय) पुष्टये । (स्वरैः)
अकारादिविसर्गान्तैः षोडशस्वरैरित्यर्थः । तथा
श्रीमद्वातुलशुद्धाख्यायां अकारादि विसर्गान्ता एते वै षोडश
स्वराः इति । (इध्मान्) इति । एतल्लक्षणमुक्तं श्रीमन्मृगेन्द्रे
इध्मास्त्वस्फुटिता ऋज्व्यस्सत्वचष्षोडशांगुलाः इति ।
अत्र पंचसंस्कारसंस्कृते शिवहुताशने अनावाहितशिवे
चरुवचनादि? आवाहितशिवे तु होमः कार्य इति तात्पर्यम् ।

तथा श्रीमत्पौष्करे

वाच्याश्चरुपुरोडाशाः पंचसंस्कारसंस्कृते ।
अनाहूतशिवे वह्नौ होमस्त्वावाहिते शिवे ॥

इति ॥

शिवाग्निप्रार्थनाप्रकारः ॥

(क्रि) (२२) सितपद्मासनासीनं चतुर्वक्त्रं चतुर्भुजम् ।

p. 456)

लम्बकूर्चं ब्रह्ममूर्तिं जठामण्डित शेखरम् ॥
स्रुक्कमण्डलुदण्डाक्षमालाव्यग्रकरांबुजम् ।
(स्रुक्कमण्डलदण्डा-] । यद्वा स च रक्तत?नुस्त्र्यक्षश्शिवायुध [-
सचरस्तदण्डस्त्र्यक्षशिशिवा-] भुजान्वितः ॥
इत्थमग्निं ध्यात्वा,

अग्ने त्वमैश्वरं तेजः पावनं परमं यतः ।
तस्मात् त्वदीयहृत्पद्मे संस्थाप्य [स्थाप्य] तर्पयामि
[सन्तर्प्ययाम्यहम्] तम् ॥

इत्याज्ञां [इत्याज्ञा] प्रार्थ्य ॥ (९७)

(प्र) अथ शिवाग्निध्यानकथनपूर्वं शिवावाहनाय
तत्प्रार्थनाप्रकारमाह । (सित) इत्यादिना (प्रार्थ्य) इत्यन्तेन ।
ध्यानश्लोकार्थः स्पष्टः । (हे अग्ने) इत्यामन्त्रणम् । (तेजः) वीर्यम् ।
तेजो बले प्रतापेऽग्नावादित्य त्विषि रेतसि इति नानार्थरत्नमाला । (तम्)
शिवम् । (तर्पयामि) मुहोमि । स्फुटमन्यत् ॥

p. 457)

अग्नौ शिवयजनपूर्वकहोमविधिः ॥

(क्रि) (२२) अनन्तरमग्नेविग्रहमध्यनाड्या [-ग्नेर्विग्रहंमध्य-]
प्रविश्य, तदीयहृत्पद्मे पूर्ववत् भास्वरं भगवन्तं सासनं
सावरणंमभ्यर्च्य [-वत् सासनं भगवन्तं भास्वर सावरण-
], धूपदीपौ [धूपदीपं] दत्वा,
शिववक्त्राग्निवक्त्रयोस्सन्धानं कृत्वा, निस्सृत्य,
मूलमन्त्रमुच्चार्य, वह्निस्थशिवनासाविनिर्गत-ज्योतीरूपशिखां
[वह्निस्तशिव-] यागस्थशिवाशिखालीनां [-ज्योतिरूपंशिखाया
याग] रश्मिमात्राविनियोगेनावच्छिन्नां [शिखशिखालनारश्मि
वियोगेना- -च्छिन्नम्] उभयत्र कृतास्पदां ध्यायेत् [?] ॥
एवं कुंभयागाग्निशिवैरात्मना [-रात्माना] सह

नाडीसन्धानं कृत्वा, मन्त्रतर्पणार्थं

मूलमन्त्रमष्टोत्तरशतं तद्दशांशतो ब्रह्माङ्गानि च हुत्वा,

पूर्णान्दत्वा, विशेष तर्पणाय च तथैव कृत्वा

देशापादनकालापादन दुर्निमित्तशान्तिसुनिमित्तापादन हेतवे

मूलेन

p. 458)

चतुश्शतं [यथा शक्ति] हुत्वा, पूर्णासहितं [हुत्वा

पवित्रकरणार्थं मूलेना शतं पूर्णा-] जुहुयात्। ततो

मन्त्राणां तर्पणं दीपनं च विदध्यात्। ओम् ह्रों

ईशानमूर्द्धाय स्वाहा [-मन्त्रा तर्पणं कृत्वा दीपं च कुर्यात्

। ओं ह्रों ईशा-] इत्याद्येकैकया [इत्याद्यैकैका हुत्या-] घृताहुत्या

तर्पणम्। ओम् ह्रूं ह्रों ह्रूं [ह्रां] ईशान मूर्द्धाय हुंफट्

इत्यादित्र्याहुत्या दीपनम् [इत्यादिन दीप-] ॥ (९८)

(प्र) अथ कुण्डसंस्कारादीन्युपपाद्य अग्नौ शिवयजन

पूर्वं होमविधिमाह (अनन्तरम्) इत्यादिना (दीपनम्) इत्यन्तेन।

(प्रविश्य) इति। प्रविष्टोऽहमिति स्वात्मानं संस्मृत्येत्यर्थः।

(तदीयहृत्पद्मे) शिवानलहृदयकमले। (भगवन्तम्) भगः

ऐश्वर्यादिगुणः यस्य स भगवान् तम्। श्रीविष्णुपुराणे

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

इति श्रुतेः। अत्र शिवाग्नौ आधारशक्त्यादिभोगांगपूजान्तं

p. 459)

शिवमभ्यर्च्य नैवेद्य समये होमं विदध्यात्। यदुपदिष्टं
पूर्वं नित्याग्निकार्ये ततोऽग्निहृत्पद्मे शिवं पूर्ववदभ्यर्च्य
नैवेद्य समये तिलादिभिर्यथाशक्ति मूलेन ब्रह्मांगैश्च
दशांशतो हुत्वा पूर्णां दत्वा नैवेद्याय चरुं हुत्वा इति।
वक्ष्यति च पूर्णान्तं समस्तहोमविधिमुदीर्य अनन्तरं
नैवेद्याचमनचन्दनतांबूलादीनि दत्वा इति।
(शिववक्त्राग्निवक्त्रयोः)
शिवोद्ध्वाननवह्न्यूध्वाननयोरित्यर्थः।
तथा सिद्धान्तसारावल्यां वागीश्यां जनितं शिवाग्निमनघं
नाड्या प्रविश्यैव तत्स्वान्ते पूर्ववदर्चिते परशिवे
निर्गत्यचोध्वाननने। वह्न्यूध्वास्यसुसन्धिते इति।
कुंभस्थण्डिलवह्निस्थ शिवानां गुरोश्च नाडी सन्धान
क्रममाह (मूल) इति (उभयत्र) वह्निस्थयागस्थ शिवयोरित्यर्थः।

p. 460)

उक्तन्यायमन्यत्राप्यतिदिशति (एवम्) इति। (आत्मना सह) इति।

अत्र स्वनाडी सन्धानं कुंभयागाग्निशिवैः कुर्यादिति तात्पर्यम्।

तथा श्रीमन्मृगेन्द्रपद्धत्यां

कुर्यात् स्वनाडी सन्धानं कुंभयागाग्निशंकरैः इति।

होमविधिमाह (मन्त्रतर्पणार्थम्) इति। (तद्दशांशतः) तस्य

मूलमन्त्रस्य दशांशतः प्रतिदशकमेकैकत इत्यर्थः।

अत्र प्रधानभूत शिवमन्त्रापेक्षया

तदङ्गब्रह्मांगमन्त्राणां कल्पहोम इति तात्पर्यम्।

यदुक्तं श्रीमत्किरणे दशांशतो नुजुहुयात् इति। (ब्रह्मांगानि च

हुत्वा) इति। अत्र ब्रह्मणामीशादीनां प्रयोगे पूर्वं

प्रणवमुच्चार्यानन्तरं तत्तद्बीजमुच्चार्य

पश्चादीशानमूर्द्धयेत्यादि

व्योमव्यापिपदमध्यपठितमन्त्रानुच्चार्य होमयेदिति गुरवः।

p. 461)

तथा श्रीमत्सोमशंभुचरणैरुक्तं होमं निर्वर्तयेदेवं

ब्रह्मबीजपदैस्ततः इति।

(देशापादनकालापादनदुर्निमित्तशान्तिसुनिमित्तापादन हेतवे)

देशापादनञ्च पञ्चाष्टकक्षेत्रेषु अन्यतमत्वपरिकल्पनं

कालापादनं च आध्यात्मिकस्य कालस्य दीक्षानुगुणसंपादनम्

। एवमुक्तं मृगेन्द्रपद्धतिव्याख्याकारेण।

दुर्निमित्त शान्तिश्च दिव्यान्तरिक्ष भूमिगत दुर्निमित्त
दोषप्रोत्सारणं सुनिमित्तापादनं च तथाभूत
सुनिमित्तसंपादनम्। तथा श्रीमत्कालोत्तरे

देवा विमाने दृश्यन्ते नित्यं तच्छुभदं मतम्।
कुसुमानि विचित्राणि यदा व्योम्नः पतन्ति च॥
शस्तश्चेन्द्रधनुः पुंसां सौम्यवृष्टिर्विशेषतः।
पांसुपातनवर्षं वा आकाशे शकुनं हि तत्॥

p. 462)

शिखिहंसशुकादीनां मधुरालाप इष्यते।
भानुरश्मिसमायोगादंभसः पतनं शुभम्॥
शंखदुन्दुभिजीमूतवल्लकीनां ध्वनिश्शुभः।
आचार्यविप्रनारीणां नरेन्द्राणां च दर्शनम्॥
तथा हस्तितुरंगाणां दर्शनञ्चाति शस्यते।
खरोष्ट्रमहिषव्याल व्रतिनां दर्शने शुभम्॥
वाक्यं प्रशस्तन्तच्छस्तं यद्दुष्टो नेष्यतेध्वनिः।
अकस्मात् कलहो नेष्टः प्रमादाद्दारुणो रवः॥
प्रासादाकारवृक्षाणां साधूनां दर्शनन्तथा।
यागकार्ये शुभेष्वेवमशुभे तु गृहस्य तु॥
अघोरेण शतं होम्यम्

इति । देशापादनकालापादनदुर्निमित्तशान्तिसुनिमित्ता पादनानि
तेषां हेतुः तस्मै । तर्पणदीपकरणक्रममाह (ततः) इति ॥

p. 463)

२७४-

चरुपाकः ॥

(क्रि) (२३) विधिवत् चरुपाकं कृत्वा ॥ (९९)

(प्र) अथ शिवयजनं होमक्रमञ्चोपवर्ण्य तदनन्तरं किं
कुर्यादित्याशंक्य चरुं पचेदित्याह (विधिवत्) इत्यादिना (कृत्वा)
इत्यन्तेन । अत्र चरुकरणे कर्तव्यं दीक्षाविधौ
वक्ष्यमाणवदवसेयम् ॥

पवित्राणामधिवासदिने कर्तव्यत्वम् ॥

(क्रि) (२४) ततः पवित्राणि शुद्धपात्रस्थानि समादाय, अग्निसन्निधौ
समानीय, कुण्डपश्चिमभागे सदर्भे प्रणवासनमण्डले
निधायास्त्रेण संप्रोक्ष्य, तन्तुनवकेषु प्रणवं चन्द्रं वह्निं
[-चन्द्रवह्निं-] ब्रह्माणं नागं गुहं रविं सादाख्यं

सर्वदेवांश्च क्रमेण प्रणव नमस्कार युक्तेन चतुर्थ्यन्तेन

[युक्ते चतु-] स्वस्व नाम्ना विन्यस्य [विन्यसेत्], ग्रन्थिषु प्रकृतिं

पौरुषीं [पौरुषं] वीरामपराजितां [परामपरा-] जयां

विजयामजितां [-जयां जितां]

p. 464)

सदाशिवां मनोन्मनीं सर्वतोमुखीञ्च [-मुखञ्च] पूर्ववत्

स्वस्वनाम्ना विन्यसेत् [पूजयेत्] ॥

तत्वपवित्रके [-पवित्रे] गंगावतारके

द्विरष्टककलाश्शिवशक्तिर्विन्यसेत् [द्विरष्टकलाश्शिवं शक्तिं च

विन्य-] ॥

पवित्रचतुष्टये मण्डलचतुष्टयं [मण्डले-] साधिपतिं

[स्याधिपं] विन्यस्य [संपूज्य], संहितयाऽभिमन्त्रय

[संहितभिम-] कृष्णाजिनादिना समाच्छाद्य संवत्सरात्मकं,

सर्वकृत्यसाक्षिणमव्ययं [-रात्मक सर्व-] गोप्तारं संश्रयं

कर्मफलप्राप्तिनिमित्तबन्धनं शिवमनुस्मरन् मन्त्रसंहितया [-

ताया] एकविंशतिकृत्वस्संपाताभिहुतानि कृत्वा अस्त्रेण संरक्ष्य,

कवचेनावकुण्ठ्यामृतीकृत्य, कुंभसमीपे स्थापयेत्। (२००)

(प्र) अथ पवित्राणामधिवासदिने कर्तव्यतामाह (ततः

पवित्राणि) इत्यादिना (स्थापयेत्) इत्यन्तेन।

सूत्राधिदेवतान्यासक्रममाह (तन्तुनवकेषु) इति।

पवित्राणां त्रिगुणत्रिगुणीकृतसूत्रेष्वित्यर्थः ।

p. 465)

तथा समभिहितं श्रीमत्सोमशंभुचरणैः

कर्त्रितं द्विजकन्याभिस्त्रिगुणं त्रिगुणीकृतम् ।

इति । चकार उक्तसमुच्चयार्थः । (प्रणवनमस्कारयुक्तेन)
प्रणवश्च नमस्कारश्च नमः पदं प्रणवनमस्कारौ
ताभ्यां युक्तं तेन

* एतन्मूलं कोशेषु नोपलभ्यते ॥

(२७५) (चतुर्थ्यन्तेन) चतुर्थी चतुर्थीविभक्तिः अन्ते यस्य तत् तथोक्तं
तेन । (स्वस्वनाम्ना) प्रणवचन्द्रादिनामधेयेन । अत्र ओं हां
प्रणवायनमः इत्यादि ज्ञेयम् । तत्वपवित्रकस्थ
ग्रन्थिदशकाधिदेवतान्यासक्रममाह (ग्रन्थिषु) इति । (पूर्ववत्) इति ।
प्रणवनमस्कारयुक्तेन चतुर्थ्यन्तेनेत्यर्थः । (स्वस्वनाम्ना)
प्रकृत्यादिसंज्ञया । गंगावतारकपवित्राष्टादश
ग्रन्थ्यधिदेवतान्यासप्रकारमाह (गंगावतारके) इति ।
गंगावतारग्रन्थिष्वित्यर्थः ।

p. 466)

(द्विरष्टककलाः) प्रासादमन्त्रगतषोडशकलाः। अत्र
प्रासादकलाः शिवशक्तिभ्यां सह न्यस्तव्या इति केचित्। ताभ्यां
सह शशिन्यादयो न्यस्तव्या इत्यपरे। यथा

शशिनी शाखिनी लक्ष्मीः कामिनी च प्रभा तथा।
पुष्पिणी पुष्टिभावा च आमुदा कुमुदा तथा॥
आशासी शायिनी विद्या मोहिनी च प्रमोहिनी।
वितक्लिनी तथा सौम्या अमृता षोडशी कला॥

इति। एवमुक्तं श्रीमता सोमशंभुपद्धतिटीकाकारेण।
(मण्डलचतुष्टयम्) सूर्यमण्डलादिचतुष्कम्। (संवत्सरात्मकम्)
इति। संवत्सरः पवित्रारोपणदिवसात् प्रभृति अद्य अब्दं यावत्
कालः स आत्मा शरीरमधिष्ठेयत्वेन यस्यासौ संवत्सरात्मकः
तम्। (सर्वकृत्य साक्षिणम्) सर्वकृत्यानि सांवत्सरिकनिखिलकर्माणि

p. 467)

तेषां साक्षी उपद्रष्टा तम्। (अव्ययम्) अक्षीणम्। तथा
अक्षीणमव्ययम् इति। परिपूर्णमित्यर्थः। (गोप्तारम्)
सर्वकृत्यफलपालकमित्यर्थः। (एकविंशतिकृत्वः)

एकविंशतिवारेणेत्यर्थः। (संपाताभिहुतानि) इति।
एतल्लक्षणं दीक्षाविधौ चरुपचनविधाने वक्ष्यति संहितया
स्वेत्यग्नौ हेति संस्कार्यस्योपरि शेषमाज्यं स्रुवं धुन्वन्
पातयेत् इति॥

गन्धपवित्रारोपणपूर्वकर्तव्यविधिः॥

(क्रि) (२५) ततश्शिवसूर्याय चरुं [चरुं] निवेद्य,
तद्द्वारपालगणपतिगुरूंश्च पवित्रेणानुमोद्य [पतित्रेणा-],
गन्धपुष्पदूर्वाक्षतान्वितं गन्धपवित्रं धूपयित्वा, ओं
समस्तेत्यादिसूर्यनामविशिष्टमामंत्रणं [-मामन्त्रिणं-]
पठित्वा, तन्मूलेन स्वाहान्तेन दत्वा, तदंगग्रहेभ्यश्च
[तदङ्गेभ्योग्रहेभ्यश्च]

p. 468)

स्वस्वमन्त्रैः स्वाहान्तैर्दत्वा, परमीकृत्य, जपन्निवेद्य [-कृत्य
नजपं-], नमस्कृत्याचम्य, कृत सकलीकरणो यागधामादिं
पूजोपकरणादिकं च कवचेन [-दिकं कवचेना] सूत्रेणावेष्ट्य,
द्वारपालवास्तुनाथलक्ष्मीभ्यः [-णावेष्ट्यातद्वारं-] क्रमेण
पवित्रकन्दत्वा [-त्रं दत्वा-], इन्द्रादिलोकपालेभ्यस्सास्त्रेभ्यः
स्वस्वमन्त्रैः [-लेभ्यश्च स्वस्व-] स्वाहान्तैर्गन्धपवित्रन्निवेदयेत्

[-मन्त्रैः गन्ध-]। ततस्समस्तेत्यादि पठित्वा स्वाहान्तं
शिवमन्त्रेण शिवकुंभास्त्रवर्द्धन्योश्चरु निवेदन पूर्वं
गन्धपवित्रमारोप्य, जप्त्वा निवेद्य, गणपति [-पतिरूपपवि-]
गुरूंश्च पवित्रेणाराद्धय, मण्डलसमीपमागत्य [-मागम्य]
चरुन्निवेद्य[?] आमन्त्रणमन्त्रपूर्वं गन्धपवित्रन्दत्वा [-पवित्र
निवेदयेत्] परमीकरणपूर्वं जपं कृत्वा निवेद्य क्षमाप्य॥
(२०२)
(प्र) अथ पवित्राणां कर्तव्यतामभिधाय देवस्य
गन्धपवित्रारोपणार्थं तत्पूर्वकरणीयान्याह (ततः) इत्यादिना
(क्षमाप्य) इत्यन्तेन।

p. 469)

तत्र तावत् सूर्यस्य गन्धपवित्रारोपणमाह (शिवसूर्याय) इति।
(गन्धपवित्रकम्) इति। एतल्लक्षणमुक्तं प्राक् निर्दिष्टम्। वक्ष्यति च
एकग्रन्ध्यल्पतन्तुकम् इति। (ओं समस्तेत्यादि) इति। आदिशब्दवाच्यमग्रे
वक्ष्यति। (सूर्यनामविशिष्टम्) इति। अत्र सर्वथा सर्वदा शंभो
इत्यत्र शंभुपदं विहाय सर्वथा सर्वदा सूर्य नमस्तेस्तु इत्यादि
पठेत्। (तन्मूलेन) सूर्यमूलमन्त्रेण। (स्वस्वमन्त्रैः)
हृदयादिसोमादिमन्त्रैः। यागमण्डपाद्यस्य
सूत्रवेष्टनमाचष्टे (आचम्य कृतसकलीकरणः) इति।
(यागधामादि) इति। आदिपदेन वृषभस्थानादि निगद्यते।

तदुक्तं श्रीमत्सोमशंभुचरणैः

यागधामवृषस्थानप्रासादानलसंश्रयात्।
कारकौप्यंच सूत्रेण वर्मणा परिवेष्टयेत्॥ इति।

p. 470)

द्वारादीनां गन्धपवित्रारोपणमाह (द्वार) इति।
दिक्पालानां गन्धपवित्रारोपणमाह (इन्द्रादि) इति।
शिवकलशवर्द्धन्योः पवित्रारोपणमाह (शिवकुंभ) इति।
गणपतिगुरूणां पवित्रारोपणमाह (गणपति) इति।
(पवित्रेणाराध्य) इति। अत्र पवित्राराधनानन्तरं त्वदाज्ञया
अविघ्नमेतत् कर्म भवेदिति प्रार्थ्य पंक्तिगुरुभ्योऽप्येवमेव
कथ्यताम्। मण्डलेशस्य पवित्रारोपणमाह (मण्डल) इति।
(आमन्त्रणमन्त्रपूर्वम्) आमन्त्रणमन्त्रः ओं समस्तेत्याद्यः
कारिकारूपो मन्त्रः पूर्वः यस्य तत् तथोक्तम्। (क्षमाप्य)
क्षन्तव्यमिति विज्ञाप्य॥

शिवस्य व्रतभोगाङ्ग द्रव्यनिवेदनविधिः॥
(क्रि) (२६) देवसमीपं गत्वा, स्वासने समुपविश्य, संपूज्य,
व्रतचर्याद्यंगानि निवेदयेत्।

p. 471)

तत्र प्राच्यान्तत्पुरुषेण दन्तकाष्ठं, दक्षिणस्यामघोरेण [-
दक्षिणेघोरेण] भस्म, पश्चिमायां सद्योजातेन मृदं,
उत्तरस्यां वामदेवेन धात्री फलोदके, ऐशान्यां
[फलोदकेनैशा-] वा जलं [न्मां जलं] सपञ्चगव्यमीशेन [-
मीशाने] पुनस्तत्रैव मूलेन शिरसा वा सुपुष्पाणि [पुषाणि]
गोरोचनामाग्नेय्यां हृदा [हृद] अगरुं [अगरूं] नैर्-ऋत्यां
[नै-ऋते] शिखया [शिखायां] वायव्ये
चन्दनागरुकर्पूरकुंकुमानि विशिष्टानि समानीय [-शिष्टानि
मान्यानि सामान्यानि] कवचेन निवेद्य, पश्चिमे सद्येन
होमद्रव्याणि सकुशानि तिलाज्यादीनि रूपिणा
दण्डाक्षसूत्रकौपीनभिक्षापात्राणि [-भिक्षपात्रा-] व्रतांगानि
दक्षिणे कज्जलं कुंकुमं तैलं शलाकां केशशोधनं
तांबूलं दर्पणं रोचनादि [दर्पणरोचनादीनि] वामदेवेन
उत्तरस्यामीशानेन
आसनपादुकापात्रयोगपट्टातपत्राण्यैशान्याञ्चरुमाज्यञ्च [-
दुकंपात्र- - तपात्रेणैशान्या-] गन्धादि च

p. 472)

पूर्वस्यान्नरेण [-धादि पूर्व-] निवेदयेत् [विनिवेदयेत्] ।
यदसंपन्नमेतेषां मनसा [मनसं] तत् प्रकल्पयेत् ॥ (२०२)

(प्र) अथ मण्डपाद्यस्य मण्डपावरणदेवतादीनां च
गन्धपवित्रारोपण क्रममुपवर्ण्य शिवस्य व्रतभोगाङ्गद्रव्य
निवेदन विधिमतिदिशति (देव) इत्यादिना (प्रकल्पयेत्) इत्यन्तेन।
(व्रतचर्याद्यंगानि) व्रतचर्या व्रतानुष्ठानं आदिर्यस्य तत्
तथोक्तं तस्य अङ्गानि दन्तकाष्ठादि साधनानि। कथं
निवेदयेदित्यत आह (तत्र) इति। (तत्र) तेषु व्रतचर्याद्यङ्गेष्वित्यर्थः।
(धात्रीफलोदके) धात्रीफलञ्च उदकञ्च ते। (ऐशान्यां वा
जलम्) इति। अत्र स्थानभेदो मन्त्रभेदश्च ज्ञेयः। तथा सन्दिष्टं
श्रीमत्सोमशंभुचरणैः

उत्तरे देवदेवस्य दद्यादामलकीफलम्।
जलं च वामदेवेन शिरसा वापि पावनम्॥

p. 473)

ऐशान्यामीशमन्त्रेण मूलमन्त्रेण वा जलम्।

इति। (रूपिणा) अघोरमन्त्रेण। (गन्धादि) इति।
आदिपदेन हस्तोद्वर्तनमुखवासादि सूच्यते।
दन्तकाष्ठमृद्भस्म
जलगव्यहोमद्रव्यदण्डाक्षसूत्रादिव्रतोपयोगि द्रव्यजातं
व्रतांगं व्रतवृद्धये देयम्। एवं निर्णीतं श्रीमता

सोमशंभुपद्धतिटीकाकारेण ।

ननु कुंकुमादिद्रव्यासंभवे कथमित्याशंक्य विन्यसेत् तत्

पुनस्सर्वं यथा मानसवैभवम् इति श्रीमन्मृगेन्द्रश्रुतिं हृदि

निधाय यथालाभं निवेदयेदित्याह (यदसंपन्नम्) इति ॥

गन्धपवित्रारोपणक्रमः ॥

p. 474)

(क्रि) (२७) तदनु देवमष्टपुष्पिकया [-पुष्टिकया] संपूज्य,

ततश्चरोश्शिवभागमस्त्रप्रोक्षितं कवचावकुण्ठितं

हृन्मन्त्रपूजितममृतीकृतं [ह्रां मन्त्र-] भगवते निवेद्य,

नित्यवत् द्वारपालेभ्य आत्मने [-पाले आत्मने]

गणपतिलक्ष्मीगुरुपंक्तिभ्यश्च पवित्रन्दत्वा पश्चात् शिवाय

[शिवासनाय] निवेद्य,

गन्धादिवासितमेकग्रन्थ्यल्पतन्तुकन्धूपितं [ग्रन्धादिवासीत - -

ग्रन्ध्यल्प- -क?] सपुष्पमामन्त्रणपवित्रकमंजलावादाय

आमन्त्रणात्मकं मन्त्रं [सुपुष्प- -कुमन्त्रणपदात्मकमन्त्र]

पठेत् ॥

ओम् समस्तविधिविच्छिद्र पूरणेश [-विधिवच्छिद्र-] मखंप्रति ।

प्रभवामन्त्रयामि [प्रभभवान्मन्त्र-] त्वां [त्वा]

त्वदिछावाप्तकारकः [त्वदिक-] ॥

तत्सिद्धिमनुजानी हि यजतश्चिदचित्पदे ।

सर्वधा सर्वदा शंभो नमस्तेऽस्तु प्रसीद मे ॥

यद्वा [?] आमन्त्रितोऽसिदेवेश सहदेव्या गणेश्वरैः ।

मन्त्रेशैर्लोकपालैश्च सहितः परिवारकैः ॥

p. 475)

निवेदयाम्यहन्तुभ्यं प्रभाते तु पवित्रकम् ।

नियमञ्च करिष्यामि परमेश तवाज्ञया ॥

सद्योधिवाशे तु सद्यः [–वाशे भवतः सद्यः] काले पवित्रकमिति

पठेत् । एवमामन्त्र्य, रेचकेणामृतीकृत्य, मूलं लयान्तमुच्चार्य,

शिवाय दत्वा, ब्रह्मांगानां च दत्वा [जस्त्वा],

धूपदीपादिभिर्देवं सन्तोष्य, मूलेन पुष्पाञ्जलिं दत्वा,

अमृतमुद्रां महामुद्राञ्च विधाय ॥ (२०३)

(प्र) अथ व्रतचर्याद्यङ्गनिवेदनप्रकारं समुदीर्य देवस्य रज्जुं

कृत्वा तु रंजयेत् बन्धयत्नेन रज्ज्वा तु ग्रन्थयेत्तु रुरो विदुः इति

गन्धपवित्रारोपणक्रमं स्पष्टीकरोति (तदनु देवम्) इत्यादिना

(विधाय) इत्यन्तेन । (गधाधिवासितम्) इति । अत्र गन्धपदेन

कृष्णागरुकर्पूरः सूच्यते । तथा श्रीमद्रौरवे

कृष्णागरुश्च कर्पूर कस्तूरी नवनीतकम् ।

ननं घोषोशिरश्चैव चन्दनञ्च फलत्रयम् ॥

p. 476)

एलालवंगतक्कोलं घात्रं गोरोचनं तथा ।

गन्ध द्रव्यमिति प्रोक्तं रञ्जद्रव्यमथोच्यते ॥

गैरिकं जातिलिङ्गञ्च कुंकुमं रोचनं तथा ।

रक्तचन्दनसंयुक्तं कर्पूरेण विमिश्रितम् ।

मनोशिला रजनी चैव मंजिष्ठा दर्विरेव च ॥

रञ्जद्रव्यमिति प्रोक्तं रञ्जयेत्तु पवित्रकम् ।

त्रिगुणीकृत सूत्रेण

इति । तथा श्रीमन्मोहशूरोत्तरे

मुरावांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।

मुसली चैव मुस्तं च सर्वौषधिगणस्स्मृतः ॥

(अल्पतन्तुकम्) इति । तत्तदधिकरणोचितपवित्रगततन्तु संख्यया

हीनतन्तुकमित्यर्थः । (आमन्त्रणपदात्मकम्) इति । अत्र पदशब्दो

लक्ष्मवाचकः । यदाहामरदत्तः पदं

व्यवस्थितत्राणस्थानलक्ष्मांघ्रिवस्तुषु इति ।

आमन्त्रणद्योतकवाक्यसमूहात्मकं मन्त्रमित्यर्थः ।

p. 477)

तदुक्तं श्रीमन्मतङ्गे

पठेन्मन्त्रोत्तमं विद्वानामन्त्रणपदात्मकम् इति ।

ननु आमन्त्रणमन्त्रं पठेदित्युक्तं तत् कथमित्याशंक्य

तन्मन्त्रं स्पष्टीकरोति (ओं समस्त) इति । ओमिति मन्त्रदीपनार्थम् ।

(समस्तविधिविच्छिद्रपूरणेश) समस्तविधयः

निजमूर्त्याद्यधिकरण भेदेन बहुविधत्वेन प्राक् प्रतिपादिताः

नित्यनैमित्तिककाम्यभेदभिन्नाः पवित्रारोहण कालात्

पूर्वमनुष्ठिताः सांगोपांगाः सर्वपूजाविधयः तेषां

विच्छिद्राणि अन्तरायद्वारेण

असंपूर्णकरणादिलक्षणक्लिष्टादिसंज्ञत्वेन वक्ष्यमाणानि

तेषां पूरणेश परिपूरणक्षम । (मखं प्रति) शिवयज्ञं

प्रति । (प्रभो) स्वामिन् । (त्वदिच्छावाप्तकारकः) त्वदीया

ज्ञालब्धोपकरणः । (आमन्त्रयामि)

विशेषसपर्याग्रहणायानुज्ञापयामि ।

यच्छ्रूयते आवाहनं

p. 478)

न सन्निध्यै पूजाऽनुज्ञप्तयेऽन्वहम् इति । (तत्सिद्धिम्)

पवित्राख्यकर्मफलनिष्पत्तिम् । शेषं सुगमम् । आमन्त्रण

प्रकारान्तरमाह (यद्वा) इति । (नियमम्) इति । व्रतावधेर्नियमम् ।

सुबोधमन्यत्। (एवमामन्त्र्य) इति। इत्थं संबोध्येत्यर्थः।
(रेचकेणामृतीकृत्य) इति। अत्र अञ्जलिगतं पवित्रममृतीकुर्यादिति
तात्पर्यम्। तदुक्तं श्रीमत्सोमशंभुचरणैः

इत्येवं देवमामन्त्र्य रेचकेनामृतीकृतम्।
शिवान्तं मूलमुच्चार्य तच्छिवाय निवेदयेत्॥

इति। (लयान्तम्) द्वादशान्तावधि॥

गन्धपवित्रारोपणानन्तरकरणीयविधिः॥

(क्रि) (२७) जप्त्वा [जप्ता] निवेद्य, ब्रह्मांगानां दशांशतो
[दशांशं] जप्त्वा निवेद्य, प्रदक्षिणीकृत्य [-क्षिणीकृत्या]
साष्टाङ्गं प्रणमेत्॥
(प्र) अथ देवस्य गन्धपवित्रारोपणप्रकारमुदाहृत्य तदनन्तर
करणीयान्याह (जप्त्वा) इत्यादिना (प्रणमेत्) इत्यन्तेन॥

p. 479)
अग्न्यधिकरण शिवार्थक्रिया॥

(क्रि) (२९) ततोऽग्निस्थाय भगवते चरोस्तृतीयांशं हुत्वा, मन्त्रेण

[आमन्त्रेण] पवित्रकन्दत्वा, ब्रह्माङ्गेभ्यश्च दत्वा [दत्वां
प्रायश्चित्ता-], क्षमाप्य, पूर्णां दत्वा, प्रायश्चितार्थं
मूलेनाष्टोत्तरशतं हुत्वा, पूर्णां विधाय,
नैवेद्याचमनचन्दनतांबूलादीनि निवेद्य भस्माभिवन्द्य,
निरोधाघ्र्यं [नव्याचमनतांबूलादि निवेद्य निरोधा-] दत्वा,
शिवं [शिव?] निष्ठुरया [निष्ठुया?] निरोध्य, व्याहृतिहोमं
[व्याहृति] कृत्वा [दत्वा], स्विष्ट कृदाहुतिं [कृदाहुतीश्च?] च कृत्वा,
वह्निमपि निरुद्धय ॥ (२०५)
(प्र) अथ अग्न्याधिकरणेपि तत्क्रियामाह (ततः) इत्यादिना (निरुद्धय)
इत्यन्तेन । (चरोस्तृतीयांशं हुत्वा) इति ।
अत्रायमनुष्ठानक्रमः विधिवच्चरुकं कृत्वा
संपाताहुतिशोधितम् । देवाग्न्यात्मभेदेन दर्व्या तं
विभजेत्त्रिधा ॥ दत्वा भागौ शिवाग्निभ्यां संरक्षन्
भागमात्मनः । इति श्रीमत्सोमशंभुपद्धतिश्रुतेः

p. 480)

चरुं देवाग्न्यात्मनिमित्तं त्रिधा विभजेत् । अनन्तरं शिवाय
कल्पितं भागं पञ्चधा विभज्य
कलशकर्करीमण्डलस्वेष्टलिंगाधिकरणस्थाय शिवाय दत्वा
शेषं व्रतांगनियमन काले निवेदनीयम् । तथा अग्न्यर्थं
भागं चतुर्धा विभज्य एकं भागं निवेदनस्य

चरुनिवेदनानन्तरं हुत्वा द्वितीयेनान्तर्बलिं दत्वा तृतीयमग्नौ पवित्रारोपणकाले हुत्वा तच्च दत्वा तुर्येण बलिर्देयः। तथा आत्मभागं स्वात्मशिष्यसंख्यया विभज्य कर्मान्ते तैस्सह प्राशनीयमिति ॥

बलिविधानम् ॥

(क्रि) (३०) परिधिविष्टरस्तेभ्यो ब्रह्मादिभ्य
इन्द्रादिभ्योऽन्तर्बलिभुग्भ्यो रुद्रादिभ्यश्च बहिर्बलिभुग्भ्य
इन्द्रादिभ्यश्च स चरुं [सचरू] पवित्रकन्दत्वा [पवित्रन्दत्वा] ॥
(२०६)
(प्र) अथ बलिविधानं (परिधि) इत्यादि (दत्वा) इत्यन्तम्।

p. 481)

अन्तर्बहिर्बलिविधानं प्राक् प्रदर्शितम् ॥

बलिविधानानन्तरकरणीयविधिः ॥

(क्रि) (३२) समाचम्य, स्तोत्रवन्दनं कृत्वा, कृत सकलीकरणो
मण्डलस्थमपि समर्पितक्रियाशेषञ्च संपूज्य ॥
(प्र) अथ तदनन्तरकरणीयान्याह (समाचम्य) इत्यादिना

(संपूज्य) इत्यन्तेन ॥

संस्कृतपवित्ररक्षा ॥

(क्रि) (३२) पूते वंशादिसंभवे पात्रे अस्त्रकवचहृदयानि विन्यस्य [विन्यस्त], तस्मिन्मूलेन पवित्राण्यारोप्य, पुनः हृदयकवचास्त्राणि विन्यस्य अन्येन विधाय, सूत्रैरावेष्ट्य, संपूज्य, संहितामन्त्रैस्संपूज्य [-वेष्ट्यसंहि-], कलशायतनस्थे [-यतस्थे] रक्षायै समर्प्य, विज्ञाप्य, लोकपालांश्च यागरक्षणे सावधानांश्च संभाव्य [-धानां संभा-], लिङ्गस्थमपि, शिवं संपूज्यानुज्ञाप्य ॥ (२०७)

p. 482)

(प्र) अथ संपातसंस्कृतस्य पवित्रस्य संस्कारानन्तरं रक्षणञ्चाह (पूते) इत्यादिना (अनुज्ञाप्य) इत्यन्तेन । (पूते) परिशुद्धे । (वंशादिसंभवे) वेण्वादिसमुत्पन्ने ॥

विद्यागुरुपूजादिकम् ॥

(क्रि) (३३) सिद्धान्तपुस्तके गुरौ च पवित्रं दत्वा, नृत्तगीतादिभिर्देवस्य जागरणं विधाय, बहिर्निस्सृत्य आचम्य,

शुचिर्गोमयकृतमण्डलत्रये पञ्चगव्यं चरुं दन्त धावनञ्च

क्रमादासेव्याचम्य [-मादासेप्याच-], शुचिश्शय्यां

[शुद्धशय्यां] दर्भैरास्तीर्य, बुभुक्षुः तिलैः प्राकारत्रयेण

रक्षां [-भुक्षुः प्रकारत्रयेण तिलादिना रक्षां] कृत्वा,

शिवमनुस्मरन् स्वपेत्। मुमुक्षुरप्येवं भस्मशय्यायां स्वपेत्

[-मायां वा स्वपेत्]। इति पवित्राधिवासविधिः [-धिवासः-] ॥ (२०९)

p. 483)

(प्र) अथ विद्यागुरुपूजा (सिद्धान्त) इत्यादि (विधाय) इत्यन्तम्।

अथ तदनन्तरं किं कुर्यादित्याशंक्याह (बहिः) इत्यादिना (स्वपेत्)

इत्यन्तेन। उक्तार्थोपसंहारः (इति) इति। समाप्त इति शेषः। इति

पवित्राधिवासविधिव्याख्या ॥

२७२- पवित्राधिवासद्वितीयदिवसे पवित्रारोपण पूर्वकरणीयविधिः ॥

(क्रि) (३८) अथ प्रातरुत्थाय कृतस्नानो विहितसन्ध्योपासनो

[वीहिसन्ध्यो-] मण्टपमनुप्रविश्य, भूमिं संशोध्य

[संशयोध्य], देवदेवमाराध्याविसृज्यैव, गन्धपवित्रं [-

पवित्रकं] व्रतांगानि [व्रताङ्गान्यपि]

पञ्चगव्यचरुवर्ज्यान्यादाय, शुद्धपात्रे कृत्वा ऐशान्यां

मण्डलके संस्थाप्याष्टपुष्पन्दत्वा, शिवं विसृज्य [सृज्य],

निर्माल्यादिकमपनीय, समाचम्य, शुद्धभूतले

पूर्ववन्नित्याह्निकद्वयं

p. 484)

कृत्वा, नैमित्तिकीं सन्ध्यां विशेष-तर्पणञ्च विधाय, पूर्ववत्

सूर्यमभ्यर्च्य, द्वाराणि द्वारपालांश्च संपूज्य, पूर्ववत्

पश्चिमद्वारेण [-द्वारेण प्रविश्य-] अन्तः प्रविश्य, वास्तोष्पतये

पुष्पन्दत्वा, स्वासनं प्रणवेन संपूज्य समुपविश्य,

भूतशुद्धिं विधाय,

विहितान्तर्यजनहवनध्यानस्थानशुद्धिर्विशेषार्घ्यद्रव्य [-

शुद्धिं विशे-]

शोधनात्मपूजामन्त्रशुद्धिशिवहस्तपञ्चगव्यानि कृत्वा,

वास्तुपतिं लक्ष्मीं शिवकलशमस्त्रं वर्द्धनीं [-

वस्त्रवर्द्धनीं] लोकपालान् गणपतिं गुरूंश्च

क्रमेणाभ्यर्च्य, मण्डलस्थमपि पूर्ववत् संपूज्य, लिङ्गस्थं

विशेषेण पञ्चगव्यादिभिस्संस्नाप्य संपूज्य,

कुण्डान्तिकभागत्य, कुण्डमस्त्रेण संप्रोक्ष्य, मेखलासु

परिधिविष्टरेषु [परिविष्ट-] ब्रह्मादीन् [ब्रह्मादीन् लोक-] सास्त्रान्

लोकपालांश्च संपूज्य,

p. 485)

स्रुक्स्रुवावाज्यञ्च [-स्रुवाज्यञ्च] पूर्ववत् संस्कृत्य पूर्णां
[संस्कृतपूर्णां] दत्वा, अग्निस्थं शिवं गन्धादिना सत्कृत्य
मन्त्राणां सामान्यविशेषतर्पणे विधाय, दुस्स्वप्नादिशान्तये [-
नादिचेन्तच्छान्तये-] अस्त्रेण अष्टोत्तरशतं प्रायश्चित्तं [-चितार्थ]
हुत्वा, पूर्णां विधाय, पूर्ववत् चरुं संसाध्य, संपाद्य
[संपात्य] पूर्ववत् विभजेत्॥ (२२०)
(प्र) अथ एवं पवित्राधिवासनमुक्त्वा अनन्तरदिवसे
पवित्रारोपणात् पूर्वकरणीयान्याह (अथ) इत्यादिना (विभजेत्)
इत्यन्तेन। (देवं अविसृज्यैव) इति। अत्र शिवमष्टपुष्पिकया अर्चयेदिति
तात्पर्यं अष्टपुष्पिकाया विसर्जन समये विहितत्वात्।
तथोक्तं श्रीमत्सोमशंभुचरणैः

अष्ट पुष्पिकया देवं पूजयित्वा विसर्जयेत्

इति। समनन्तरं वक्ष्यति च
अष्टपुष्पं दत्वाशिवं विसृज्य इति।

p. 486)

(नित्याह्निकद्वयम्) प्रातर्मध्याह्नकृत्यद्वयम्। पूर्वदिनवत्
नैमित्तिकं सन्ध्यावन्दनं विशेष तर्पणं च कुर्यादित्याह
(नैमित्तिकीम्) इति। अत्र पूजायां पवित्रदान समये गन्धपवित्रमपि

देयमिति गुरवः ॥

मण्डपस्थितदेवानां पवित्रारोपणविधिः ॥

(क्रि) (३५) ततस्सूर्याय चरुं निवेद्य, तद्द्वारपालगणपतिगुरूंश्च पवित्रेणानुमोद्य, सूर्यनामविशिष्टं [-नामभिधिष्टं] कालात्मेत्यादि [कलात्मनेत्यादि] पठित्वा, सूर्यमन्त्रेण पवित्राणि दत्वा, तदङ्गग्रहाणां च पवित्राणि [पवित्रं] दत्वा, जप्त्वा निवेद्याचम्य, कृतसकलीकरणश्शान्त्यादि द्वारेभ्यो नन्द्यादिभ्यः [नद्यादिभ्यः] पवित्रन्दत्वा, वास्तोष्पतये महालक्ष्म्यै [-लक्ष्म्यै] लोकपालेभ्यश्च [लोपाले-] पवित्रं दत्वा [समर्प्य], कुंभवर्द्धन्योश्चरु निवेदनपूर्वं कालात्मेत्यादि

p. 487)

पथित्वा, पवित्राणि समारोप्य, गणपतये गुरुभ्यश्च पवित्रं समर्प्य, एवं मण्डलस्थाय [-वर्द्धन्योश्च गणपतिगुरुभ्यश्च समारो मण्डलं-], भगवते पवित्राणि दत्वा, ॥ (२२२)

(प्र) अथ मण्डपस्थितदेवानां पवित्रारोपणविधिमाह (ततः) इत्यादिना (दत्वा) इत्यन्तेन ॥

देवस्य पवित्रारोपण पूर्वकरणीयविधिः ॥

(क्रि) (३६) लिङ्गस्थं [वित्राणि लिङ्ग-] शिवं संपूज्य,
व्रतचर्याद्यंगानि [वृतचर्या-] पञ्चगव्यचरुरहितानि [गव्यचरू-]
यथा स्थानं निवेद्य, तद्दिनसिद्धमपि पञ्चगव्यञ्चरुं
[पञ्चव्यं चरु-] निवेद्य, नित्यवत् [नित्यद्वार-] द्वारपालात्म
गणपतिलक्ष्मीगुरुपंक्तीः [लक्ष्मीं गुपङ्क्तिं] पवित्रेण
संपूज्य ॥ (२२२)

(प्र) अथ देवस्य पवित्रारोपणाय तत्पूर्वकरणीयान्याह
(लिङ्गस्थम्) इत्यादिना (संपूज्य) इत्यन्तेन ।

p. 488)

न्यस्ते च दन्तकाष्ठादौ यथास्थानं गुरूत्तम इति
श्रीमन्मयश्रुतिं हृदि निधाय अनन्तरवासरेपि
व्रतभोगाङ्गद्रव्याणि निवेदयेदित्याह (व्रतचर्याद्यङ्गानि) इति ।
(यथास्थानम्) इति । इन्द्रादीशानान्तासु दिक्षु इत्यर्थः ।
(तद्दिनसिद्धम्) तदहर्मातम् । अत्र द्रव्यनिवेदने
जलकुंकुमपञ्चगव्यतांबूलचरवो नूतना एव देयाः ।
इतराणि तु पूर्वदिनदत्तद्रव्याण्येवेत्याकूतम् । यदुक्तं प्राक्
अविसृज्यैव गन्धपवित्रं व्रतांगान्यपि

पञ्चगव्यचरुवर्ज्यान्यादाय शुद्धपात्रे कृत्वा इति ॥

(२६८) शिवस्य पवित्रारोपण विधिः ।

(क्रि) (३७) देवं सप्रकृतिमण्डलमभिनन्दितं [-मण्डलविनिन्दित]
परदानोद्यतमभिध्यात्वा [-दानोद्यतत्यत्वा-], शिवं [शिव]
कालात्मकं [कलाम्तकं]

p. 489)

स्मरन् [स्मरेत्] वर्षाय नर्तुमासपक्षदिन
घटिकाप्राणादिविग्रहं सर्वेन्द्रियशरीरार्थ
व्यवहारैककारणं कृताकृतसमुत्सृष्टिक्लिष्टकर्मैकसाक्षिणं
[कृतसमष्टं क्लिष्ट-] क्षेत्रगोप्तारमीशानं शरण्यं
शुचिमानसः पवित्राणि [शुतिमव्ययं पवित्रा-] समादाय
धूपयन् किञ्चित्कालसन्मुखी [किञ्चित्कलशसन्मुखी] विज्ञापयेत् ओम्
कालात्मना त्वया देव [देवा] यद्दृष्टं [यद्दुष्टं] मामके
विधौ । कृत क्लिष्टं समुत्सृष्टं [कृतत्वष्टं समु-] हृतं
गुप्तञ्च मत्कृतम् [मत्कत्म्] ॥ तदस्तु क्लिष्टम क्लिष्टं
[तदस्त्रक्लिष्टमक्लिष्ट] कृतं पुष्टमसत्कृतम् ।
सर्वात्मनाऽमुना शंभो पवित्रेण त्वदिच्छया ॥
ओं पूरय पूरय मखव्रतनियमेश्वराय स्वाहा

इत्युच्चार्य, प्रकृत्यन्तव्याप्तिके ब्रह्मकारणपालिते आत्मतत्वे ओं हां हौं आत्मतत्वाधिपतये शिवाय स्वाहा इति मायान्तमुच्चार्य [-यान्तमूच्चार्या], शुद्धविद्यान्तव्याप्तिके विष्णुकारणपालिते

p. 490)

विद्यातत्वे ओं हां हौं विद्यातत्वाधिपतये शिवाय स्वाहा इति ईश्वरान्तमुच्चार्य [शिवान्त-], शिवान्तव्याप्तिके रुद्रकारणपालिते शिवतत्वे ओं हां हौं शिवतत्वाधिपतये शिवाय स्वाहा इति शिवान्तमुच्चार्य [-चार्यदूर्वा-], क्रमेण दूर्वापुष्पाक्षतोपेतं लिङ्गमूर्ध्नि पवित्रत्रयं दद्यात् मुमुक्षुः [मूक्षुः शिवतत्वाद्यु-]। बुभुक्षुस्तु शिवतत्वादिकमुच्चार्य पवित्रत्रयं दद्यात्। पश्चात् सर्वकारणपालिते सर्वतत्वे ओं हां हौं सर्वतत्वाधिपतये शिवाय स्वाहा इति लयान्तमुच्चार्य, सर्वतत्वात्मकं गंगावतारकं दत्वा, ब्रह्मांगेभ्यश्च पवित्राणि दत्वा, पुष्पाञ्जलिं शिवाय मूलेन दत्वा महामुद्रया परमीकृत्य ॥ (२२३)

(प्र) अथ शिवस्य पवित्रारोपण विधिमतिदिशति (देवम्) इत्यादिना (परमीकृत्य) इत्यन्तेन।

p. 491)

(सप्रकृतिमण्डलम्) विरिञ्चादिप्रधानमण्डल सहितं
विरिञ्चाद्यभिष्टुतमित्यर्थः। तथा समाख्यातं
सोमशंभुचरणैः स्तूयमानं विरिञ्चाद्यैस्सन्तुष्टं
भावयेच्छिवम् इति। प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे इति
यादवः। कथं विज्ञापनं कुर्यादित्याह (ओम्) इत्यादि।
(कालात्मना)
त्रुटिलवनिमेषकाष्ठाकलामुहूर्तघटिकायामाहौरात्र
पक्षमासर्त्वयनसंवत्सरयुगमन्वन्तरकल्पमहाकल्पाख्यो-
ऽष्टादशावयवः काल आत्मा शरीरं नित्याधिष्ठेयत्वेन यस्य स
तथोक्तः तेन। (मामके विधौ) मदीया व्यापारे। (यत् क्लिष्टं
कृतम्) असंपूर्णमनुष्टितम्। (यच्च समुत्सृष्टम्) अज्ञानादिना यत्
किञ्चन कर्म संस्कारमुपेक्ष्य कृतं नानुष्ठितं वा।

p. 492)

(यच्च वा हृतम्) कार्यवशात् बुद्धिपूर्वं व्यग्रतया वा
स्वावसरमपि कृत्यं कृतम्। (यच्च वागुप्तम्) वित्तशाठ्येन कृतम्।
दुष्कृतमपि प्रायश्चित्ताभावात् लज्जया गोपितम्। तत् क्वचिद्दृष्टं
कर्म क्लिष्टमक्लिष्टमस्तु असत्कृतं पुष्टमस्तु।
अनेनैतत्समुत्सृष्टहृतगुप्तानां तन्त्रेणाभिधानं
सर्वेषामसत्कृतत्वाविशेषात्। (सर्वात्मना) आत्मतत्वादिरूपत्वेन
सर्वव्यापकत्वेन सर्वपूरकेणेति यावत्। (अमुना) पवित्रेण।

क्लिष्टाद्युपलक्षित सर्वकर्मच्छिद्राणि (पूरय पूरय

मखव्रतनियमेश्वराय स्वाहा) मखोयागः व्रतं

कृष्णाष्टम्यादि नियमः अक्रोधादयः स्वयं कल्पितो वा

तेषामीश्वरः तस्मै । स्वाहेत्यत्र स्वशब्दः स्वात्मवाची ।

हेतिशब्दः

मिस्सिन्ग् पगे नो । ४९३

p. 494)

क्षित्यादिमायान्ताध्वांशव्यापकमात्मतत्वमिति भावः ।

(ब्रह्मकारणपालिते) इति । अत्र ब्रह्मा श्रीमत्किरणाद्युक्तत्वात्

अशुद्धाध्वस्थितः शुद्ध एव न तु प्राकृत इति केचित् ।

अणुशक्तिशंभुभेदेन मन्त्रमन्त्रेश्वराणामिव

कारणेशानामपि त्रिविधत्वात् ब्रह्माद्यधिष्ठान

युक्तशक्तिविशेषा एव तत्र ब्रह्मादिशब्देनोच्यन्त इति गुरवः ।

तदुक्तं श्रीमत्पराख्ये एको वा नामगैर्भेदैः पञ्चधा

समवस्थितः इति । (आत्मतत्वे) इति । अत्र सप्तमी निमित्तार्थे इति केचित् ।

अधिकरणार्थे सप्तमी तत्रत्वधिष्ठातारं शिवमित्याध्याहृत्य

व्याख्येयमिति भणन्ति । एवमुत्तरत्रापि ज्ञेयम् । (मायान्तमुच्चार्य)

इति । अत्र माया तत्वान्तव्यापकस्य तालु पद्मे

p. 495)

प्रकाशमानस्य रुद्रवाचकस्य मकारान्तमुच्चारः कार्यः ॥

द्वितीयपवित्रदानविधिमाह (शुद्ध) इति ।

(शुद्धविद्यान्तव्याप्तिके) शुद्धविद्यान्ता ईश्वरतत्वपर्यन्ता

व्याप्तिः यस्य तत् तथोक्तं तस्मिन् । अत्र श्रीमन्मृगेन्द्रादौ

ईश्वरतत्वस्य शुद्धविद्यायामन्तर्भाव श्रवणात् ईश्वरान्तं

समुच्चार्येति लिङ्गेन चात्र लक्षणया विद्यातत्वशब्देन

ईश्वरतत्वं विवक्षितम् । तत्तत्वार्द्धांशव्यापकं

विद्यातत्वमित्याशयः । तदधिष्ठातारं शिवं ध्यात्वा ।

(ईश्वरान्तमुच्चार्य) इति । अत्र ईश्वरतत्वान्तव्यापकस्य भ्रूमध्ये

प्रकाशमानस्य ईश्वरवाचकस्य बिन्दोरन्तमुच्चारः कार्यः ॥

तृतीयपवित्रदानविधिमाचष्टे (शिव) इति । (शिवान्तव्याप्तिके)

शिवान्ता शिवशक्त्यवधिः व्याप्तिः यस्य तत् तथोक्तं तस्मिन् ।

p. 496)

शक्तितत्वाध्वान्तव्यापकं शिवतत्वमिति यावत् । तस्मिन्

अधिष्ठातारं शिवं ध्यात्वा । (शिवान्तमुच्चार्य) इति ।

अत्र ब्रह्मरन्ध्रान्ते प्रकाशमानस्य सदाशिव वाचकस्य

अर्द्धचन्द्रनिरोधिभ्यां सहितस्य नादस्यान्तं मन्त्रमुच्चार्य

लिंगमूर्ध्नि पवित्रं दद्यात् ॥

एवं केन पवित्रं देयमित्याशंक्याह (मुमुक्षुः) इति ।

(मुमुक्षुः) मुक्तिकामः नैष्ठिकदीक्षावानिति यावत्।

कथमेतस्मादन्यस्येत्याशंक्याह (बुभुक्षुः) इति। (बुभुक्षुः)

भुक्तिकामः भौतिकदीक्षा दीक्षित इत्यर्थः। न तु गृहस्थः। एष

भेदो दीक्षायां स्पष्टयिष्यमाणत्वान्नेह प्रपञ्च्यते॥

अत्र बुभुक्षु विषये केचित् ऊर्ध्वस्थायि शिवतत्वपवित्रस्य

स्वाधोवर्तिविद्या

मिस्सिन्ग् पगे नो। ४९७ अन्द् ४९८

p. 499)

अकृतं वाक्यहीनञ्च तत्पूरय [तत्पूर्वय] महेश्वरः॥

सुपूतस्त्वं सुरेशान [महेशान] पवित्रं पापनाशनम्।

त्वया पवित्रितं सर्वं जगत् स्थावरजंगमम् [जगस्थाव-]॥

खण्डितं यन्मया देव व्रतं वैकल्य योगतः।

एकी भवतु तत्सर्वं तवाज्ञा सूत्रगुंभितम् [सूत्रकुंभित]॥

इति विज्ञाप्य॥ (२२८)

(प्र) अथ तदनन्तरकरणीयान्याह (पुष्पाञ्जलिपुटः)

इत्यादिना (विज्ञाप्य) इत्यन्तेन। कथं विज्ञापयेदित्याशंक्य

विज्ञापनमन्त्रमाह (ओं त्वं गतिः) इति। (गतिः) मुक्ति लक्षणा।

तथोक्तं श्रीमत्स्वायंभुवे

दग्धसंसारबीजस्य या पुंसः पश्चिमा स्थितिः।
सागतिस्तस्य विज्ञेया न देशान्तरसंस्थितिः॥

इति। श्रीमत्पराख्येपि प्राप्तिस्स्यात् समताऽस्य तु इति। परमेश्वरस्य गतित्वासंभवात्

p. 500)

तद्धेतुत्वेन गतिशब्दवाच्यत्वमिति ज्ञेयम्। (सर्वभूतानाम्) निश्शेषजन्तूनाम्। खादौ जन्तौ तु भूतन्तु इति वैजयन्ती। (चराचरे) स्थावरजंगमे। (संस्थितः) लक्षणया दोषवचनाय तन्निवृत्तये चाधिष्ठातृतया सम्यक् स्थितः। (अन्तश्चारेण) अन्तर्यामितया। (द्रष्टा) शुभाशुभकर्मसाक्षी। (कर्मणा) कायव्यापारेण। (मनसा) ध्यानादि हेतुना। (वाचा) स्तुत्यादिरूपया। (गतिः) गन्तव्यम्। मदीयानां कायमनोवाक्साध्यानां क्रियाणां त्वमेव विषय इत्यर्थः। (अकृतम्) च्युतं सन्ध्योपासनादि यत्तत्। (वाक्यहीनम्) स्वागतविज्ञापनादि वाक्यं तस्य हीनम्। (सुपूतः) सुष्ठु अतिशयेन शुद्धः अनादिनिर्मल इत्यर्थः। (पवित्रम्) पतनत्राणहेतुः। (पापनाशनम्)

p. 501)

पापस्य मलादेर्नाशनं वस्तु त्वमेव। अत एव त्वया सर्वं

पवित्रितम्। मया यद्भूतं वैकल्ययोगतः खण्डितं विच्छिन्नं तत्
सर्वं तवाज्ञा सूत्रगुंभितं भवदाज्ञासूत्रेण ग्रथितं
एकीभवतु ॥

विज्ञापनानन्तरकरणीयविधिः ॥

(क्रि) (३९) धूपदीपारात्रिकदर्पणच्छत्रचामराणि दत्वा,
अनन्तादिभिस्स्तूयमानं सन्तुष्टं विभाव्य, अमृतीकरण-
परमीकरणे विधाय [विधाया], जप्त्वा निवेद्य, ब्रह्मांगानां
दशांशं जप्त्वा निवेदयेत्। आचार्यः सर्वदेवेभ्यः
पवित्रमारोपयेत्। साधकस्साध्यमन्त्रस्यापि [-मन्त्रस्याभिवि-]
दद्यात्। चतुर्मासादिक्रियापर्यवसानान्तं यथेष्टं
गुरुणादिष्टं वा व्रतनियमं गृहीत्वा, देवं स्तोत्रैस्स्तुत्वा
प्रणम्य क्षमापयित्वा, कुंडान्तिकमागत्याग्निस्थाय भगवते

p. 502)

पवित्राण्यारोप्य, विधिवच्छिद्रपूर्तिस्थैर्याय
[विधिच्चिद्रपूज्यैस्थैर्या-] शताधिकं जुहुयात्।
ततश्चरुं [चरूं] हुत्वा प्रायश्चित्तार्थं [-चितार्थ] मूलेन
शतं हुत्वा, पूर्णां विधाय,
नैवेद्याचमनचन्दनतांबूलादीनि निवेद्य, भस्मचन्दनं

विधाय, शिवन्निरुद्ध्य, व्याहृतीर्हुत्वा, शिवाय पवित्रं दत्वा

निरुद्ध्याग्निं स्विष्टकृदाहुतिं हुत्वा ॥ (२२५)

(२८९) (प्र) अथ विज्ञापनप्रकारं व्याहृत्य

तदनन्तरकरणीयान्याह (धूपदीप) इत्यादिना (हुत्वा) इत्यन्तेन ।

(सर्वदेवेभ्यः) यागमण्डपस्थितदेवेभ्यः ।

केचिन्नित्यकर्मणि पूजितानां देवानां पवित्रारोपणं कार्यमिति

भणन्ति । साधकस्य साधिकारदीक्षादीक्षितत्वात् सोपि

काम्यमन्त्रस्य ददेदित्याह (साधकः) इति । पवित्रनियमग्रहण

प्रकारमाह (चतुर्मास) इति ।

p. 503)

(चतुर्मासादि क्रियापर्यवसान्तम्) इति । अत्र मास

त्रयादिरादिशब्दार्थः । तदुक्तं श्रीमत्सोमशंभुचरणैः

चतुरस्त्रीनथो द्वौ वा मासं मासार्द्धमेव च ।

सप्ताहं पञ्चरात्रं व त्र्यहमेकाहमेव च ॥

इति । क्रियापर्यवसानान्तमित्यत्र चतुर्मासादिविधानं सुप्त एव

जनार्दने इति विहितत्वात् वुष्णुस्वापान्तावधिकमेव । तदवधिस्तु

कार्तिकशुक्लद्वादश्येव कार्तिक्यां शुक्लद्वादश्यां कुरुते

बोधनं हरिः इति वचनात्। अत एव श्रीमत्किरणे
कृत्तिकाशुक्लनवम्यामेव पवित्रनियमावधिरित्यादिष्टं

(यथा हि चतुरो मासान्नियमेन नयेत् खग।)
अवधिं कार्तिकीं कृत्वा नवमीं शुक्ल एव तु॥

इति। अत एव तत्तिथिपर्यन्तमेव यथासंभवं यथारुचि
चातुर्मास्यादि व्रतग्रहणनियमो ग्राह्यः।

p. 504)

एतन्नियमप्रकारश्च श्रीमत्पौष्करादावुक्तः यथा

संकल्प्य चतुरो मासांस्थानमाश्रित्य वाञ्छितम्।
कार्यो नियमितैस्तैस्तु मृद्भस्मादिपरिग्रहः।
आर्द्रच्छेदमथाध्वानं गुरुरन्यत्र वर्जयेत्।

इति। श्रीमन्मोहशूरोत्तरश्रुतेरपि

न गन्तव्यं सहस्राक्ष पवित्रेत्वविवर्जिते।
विसर्जिते तु गन्तव्यं स्वेच्छं वै यत्र रोचते॥

इति । तत्र पक्षान्तरमाह (यथेष्टम्) इति । (गुरुणाऽदिष्टं वा) इति ।
अत्र परमावधित्वेनोक्तकालात् पूर्वं यथोक्तकालव्यतिरेकेण
गुरुणा स्वयं यो नियमकालावधिरुद्दिष्टः सोपि वा ग्राह्यः
इत्यवसेयम् । एवं श्रीमत्सोमशंभुपद्धतिव्याख्याकारेण
निर्वर्णितम् ॥
अग्न्याधारस्य देवस्य पवित्रारोपणक्रमं ब्रूते
(कुण्डान्तिकम्) इति ।

p. 505)

(पवित्राणि) आत्मतत्वादिपवित्राणि । तदुक्तं
श्रीमत्सोमशंभुचरणैः
पावकस्थे शिवेप्येवं पवित्राणां चतुष्टयम् इति । (व्याहृतीर्हुत्वा)
इति । अत्र भूराद्याहुति चतुष्टयं देयमित्यवसेयम् ॥

२९०- बलिदानादिविधिः ॥

(क्रि) (८०) परिधिविष्टरस्थेभ्यस्सपवित्रं बलिन्दत्वा
निरुद्ध्यान्तर्बलिं बहिर्बलिञ्च सपवित्रन्दत्वा, स्तोत्र वन्दनपूर्वं
सकलीकृत्य, गुरवे सिद्धान्तपुस्तकेभ्यश्च पवित्रन्दत्वा,
मण्डलस्थं शिवं संपूज्य, कर्म निवेद्य, क्षमापयित्वा,
लिङ्गस्थं कुंभस्थञ्च संपूज्य, लोकपालान् यागरक्षायै

सावधानान् संभाव्य ॥ (२२६)

(प्र) अथ बलिदानादिविधिः (परिधि) इत्यादि (संभाव्य) इत्यन्तम्

।

p. 506)

(गुरवे) इति । अत्र पञ्चब्रह्ममन्त्रेण पवित्रं देयम् ।

तथा श्रीमत्सुप्रभेदे

पञ्चब्रह्मणाचारोप्यमाचार्यस्य पवित्रकम् ।

शिष्यस्य तु षडंगेन अन्येषां हृदयेन तु ॥

इति ॥

सदस्यपूजाविधिः ॥

(क्रि) (४२) यथाशक्ति भोजनाच्छादनादिभिर्दीक्षितान् संपूज्य,

दीनान्धकृपणानाथबालवृद्धकृशातुरांश्च सन्तोष्य, अनेन

दानेन प्रीयतां मे सदाशिव इति ब्रूयात् ॥ (२२७)

(प्र) अथ सदस्यपूजामाह (यथाशक्ति) इत्यादिना (ब्रूयात्)

इत्यन्तेन । (यथाशक्ति) यथा विभवम् । (भोजनाच्छादनादिभिः)

भोजनवस्त्रचित्तादिभिः । (दीक्षितान्) शिवदीक्षासंपन्नान् ।

(दीनान्धकृपणादींश्च) कृपणः दरिद्रः कृपणो दुर्विधो दीनः

इत्यमरः ।

p. 507)

बालवृद्धादिरादिशब्दार्थः । (प्रीयताम्) प्रियं कुर्यात् । (ब्रूयात्)

उच्यताम् ॥

भोजनविधिः ॥

(क्रि) (४२) ततश्शिष्यैस्सह भुञ्जीत ॥ (२२८)

(प्र) अथ तदनन्तर करणीयमाह (ततः) इत्यादिना (भुञ्जीत)

इत्यन्तेन ॥

(२९२) एकाहपक्षे द्वितीयदिन करणविधिः ॥

(क्रि) (४३) अपरेद्युः स्नात्वा, सन्ध्यान्निर्वर्त्य, शिवात्

पवित्राण्याहृत्य, पूर्वदिनवत् शुद्धपात्रे निधाय, अष्टपुष्पिकया

देवं संपूज्य विसृज्य, नित्याह्निकद्वयं निर्वर्त्य, नैमित्तिक

सन्ध्यापूर्वं पूर्वदिनवत् सूर्यपूजादिशिवपूजान्तं कर्म

विर्वर्त्य, वह्निस्थमपि संपूज्य, मन्त्रतर्पणं

p. 508)

विधाय, चरुं विपाच्य संपाद्य [संपात्य] निवेद्य सूर्यादीनां

यथापूर्वं पवित्राण्यारोप्य शिवायापि [शिवायति]

द्रव्यनिवेदनपूर्वं पूर्ववत् पवित्राण्यारोप्य, जपान्तं कर्म

[जपान्तकर्मं] निर्वर्त्य वह्निस्थमपि सन्तर्प्य, चरुं निवेद्य,

प्रायश्चित्तार्थं मूलेन वा अस्त्रेण वा अघोरेण वा शतं हुत्वा,

पूर्णां विधाय ॥ (२२९)

(प्र) अथांगिनं पवित्रमभिधाय इदानीमेकाहपक्षे

द्वितीयदिनकरणीयान्याह (अपरेद्युः) इत्यादिना (विधाय) इत्यन्तेन ।

अद्यात्राह्न्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ।

तथाधरान्यान्यतरेतरात् पूर्वेद्युरादयः इत्यमरः ॥

कर्मसमर्पणविधिः ॥

(क्रि) (४४) भुक्तिकामो भगवन् ममास्तु फलसाधकमिति व्रतं

शिवाय समर्पयेत् । मुक्तिकामस्तु कर्मेदन्मास्तु मे नाथ

p. 509)

बन्धकमिति कर्म निवेद्य ॥ (२२०)

(प्र) अथ कर्मसमर्पणविधिन्निरूपयति (भुक्तिकामः)

इत्यादिना (निवेद्य) इत्यन्तेन । (भुक्तिकामः) भौतिकः । (मुक्तिकामस्तु)

नैष्ठिकः । (बन्धकम्) मोक्षप्रतिबन्धकम् । (निवेद्य) इति ।

अत्र विशेषार्घ्यजलेन ओं हां हौं शिवाय स्वाहा इति
मूलमन्त्रेण शिवस्य वरदहस्ते निवेदयेदिति बोध्यम्।
तथा श्रीरामनाथपद्धत्यां

प्रणवं हृदयं मूलं शिवायेति पदन्ततः।
पूजाहोमादिकं स्वाहेत्युच्चार्यार्घ्योदकान्वितम्॥
मुद्रयोद्भवया कर्म वरहस्ते निवेदयेत्।

इति॥

यागविसर्जनक्रमः॥

२९२- (क्रि) (४५) वह्निस्थाय नैवेद्याचमन चन्दनतांबूलानि
भस्मचन्दनं कृत्वा, वह्नौ प्रविश्य, अष्टपुष्पन्दत्वा,

p. 510)

नत्वार्घ्यन्दत्वा, नाडीयोगेन वह्निस्थं भगवन्तं मण्डलस्थे
शिवे संयोज्य, वह्नेर्मन्त्रान् संहृत्य, द्वादशान्तं नीत्वा,
निस्सृत्य, स्वहृदि सन्निवेश्य, वह्निं व्याहृतिभिस्सन्तर्प्य, तदपि
विसर्जयेत्॥
यद्वा चण्डपूजान्ते तदपि संपूज्य, यथाशक्ति हुत्वा

विसर्जयेत्। सूर्यादीनां मण्डपार्चितानां परिधिविष्टरस्थेभ्यो
बलिं दत्वा, उद्वास्य बलिं दत्वा स्तोत्रवन्दनपूर्वं सकलीकृत्य,
मण्डलस्थमपि कुंभस्थे संयोज्य, कुंभास्त्रवर्द्धन्योः
मन्त्रान् संहृत्य, यागेश्वरे संयोज, सापेक्षं क्षमस्वेति
विसर्जयेत्। ततो देवञ्चाष्टपुष्पिकया संपूज्य,
अधिकरणानुरूपं सापेक्षं निरपेक्षं वा विसृज्य, सूर्यञ्च
यथार्हं विसृजेत्। ततो दिक्पालद्वारपालादीन् वैलोम्येन विसृज्य ॥
(२२२)

p. 511)

(प्र) अथ यागविसर्जनक्रममतिदिशति (वह्निस्थाय) इत्यादिना (विसृज्य)
इत्यन्तेन। (मण्डलस्थे शिवे संयोज्य) इति। तत्र विशेषसन्निधानं
संभाव्येत्यर्थः। (मन्त्रान्) संहितामन्त्रान्। (विसर्जयेत्) इति।
अत्र स्वाभिषेकार्थं कलशस्थं सामान्यसन्निधानं शिवं
सापेक्षमेव विसृजेदित्यवसेयम्। यदुक्तं प्राक् अवभृथान्तमत्र
भगवस्त्वया स्थातव्यमिति विज्ञाप्य इति। स्वेष्टलिङ्गस्थ शिवस्य
सापेक्षविसर्जनमाह (ततः) इति। (देवम्) स्वेष्टलिङ्गस्थितशिवम्।
(यथार्हम्) यथोचितम्। अधिकरणानुरूपमिति यावत्।
लोकपालादिविसर्जनक्रममाह (ततः) इति। (दिक्पालादीन्) इति।
आदिशब्देन मण्डपे पूजितसर्वदेवताग्रहणम्। अतो गुरुगणेशादीन्
पूजाक्रमविपर्यासेन निरपेक्षितं विसृजेदित्यर्थः ॥

p. 512)

चण्डेशपूजाविसर्जनभूतशुद्धिप्रकारः ॥

(क्रि) (४६) देवात् पवित्राणि यथान्यायमाहृत्य

[न्यायमाघृत्य?]

* पा श्रोत्र ॥

२९३- मण्डले स्थण्डिले वा चण्डेश्वरमाराद्धय, पवित्राणि

समारोप्य, निर्माल्यं सपवित्रं दत्वा, तं विज्ञापयेत्

यत्किंचिद्वार्षिकं कर्म कृतं न्यूनाधिकं मया ।

तदस्तु परिपूर्णं मे चण्डनाथ तवाज्ञया ॥ इति ।

तदनु तञ्च स्तुत्वा, चण्डाग्नौ चण्डेश्वरमाराद्धय, शतं

हुत्वा, विसृज्य, अन्धकूपादिके निर्माल्यं प्रक्षिप्य, पवित्राण्यग्नौ

दग्ध्वा, तमुभयतो व्याहृतिहोमपूर्वमग्निञ्च ब्रह्मादींश्च

विसर्जयेत् । ततो भूमिं गोमयेन संशोद्धय, आचम्य सकलीकृत्य,

पुनर्देवं संस्नाप्य पूजयेत् ॥ (२२२)

p. 513)

(प्र) अथ यागविसर्जनक्रममाख्याय चण्डेश्वरपूजातद्विसर्जन
भूतशुद्धिप्रकारमुदाहरति (देवात्) इत्यादिना (संशोद्धय)
इत्यन्तेन। (देवात्) स्वेष्टलिंगाधिकरणस्थशिवात्। (पवित्राणि
समारोप्य) इति। शुद्धपवित्राणि सन्धार्येत्यर्थः। तदभिहितं
श्रीमत्सोमशंभुचरणैः चण्डेशरविवह्नीनां शिववत्
सूत्रसंपदि इति। (निर्माल्यम्) पर्युषितपूजया चण्डार्थमवतार्य
स्थापितं पुष्पमालादिकम्। अत्र निर्माल्यशब्देन ईशादवरोपितस्य
पवित्रस्यापि सिद्धेः पुनस्तद्ग्रहणं आरोपितशुद्धपवित्रायापि
तस्मै निर्माल्यपवित्रारोपणमवश्यं कार्यमिति
ज्ञापनायेत्यवसेयम्। चण्डेश्वरं प्रति विज्ञापन प्रकारमाह
(यत् किञ्चित्) इति। (वार्षिकम्) वर्षे भवम्। सुगममन्यत्।

p. 414)

(तम्) चण्डेश्वरम्। (उभयतः) स्थण्डिलकुण्डाभ्याम्॥
अथ चण्डनाथ यजनादिविधानमभिधाय तदनन्तर
करणीयविधिमभिधत्ते (आचम्य) इत्यादिना (पूजयेत्) इत्यन्तेन।
(देवं संस्नाप्य) इति। अत्र शिवं स्वेष्टलिंगस्थ पवित्रारोपणाय
कृतपर्युषितपूजितत्वान्निर्माल्यपरिशोधनार्थं स्वेष्टलिंगं
नित्यवत् स्थापयित्वा पूजयेदिति बोद्धव्यम्। तदुक्तं
सोमशंभुचरणैः स्नापयित्वा शिवं यजेत् इति॥

२९८- सद्योधिवासे कर्तव्य क्रमः ॥

(क्रि) (४७) सद्योऽधिवासे सूर्यादीनां मण्टपार्चितानां
पूर्वोक्तक्रमेण गन्धपवित्रदानानन्तरं शुद्धपवित्रं
समर्प्य [दत्वा], देवस्यापि गन्धपवित्रदानात् [देवस्या गन्ध-]
पश्चात् अष्टपुष्पन्दत्वा, शुद्धपवित्राण्यारोप्य, वह्नावपि

p. 515)

गन्धपवित्रशुद्ध पवित्राण्यधिरोप्य, शेषं [-पवित्राण्यपि
निवेद्य ऐषं] पूर्ववत्कृत्वा, पूर्वोक्तवत् यागं विसृजेत् ॥ (२२३)
(प्र) अथ सद्योऽधिवासे कर्तव्यक्रममाचष्टे (सद्यः)
इत्यादिना (विसृजेत्) इत्यन्तेन ॥

पञ्चगव्यप्राशनविधिः ॥

(क्रि) (४७) ततश्शुद्ध्यर्थं पञ्चगव्यं प्राशयेत् ॥ (२२८)
(प्र) अथ तदनन्तर करणीयमाह (ततः) इत्यादिना (प्राशयेत्)
इत्यन्तेन । अत्रावसरे शिवकुंभास्त्रवर्द्धनीस्थजलैः
शिष्योऽभिषिच्यतामित्यवसेयम् । तथा श्रीमन्मृगेन्द्रे पवित्रावसाने

ततो विसृज्य चण्डेष्टिं विधायावभृथं भजेत्

इति । पूर्वमुक्तञ्च

सापेक्षं क्षमस्वेति विसर्जयेत् इति ॥

गुरुपूजाविधिः ॥

(क्रि) (४९) गुरुश्शिव इवाभ्यर्च्यो वस्त्रवित्तविभूषणैः ।

p. 516)

तुष्टेन गुरुनाथेन तुष्टो भवति शंकरः ॥
समग्रं [सङ्ग्रहं च समं तस्य] सकलं तस्य क्रियाकाण्डादि
वार्षिकम् ।
यस्य तुष्टो गुरुस्सम्यगित्याह परमेश्वरः ॥ (२२५)
(प्र) अथ गुरुपूजामाह (गुरुः) इत्यादिश्लोकद्वयेन ।
श्लोकार्थः स्पष्टः ॥

पवित्रकरणस्य गुरुसन्निधौ कर्तव्यत्वम् ॥

(क्रि) (५०) पञ्चयोजनसंस्थोपि शिष्यः पवित्रं [पवित्र] गुरुसन्निधौ
निर्वर्तयेत् [निवृत्तयेत्] ॥ (२२६)

(प्र) अथ एतत्पवित्रकरणं गुरुसन्निधावेव कार्यमित्याह

(पञ्च) इत्यादिना (निर्वर्तयेत्) इत्यन्तेन ॥

गुरुसन्निध्यभावे पवित्रकरण प्रकारः ।

(क्रि) (५२) ततः परं दूरस्थितोऽशक्तश्चेत् स्वसान्तानिकैः

ज्येष्ठादिभिस्सह निर्वर्तयेत् । तदभावे स्वयमेव निर्वर्तयेत् ॥

p. 517)

परमेश्वरापराख्याख्यातो जगति [जगती] यो गुरुः ।

तेनाघोरशिवाख्येन पवित्रविधिरीरितः ॥ (२२७)

इति परमेश्वरापर नामधेय श्रीमदघोरशिवाचार्य

विरचितायां क्रियाक्रमद्योतिकायां

पवित्रारोपणविधिस्समाप्तः ॥

(प्र) अथ गुरुसन्निधानाभावे पवित्रकरणप्रकारमाह (ततः)

इत्यादिना (निर्वर्तयेत्) इत्यन्तेन ॥

अथ एतत्पवित्र प्रकरणोपसंहारः (परमेश्वर)

इत्याद्येकश्लोकेन । सुबोधः श्लोकार्थः ॥

इति श्रीमत्कमलालयनिवासि भक्ताध्यक्षसन्तान
प्रभवत्यागराजाचार्यात्मजनिर्मलमणिगुरुविरचिताया-
मस्फुटार्थप्रकाशिकायां प्रभासमाख्यायां
क्रियाक्रमद्योतिकाव्याख्यायां पवित्रविधिस्समाप्तः ॥

p. 518)

शिवमस्तु ॥

दमनविधिः ॥

२९७-

(क्रि) (२) ये पुनर्न करिष्यन्ति दमनं पर्व मानवाः ।
तेषान्ते चैत्रमासोत्थं दत्तं पुण्यफलं मया ॥

इति श्रवणात् चैत्रमासपूजापुण्यफलालाभभयात्
तन्त्रान्तर विहितमपि दमनोत्सवविधिं साधकाश्श्रद्दधते
तच्छ्रद्धालूनां पवित्रवद्यागं कुर्यात् । उद्यानगतं
गृहगतं वा दमनं गत्वा संबोधयेत् । यथा अस्त्रेण
संप्रोक्ष्य, संहिताया संपूज्य,

हरप्रसादसंभूत त्वमत्र सन्निधीभव ।

शिवकार्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ॥

इति । सपञ्चांगं दमनं अग्निसन्निधिं नीत्वा, संपात्य

निवेदयेत् ।

शिवस्य पश्चिमे दमनमूलं मृदञ्च सद्येनाददीत ।

उत्तरे वामेन नालं धात्री फलं दक्षिणे रूपिणा पत्रं भस्म,

प्राच्यां तत्पुरुषेण पुष्पं दन्तधावनार्थं काष्ठं,

p. 519)

ऐशान्यां गायत्र्या फलं चन्दनञ्च निवेद्य, सपञ्चाङ्गं

दमनमञ्जलौ गृहीत्वा विज्ञापयेत्

अर्पितोऽस्मीह देवेश सद्यः काले त्वया प्रभो ।

कर्तव्यन्तु यथा लाभं पूर्णं पर्व तवाज्ञया ॥ इति ।

देवस्य मस्तके मूलेन संयोज्य, अष्टपुष्पं दत्वा, ततः ओं

हां हौं आत्मतत्वाधिपतये शिवाय नमः ओम् हां हौं

विद्यातत्वाधिपतये शिवाय नमः ओं हां हौं शिवतत्वाधिपतये

शिवाय नमः ओं हां हौं सर्वतत्वाधिपतये शिवाय नमः ओं

हां हौं मखं पूरय पूरय शिवाय नमः इति क्रमेण देवस्य

मस्तके संयोज्य, निवेद्य,

भगवन्नतिरिक्तं वा हीनं वा यन्मया कृतम् ।

सर्वं तदस्तु संपूर्णं पर्व दामनकं मम ॥

२९८- इति विज्ञाप्य, अग्न्यादिभ्योऽपि दमनं निवेद्य, विज्ञाप्य,

यागं विसृजेत् ॥ (२२८)

p. 520)

इति परमेश्वरापरनामधेय श्रीमदघोरशिवाचार्य विरचितायां

क्रियाक्रमद्योतिकायां दमनविधिस्समाप्तः ॥

(प्र) योऽनुग्रहं वटमहीरुहमूलभागे स्थित्वा करोति

यमिनाममुमानमय्य ।

लेशाद्यथामति शिवागमयुक्तियुक्तां

दामार्चनक्रमविधेर्विवृतिं विधास्ये ॥

अथ इत्थं वार्षिकं नित्याङ्गभूतं पवित्रारोपण

विधिमभिधाय दमनपूजामभिधातुं तत्करणे हेतुमाह (ये

पुनः) इत्यादिना (श्रद्दधते) इत्यन्तेन । ये पुनरित्यादिकारिका

दमनं प्रति परमेश्वरवाक्यम् । (तन्त्रान्तर विहितमपि)

स्वच्छन्दभैरवतन्त्रविहितमपीत्यर्थः । तदभिहितं

श्रीमत्सोमशंभुचरणैः

स्वच्छन्द भैरवे तन्त्रे यद्यपीदमुदाहृतम्।

तथापीह समानत्वात् सिद्धान्तेप्युपयुज्यते॥ इति।

p. 521)

अनेन मिश्राचारो न कर्तव्यः इत्यादि

वाक्यभयादेतदकर्तव्यमित्याकांक्षा परिहृता। (साधकाः) इति।

साधयन्ति भोगमोक्षावित्याचार्यादय इत्यर्थः। (श्रद्दधते)

श्रद्धां कुर्वन्ति। अत्र दमनोत्सवाकरणे चैत्रमासपूजा

दमनरूपभैरवस्य स्यात् ततस्तन्मासपूजादि फललाभाय

दमनार्चनमवश्यं करणीयमिति तात्पर्यम्॥

अथाधिवासनमाह (तत्) इत्यादिना [एतच्चिह्नितः प्रतीका

अधोमुद्रित मूले नोपलभ्यन्ते। अतोऽनुमीयते व्याख्यानुसारी]

(स्वपेत्) इत्यन्तेन। (तच्छ्रद्धालूनाम्) दमनोत्सवश्रद्धावताम्।

(पवित्रवत्) पवित्रेण तुल्यम्। (यागम्) मण्डपपूजादिकम्।

दमनकामन्त्रणप्रकारः कथ्यते (उद्यानगतम्) इत्यादिना

(सपञ्चाङ्गम्) पञ्चांगसहितम्॥

p. 522)

मूलपाठोऽन्यादृश इति। स च तत्र तत्र

कोशेष्वन्विष्यद्भिरप्यस्माभिर्नेयता कालेनालंभि।

यदीतः परमपि कुत्रचिल्लभ्येत तदा ग्रन्थावसाने मुद्राप्येतेति

बोद्धव्यम् ॥

२९९- पञ्चांगान्यत्र मूलनालपत्रपुष्पफलसंज्ञानि ।

(संपाद्य) दमनस्य संपातसंस्कारं विधायेत्यर्थः ।

एतत्संस्कारानन्तरकरणीयान्याह (शिवस्य) इति ।

विज्ञापनपुरस्सरं गन्धदमनारोपणक्रममाह

(सपञ्चांगम्) इति । अवशिष्टदमनकावस्थापनप्रकारमाह

(शेषम्) इति । (कुंभे) कुंभस्थशिवे । (निवेदयित्वा) रक्षस्वेति

निवेदय । समीपे निवेशयेदित्याशयः । अनन्तर करणीयमाह *

(पवित्र) इति । अथ एवमंगभूतं दमनाधिवासनमभिधाय

प्रातः कृत्यादि पूर्वमंगिनो दमनारोपणस्य प्रकारमाह *

(प्रातः)

p. 523)

इत्यादिना (विज्ञाप्य) इत्यन्तेन । यागविसर्जनमाह (यागं विसृजेत्) इति ।

अथोपसंहारः (इति) इति ॥

इति श्रीमत्कमलालयनिवासि भक्ताध्यक्षसन्तानप्रभवत्यागराजा-

चार्यात्मजनिर्मलमणिगुरु विरचितायामस्फुटार्थ प्रकाशिकायां

प्रभासमाख्यायां क्रियाक्रमद्योतिका व्याख्यायां

दमनविधिस्समाप्तः ॥

****

*
* ंऊख्टाड्ःआ ईण्ड्ळ्ग़ीआळ् ऱ्आऱः ईण्ष्टीटूट्
*
*
* २०११ ंउक्तबोध ईन्दोलोगिचल् ऱ्एसेर्छ् ईन्स्तितुते आल्ल् ऱ्इघ्त्स् ऱ्एसेर्वेद् ।
*
* -तेक्ष्त्स् मय् बे विवेद् ओन्ल्य् ओन्लिने ओर् दोव्न्लोदेद् फ़ोर् प्रिवते स्तुद्य् ।
* -तेक्ष्त्स् मय् नोत्, उन्देर् अन्य् चिर्चुम्स्तन्चेस्, बे चोपिद्, रेपुब्लिशेद्,
* रेप्रोदुचेद्, दिस्त्रिबुतेद् ओर् सोल्द्, एथेर् इन् ओरिगिनल् ओर् अल्तेरेद् फ़ोर्म्, विथोत्
* थे एक्ष्प्रेस्स् पेर्मिस्सिन् ओफ़् ंउक्तबोध ईन्दोलोगिचल् ऱ्एसेर्छ् ईन्स्तितुते इन् व्रितिन्ग् ।
****